व्याख्यार्थ:—इस प्रकार गत दो श्लोकों से मन और शरीर के सम्बन्ध की प्रार्थना करके अक्रूरजी लब्धाङ्गसङ्ग–इस श्लोक से वाणी के सम्बन्ध की प्रार्थना करते हैं। पहले कहे हुए धर्मों का पुनः अनुवाद अनुवृत्ति का सूचक है, विकल्प का सूचक नहीं है। भगवान् के श्री अङ्ग का स्पर्श करके तीर्थ रूप हुए, नम्र 'तो भी गर्व नहीं करने वाले', और हाथ जोड़कर खड़े हुए मुझसे वे 'हे अक्रूर ! हे तात !' मेरा नाम लेकर सम्भाषण करेंगे; क्योंकि नाम लेकर सम्बोधित करना महत्व, पिता की समानता तथा स्नेह का सूचक होता है। भगवान् का सभी जगह सम्मान, कीर्ति और प्रतिष्ठा होती है। इसलिए ये सारी वस्तुएं (उरुश्रवा) उनके पास अत्यधिक हैं। जिसके पास जो वस्तु अधिक होती है, वह उसके पास आने वालों को वही वस्तु देता है। इस सर्व साधारण नियम से भगवान् मेरा सम्मान करेंगे।

अक्रूरजी तो स्वभाव से और कुल से भी महा पुरुष ही हैं। तब ही तो इनका यादव कुल में जन्म हुआ। इसलिए श्रीकृष्ण ने यदि इनका अङ्गीकार-सम्मानादि-नहीं किया तब भी इनकी क्या हानि होगी ? क्या बिगडेगा ? इस शङ्का के उत्तर में स्वयं कहते हैं कि–'महतो महीयान्'-भगवान् जिसका आदर न करें, उस मनुष्य के जन्म को धिक्कार है। यद्यपि सदा सम्मान की अपेक्षा नहीं होती, तो भी समय पर सम्मानित नहीं हुए पुरुष का जन्म व्यर्थ ही है; क्योंकि उसके ऐसे जन्म से कुछ लौकिक कार्य भी सिद्ध नहीं होता है। इसी बात को बतलाने के लिए मूल में धिक् शब्द कहा है ॥ २१ ॥

श्लोकः—**न तस्य कश्चिद्दयितः सुहृत्तमो न चाप्रियो द्वेष्य उपेक्ष्य एव वा।**
तथापि भक्तान् भजते यथा तथा सुरद्रुमो यद्वदुपाश्रितोर्थदः ॥२२॥

श्लोकार्थ:—वास्तव में भगवान् समदर्शी हैं उन्हें न कोई प्रिय है न अतिप्रिय है,

न शत्रु है और न कोई उपेक्षा का ही पात्र है। फिर भी जैसे कल्प वृक्ष अपने पास आनेवाले की कामना को पूरी करता है, वैसे ही उनको जो जिस भाव से भजता है, उसको वे भी उसी भाव से भजते हैं ॥२२॥

सुबोधिनी:—ननु पुरुषोत्तमो भगवान् त्वमत्यन्त हीनः कथमेवं तवादरं करिष्यति, तस्य बन्धुत्वादि तु नापेक्ष्यत एवेति चेत्, सत्यं, तथापि मन्मनोरथः सेत्स्यतीत्याह **न तस्ये**ति, वस्तुतो भगवान् सर्वेषामेव स्वरूपं, अन्तरान्यथाभावे तु पञ्च भगवता सह व्यवधानानीति, लोके जीवानां परस्परं पञ्च सम्बन्धा भवन्ति, बुद्धिस्त्रिविधा अपेक्षोपेक्षाद्वेषभेदात्, अपेक्षा द्विविधा, देहसम्बन्धात् मित्रभावाद् वा, द्वेषश्च द्विविधः, स्वस्य द्विष्टतया तत्कृतापकारेण वा, तत्र **दयितः** देहसम्बन्धी स्निग्धः, **सुहृत्तमो**तिमित्रं, भगवान् सर्वसख इति तद्व्यावृत्त्यर्थं तमप्प्रत्ययः, **अप्रियः** स्वस्य द्वेषविषयः, **द्वेष्यः** द्वेषहेतुः, विपरीतं वा, भगवांस्तु कस्यापि किमपि **न** भवति **यतो** देहधर्मा एवैते, तथाच लौकिकन्यायेन पुरस्कारः अपकारो वा न भवति दृष्टान्तार्थं द्वितीयमुक्तम्, तथापि भक्तिशास्त्रात् तथा करिष्यतीत्याह **तथापी**ति, अन्यथा 'ये यथा मां प्रपद्यन्त' इति प्रतिज्ञा विरुद्धा स्यात्, तेपि भगवन्तं भजन्त इति **भक्तान् भजते**, **यथा** भक्तास्तथा, नन्वेवं सत्यनर्थ एव स्यात्, प्रयोजनाभावश्च, भक्तो नमस्करोति पादसंवाहनं च करोति तथा चेत् कुर्यात् जीवानां कार्यमेव नश्येत्, तुलसी हि समर्प्यते भगवते भगवानपि चेत् तुलसीमेव दद्यात् किं स्यादित्याशङ्क्याह **सुरद्रुमो यद्व**दिति, भजनार्थमेव हि तथाकरणं, भगवांस्तु तदनुसर्यपेक्षितमेव फलं प्रयच्छति, नापि तत्कृतं नापि स्वेच्छया, यथा कल्पवृक्षः निकटे गत एव कार्यं साधयति, अनेन सर्वात्मकत्वेपि भगवतः भक्तेभ्य एव दानमिति वैषम्यं परिहृतम्, नह्यपेक्षितं प्रयच्छन् कल्पवृक्षो विषमो भवति, अन्यथा व्यवस्थितिर्न स्यादिति, कर्मफलं तु तुच्छम्, तथा सति भगवत उत्कर्षोपि न स्यात्, अत **उपाश्रितायै**व पुरुषार्थदः, नत्वनुपाश्रितायेति सर्वं सुस्थम् ॥२२॥

व्याख्यार्थः—यद्यपि यह सत्य है कि वे भगवान् श्रीकृष्ण पूर्ण पुरुषोत्तम हैं, उन्हें जाति, गोत्र तथा बन्धु की अपेक्षा नहीं है। मैं तो अत्यन्त हीन हूँ, तो भी वे मेरा आदर करेंगे ही, मेरा मनोरथ सिद्ध ही होगा—यह न तस्य-इत्यादि श्लोक से कहते हैं। वास्तव में भगवान् सबके ही स्वरूप हैं, तो भी बीच में भगवान् के साथ पांच व्यवधान होने से वे सर्वरूप प्रतीत नहीं से हो रहें हैं। लोक में जीवों के आपस में एक दूसरे के साथ पांच सम्बन्ध होते हैं। अपेक्षा, उपेक्षा और द्वेष भेद से बुद्धि तीन प्रकार की है। देह सम्बन्ध और मित्र भाव भेदों से अपेक्षा दो प्रकार की है। स्वयं बैर करने अथवा किसी के अपकार करने पर-द्वेष भी दो प्रकार का होता है। उनमें अत्यन्त प्रिय देह सम्बन्ध से होता है और अत्यन्त सुहृत्-मित्र भाव से होता है। भगवान् सबके मित्र हैं, यही नहीं, वे तो सबके घनिष्ट मित्र हैं, सुहृत्तम हैं।

भगवान् का कोई अप्रिय-द्वेष पात्र तथा द्वेष्टा-द्वेष का हेतु तथा विपरीत भी कोई नहीं है। वे तो किसी के कुछ भी नहीं है। क्योंकि ये सारे शत्रु मित्रादि देह के ही धर्म हैं। इसलिए आनन्द मात्र आकार भगवान् से लोक रीत्यानुसार न कोई आदर पाता है और न कोई तिरस्कार ही; क्योंकि कि वे किसी का अथवा कोई उनका अपकार तथा द्वेष पात्र नहीं है। यद्यपि यह सब सत्य है, तो भी वे मेरा भक्ति शास्त्र के अनुसार सब प्रकार आदर करेंगे ही; क्योंकि 'ये यथा मां' अपनी प्रतिज्ञा के अनुसार भक्तों को वैसे ही भजते हैं; जैसे भक्त उनकों भजते हैं।

शङ्काः—भक्त तो भगवान् को नमस्कार करता है। उनके पाद-सवाहन-पांव दबाता है। और तुलसी पत्र अर्पण करता है। बदले में भगवान् भी भक्त के साथ वैसा ही भजने-करने-लग जांय, तब तो बड़ा ही अनर्थ होगा ? इस शंका की निवृत्ति यहां कल्प वृक्ष के दृष्टान्त से की है। जैसे कल्प वृक्ष उसके निकट जाने वाले को ही उस जाने वाले का वाञ्छित ही अपेक्षित ही फल देने से विषम नहीं होता, वैसे ही सर्वात्मक भी भगवान् सदा निकट-भजने-वाले भक्तों को ही उनका अपेक्षित ही देते हैं उनकी कृति अथवा अपनी इच्छा से नहीं देते और विषम भी नहीं होते। "वैषम्यनैर्घृण्ये न, सापेक्षत्वात्" निकटस्थों को भक्तों को अपेक्षित का दान करने से विषमता मान ली जायगी तो कोई व्यवस्था ही नहीं रहेगी। कर्मानुसार फल देते हैं उनका आश्रय करने से क्यों ? यह कहना तो तुच्छ है; क्योंकि कर्मानुसार फल देने से तो भगवान् का कुछ उत्कर्ष ही नहीं रह जाता। इसलिए कल्प वृक्ष की तरह वे उनके आश्रितों के लिए ही पुरुषार्थ देते हैं, उनका आश्रय नहीं करने वालों को नहीं देते हैं। इस प्रकार से सारी व्यवस्था ठीक हो जाती है ॥२२॥

श्लोकः—**किं वाग्रजो मावनतं यदूत्तमः स्मयन् परिष्वज्य गृहीतमञ्जलौ ।**
गृहं प्रवेश्याप्तसमस्तसत्कृतं सम्प्रक्ष्यते कंसकृतं स्वबन्धुषु ॥२३॥

श्लोकार्थः—मैं जब शिर झुकाये और हाथ जोड़कर सामने खड़ा होऊंगा, तब प्रसन्न मुख बलदेवजी मेरा आलिङ्गन करेंगे और मेरा हाथ पकड़कर घर के भीतर लिवा ले जायेंगे। वहां भोजन आदि से मेरा सत्कार करके माता, पिता, बन्धु बान्धवों की कुशल तथा उनके साथ कंस के व्यवहार को भी पूछेंगे ॥२३॥

सुबोधिनी—एवं भगवद्विषयकं कायवाङ्मनोरूपं मनोरथमुक्त्वा बलभद्रविषयकं मनोरथमाह **किं वेति**, **अग्रजो** ज्येष्ठभ्राता, अनेन मया सर्वोपि वृत्तान्तो ज्ञायत इति मयि कृपां करिष्यतीति भावः, तस्याप्यहम**वनतः** ज्येष्ठस्यापि कनिष्ठावनतौ उत्तमत्वं प्रयोजकमिति **यदूत्तम** इत्युक्तम्, **स्मयन्निति**, सम्यक्त्वमागतः कंसं घातयितुमिति, बन्धुत्वात् **परिष्वज्य** महत्त्वपूर्वकं मामञ्जलौ **गृही**त्वा अतिनिकटत्वात् **गृहं प्रवेश्य** भोजयित्वा गृहगतमिव कृत्वा ततोप्यधिकं वा **आप्ता समस्ता सत्कृति**र्येन तादृशं पश्चाद् विश्रान्तं **स्वबन्धुषु कंसकृतं सम्प्रक्ष्यते** किमिति लोके सिद्धमिति, भगवान् महानिति मनोरथः ॥२३॥

व्याख्यार्थः—इस प्रकार अक्रूरजी देह, वाणी और मनरूप अपना भगवान् सम्बन्धी मनोरथ का वर्णन करके अब 'किं वाग्रजो' इस श्लोक से बलदेवजी सम्बन्धी अपना मनोरथ कहते हैं। वे भगवान् के बड़े भाई हैं। मैं उनके सारे ही वृतान्त को जाननेवाला हूँ। इसलिए वे प्रणाम करने वाले मुझ पर कृपा करेंगे। वे यादवों में उत्तम हैं। अतः मुझसे आयु में छोटे होने पर भी वे मेरे प्रणम्य हैं। कंस का बध कराने के लिए मैं उन्हें लिवाने जाऊंगा—यह अपनी अलौकिक दृष्टि से जानकर तथा मैं उनका अत्यन्त निकट सम्बन्धी बन्धु हूं—इस कारण वे हँस कर मेरा आलिङ्गन करेंगे और बड़े सम्मान के साथ मेरा हाथ पकड़कर मुझे घर के भीतर ले जावेगें। वहां भोजनादि सब विधों से सत्कार ग्रहण करके विश्राम करनेवाले मुझसे अपने बन्धु बान्धवों को कुशल तथा उनके साथ कंस के व्यवहार को पूछेंगे। भगवान् महतो महीयान् हैं। इसलिए अक्रूरजी ऐसे मनोरथ करते जा रहे हैं।२३।

श्रीशुक उवाच ।

श्लोक—इति सञ्चिन्तयन् कृष्णं श्वफल्कतनयोध्वनि ।
रथेन गोकुलं प्राप्तः सूर्यश्चास्तगिरिं नृप ॥२४॥

श्लोकार्थः—श्रीशुकदेवजी कहते हैं कि–हे राजन्, श्वफल्क के पुत्र अक्रूरजी रास्ते भर इसी तरह श्रीकृष्ण के विषय में सोचते और उन्हीं के ध्यान में मग्न रहे । सूर्य के अस्त होते होते अक्रूरजी गोकुल पहुँचे ॥२४॥

सुबोधिनीः—एवं मार्गे रथं स्थापयित्वा सन्ध्यापर्यन्तमनेकविधं मनोरथमेव कृतवान्, तथापि भगवत्सम्मुखं प्रवृत्तौ सर्व एवानुगुणा भवन्तीति रथ एव तं गोकुले समानीतवान्, तदाह **इति कृष्णं सञ्चिन्तयन्**नेवान्तः **श्वफल्कतनयो** महान् यदान्तर्भगवन्तं प्राप्तवान् तदा **रथेन गोकुलमपि प्राप्तः**, भगवानानन्दरूपः स्त्रीणामेवेति सन्ध्यावधिरात्रावेवेति, मनोरथसिद्धयर्थं सूर्योप्यस्तंगत इत्याह **सूर्य** इति चकारात् **सूर्यो**प्यनुगुणः सर्वप्रकारेण, **नृपे**ति सम्बोधनं मन्त्रणं गुप्ततयैव कर्तव्यमिति ज्ञापनार्थं, अश्लीलव्यावृत्त्यर्थं **गिरी**पदं, **श्वफ**ल्को महानुभाव इति तन्नाम्ना निर्दिष्टस्तथात्वाय, अन्यथा अनिष्टरूपो नागच्छेत् ॥२४॥

व्याख्यार्थः—इस प्रकार मार्ग में रथ को ठहराकर अक्रूरजी सायङ्काल तक अनेक मनोरथ ही करते रहे; तो भी भगवान् के सन्मुख होनेवाले भक्त के जड़ चेतन सारे ही अनुकूल हो जाते हैं । इसलिए रथ ने ही उनको गोकुल पहुँचा दिया–यह 'इति सञ्चिन्तयन्' इस श्लोक से कहते हैं । महाभाग वे श्वफल्क पुत्र अक्रूरजी ने जब भगवान् को ध्यान से हृदय में प्राप्त किया, तब रथ उन्हें गोकुल ले गया । भगवान् स्त्रियों के लिए ही आनन्द रूप हैं । इसलिए सन्ध्या समय रात्रि में ही रथ गोकुल पहूंचा । यह पहले कहा जा चुका है कि भगवान् के अभिमुख होनेवाले के सभी अनुकूल हो जाते हैं । इसलिए सब प्रकार से अनुकूल हुए सूर्यदेव भी भक्तों के मनोरथ की सिद्धि के लिए अस्त हो गए । मूल में 'नृप' सम्बोधन-मन्त्रणा गुप्त रीति से करना चाहिए—इसका सूचक है । और अस्तगिरि-यहां अस्त शब्द की अमङ्गलता रूप अश्लील दोष को मिटाने के लिए गिरि शब्द का साथ में प्रयोग किया है । अक्रूरजी के पिता श्वफल्कजी परम महानुभाव हैं । उनके नाम से अक्रूरजी का निर्देश करने का तात्पर्य यह है कि अक्रूरजी भी पिता के समान ही महानुभाव हैं । यदि महानुभाव नहीं होते तो अनिष्ट रूप-शत्रु के सेवक और तदन्नपोषित रूप से वे भगवान् के सम्मुख नहीं जाते ॥२४॥

लेखः—'इति सञ्चिन्तयन्' इस श्लोक की व्याख्या में भगवान् आनन्दरूपः-पदों का अभिप्राय यह है कि भगवान् गोपों के साथ गोचारण से परिश्रान्त होकर रात्रि में घर पर आते हैं । और वहां यशोदा आदि तथा गोपी आदि स्त्रियों के ही उन उनके योग्य आनन्द विलासों के द्वारा उनके लिए आनन्द निरूपक होते हैं । इसलिए सन्ध्या तक रात्रि में ही जाना चाहिए—इस प्रकार के मनोरथ की सिद्धि के लिए सायङ्काल होने की प्रतीक्षा से रथ को बाहर ही रोक कर ठहरे रहे ॥२४॥

श्लोकः—पदानि तस्याखिललोकपालकिरीटजुष्टामलपादरेणोः ।
ददर्श गोष्ठे क्षितिकौतुकानि विलक्षितान्यब्जयवाङ्कुशाद्यैः ॥२५॥

श्लोकार्थः—जिनके चरणों की रज को बड़े बड़े लोकपाल सादर शीश पर चढाते हैं, उन **श्रीकृष्ण** के परम पवित्र, पृथिवी को विभूषित करनेवाले चरणों के चिन्हों को अक्रूरजी ने **पद्म, यव,** अङ्कुश आदि अपूर्व रेखाओं से पहचान लिया ।।२५।।

सुबोधिनीः—अत्र मध्ये तस्य भक्त्यतिशयार्थं कायिकोपि व्यापारो वक्तव्य इति लोक-प्रसिध्यर्थं च निरूपयति **पदानिति** त्रिभिः, हेतुक्रियाफल-निरूपकैः, यो भगवान् हृदये फलत्वेन भाव्यते तस्य **पदानि** भूमावुद्गतानि भगवदीयशरीर सम्पादकरजोयुक्तानि दृष्टवान्, तद्रजो ग्राह्यमिति वक्तुं तस्य रजसः ब्रह्मत्वाद्यपेक्षयापि महत्त्वमाह **अखिललोकपालकिरीटजुष्टामलपादरेणोरिति**, **अखिलाः** सर्वे **लोकपालाः** सर्वेषामैश्वर्यं भगवदधीनमेवेति निरूपयितुं देवदैत्यादयः सर्व एव परिगृहीताः, **लोकपाला** इति स्वरूपतोपि महत्त्वं महतां सेव्य एव महान् भवतीति, **किरीटजुष्टत्वेन** धर्मार्थं तेषां प्रवृत्तिर्निवारिता, धमार्थं यो नमस्करोति स देहेनैव नमस्करोति, सर्वाभरणभूषितस्तु ईश्वरमेव नमस्करोतीति, मार्गरजोपि गच्छतां मुकुटसम्बन्धि भवति तद्व्यावृत्त्यर्थं रजसो विशेषण-**ममलमिति**, एतादृशश्चरणरेणुर्यस्येति भगवत्सम्बन्धादेव तस्य माहात्म्य न तु मृगमदवत् स्वरूपतो रेणुमहान्, तादृशस्य **पदानि ददर्श** इति निधानप्राप्तिरिव सूचिता, ननु कथं ज्ञातवानेतानि भगवत्पदानीति तत्राह **विलक्षितानीति**, सुख-सेव्यत्वाय फलदानाय च।**अब्जे**रेखा, कीर्तिप्रकटनार्थं **यवा**कृतिः, मनोगजनिवारणार्थमङ्कुशरेखा, आदि-शब्देन ध्वजादयोपि, ननु भगवानेवं दुर्लभानि किमिति प्रकटितवानित्यत आह **क्षितिकौतुकानीति**, क्षितौ कौतुकरूपाणि, **भूमौ** रसप्रकटनार्थं कौतुकत्वेन प्रकटितवान्, भूमिष्ठानां भजन-सिद्ध्यर्थं यत्राल्पस्थानेपि महाफलान्येवं प्रयच्छतीति ।।२५।

व्याख्यार्थः—यहां मध्य में अक्रूरजी की भगवद्भक्ति की उत्कृष्टता तथा लोक प्रसिद्धि के लिए उनका कायिक व्यापार का निरूपण भी आवश्यक है। इसलिए हेतु क्रिया और फल का निरूपण करनेवाले पदानि इत्यादि तीन श्लोकों से अक्रूरजी के देह सम्बन्धी व्यापार का वर्णन करते हैं। जिन भगवान् की भावना वे हृदय में फल रूप कर रहे थे, भक्तों के शरीरों को भगवदीय बना देनेवाली धूल में दिखाई देनेवाले उनके चरणों को देखा। उस रेणु को-भगवान् के द्वारा ही महान् ऐश्वर्य और उन्नत पद प्राप्त किए हुए बड़े २ देव तथा दैत्य आदि लोकपाल-अपने किरीट मुकुटादि सभी आभूषणों से सुशोभित मस्तकों पर धारण करते हैं, वह रज ग्रहण करने योग्य ही है।

वे देव दैत्य आदि लोक पाल उस रज को धर्म बुद्धि से शीश पर नहीं चढ़ाते हैं, क्योंकि धर्म-बुद्धि वाला तो शरीर से ही नमस्कार करता है। सम्पूर्ण आभूषणों से भूषित हुआ तो ईश्वर को ही नमस्कार करता है, धूलि को नहीं। यह वह रास्ते की धूलि नहीं है, जो मार्ग में चलनेवाले लोगों के किरीटों पर-पैरों के आघात से उड़कर जा लगती है। यह तो परम पवित्र (पावन) रज है। भगवान् के चरणों के सम्बन्ध से ही इस धूलि की महिमा है। कस्तुरी की तरह इस केवल रज का स्वरूप से कोई महत्व नहीं है। उनके चरणों (चिन्हों) को अक्रूरजी ने ऐसे देखा मानों उन्हें कोई निधि मिल गई हो।

भगवान् के उन चरणों को अक्रूरजी ने पद्म, यव, अङ्कुश आदि असाधारण रेखाओं से पहचान लिया। भगवान् की सेवा आसानी से की जा सकती है और फल देनेवाले हैं। यह चरण में

कमलाकर रेखा से सूचित होता है, जौ की रेखा कीर्ति को प्रकट करती है। वन रूपी मदोन्मत्त हाथी को वश में करने के लिए अङ्कुश की रेखा है। इसी प्रकार ध्वजा आदि की रेखाएं भी प्रभु के चरणों में हैं। ऐसे अपने दुर्लभ चरणों को भगवान् ने पृथिवी पर रस को प्रकट करने-क्षिति कौतुक-के लिए और यहां रहनेवाले जीवों के हृदयों में भक्ति की सिद्धि के लिए प्रकट किया है। जो यहां थोड़े से रजरूप स्थान में स्थित रहकर भी बड़े से बड़े फलों को देने वाला है ॥२५॥

लेख:—पदानि-इत्यादि श्लोक की व्याख्या में-निधान प्राप्तिः-पद का अभिप्राय यह है कि जैसे पृथिवी पर चरण धरे, वैसे मुझ-अक्रूर- पर भी स्थापन करेंगे ॥२५॥

श्लोक—**तद्दर्शनाह्लादविवृद्धसम्भ्रमः प्रेम्णोर्ध्वरोमाश्रुकलाकुलेक्षणः ।**
रथादवस्कन्द्य स तेष्वचेष्टत प्रभोरमून्यङ्घ्रिरजांस्यहो इति ॥२६॥

श्लोकार्थः—उन चरण चिन्हों को देखते ही दर्शन के आनन्द की उमड़ से अक्रूरजी रथ से उतर पड़े और झपटकर—"अहो' ये मेरे प्रभु के चरणों की रज है"—यह कहते हुए उसी भक्ति से गद्गद् होकर उसी स्थान पर लौटने लगे। प्रेम के प्रभाव से अक्रूरजी के शरीर में रोमाञ्च हो आए और आखों में आनन्द के आंसू भर आए ।२६।

सुबोधिनी:—भक्तस्य दर्शने यदुचितं तत् कृतवानित्याह **तद्दर्शने**ति, भगवदीयशरीरजनकास्ते रेणवः, तेषां दर्शने पूर्वस्थितदेहादीनां निवृत्तिर्वक्तव्या, तत्र भक्तिरसस्तस्मिन् निविष्टः स्वधर्मप्राकट्येन तद्धर्मान् दूरीकृतवान्, तदाह तेषाँ पदानां **दर्श**नेन यो जातो महाह्लादः तेन **विवृद्धः सम्भ्र**मो यस्य, मानसो धर्मो व्याकुलता निरूपिता, **प्रेम्णा ऊर्ध्वानि रोमाणि** यस्य, दैहिको धर्मो निरूपितः, **अश्रुकलाभिराकुले ईक्षणे** यस्येतीन्द्रियधर्मा निरूपिताः, ततः पूर्वधर्माणां गतत्वात् संघातस्तेषु पतित इत्याह **रथादवस्कन्द्ये**ति, **अवस्कन्दन**मचेतनानां, तथा स पतित इत्यर्थः, ततो रजःप्रभावत् **सः** प्रसिद्धः अक्रूरो जातः, अन्तर्देहो भगवदीयो जातः, बहिर्देहस्यापि तथात्वाय **तेषु** रेणुषु **अचेष्टत** लुठनं कृतवान्, बहिस्तथा सवेदनाभावात् चेष्टामात्रमाह, ननु लुठने को हेतुर्वारंवारं तत्राह तद्गतमभिप्रायं **प्रभो**रिति, एतावत्कालं शास्त्रार्थत्वेन ईश्वरत्वेन महत्त्वेन सम्बन्धित्वेन वा ज्ञातवान्, इदानीं शुद्धः स्वयं सेवको जातः, भगवांश्च प्रभुः, तथा सति तस्य परमदुर्लभा**न्यङ्घ्रिरजांसि** कथमेवं **भू**मौ स्थातुमुचितानि भवन्तीति स्वशरीरे तानि सर्वाण्येव योजयितुं यावत् तानि रजांसि सर्वाणि प्रविशन्ति तावत् लुठनं कृतवान् किञ्च, आश्चर्यरसाविष्टोपि जातः, **अहो** इति, महात्म्यमनेन सूचितम् ॥२६॥

व्याख्यार्थः—भगवान् के चरणों का दर्शन होने पर भक्त की जैसी दशा होनी चाहिए, अक्रूरजी की वैसी ही स्थिति का वर्णन-इस 'तद्दर्शनाह्लाद' श्लोक से करते हैं। शरीर को भगवदीय बना देनेवाली उस रेणु के दर्शन होते ही शरीर की पूर्व स्थिति-लौकिकता-दूर होकर उनमें भक्ति रस प्रविष्ट हो जाता है। उस भक्ति रस ने अक्रूर की देहादि में अपने-भक्ति रस के धर्मों को प्रकट करके प्राकृत देह के धर्मों को दूर कर दिए। यह ही बतलाते हैं कि उन श्री चरणों के दर्शन से उत्पन्न हुए परम आह्लाद से उत्कण्ठा रूप मानसिक धर्म बढ़ गया, प्रेम से रोमाञ्चित रूप दैहिक धर्म तथा नेत्रों

मुद्रक—गीताप्रेस, गोरखपुर

अक्रूरका प्रेम

का अश्रुकलाओं से भर आना रूप इन्द्रिय धर्म के निरूपण से मन देह इन्द्रियों के पहले धर्म दूर होकर नूतन-उत्कण्ठा वृद्धि, रोमाञ्च और प्रेमाश्रु रूप धर्म प्रकट हो गए।

तब तो वे अचेतन से हो रथ से पृथिवी पर गिर पड़े और भगवच्चरण रज के प्रभाव से वे प्रसिद्ध अक्रूर बन गए। उनका वासनात्मक आभ्यन्तर शरीर भगवदीय बन गया और अपने बाह्य शरीर को भी भगवदीय करने के लिए वे श्री हरि के उस चरण रज में बार-बार लौटने लगे। उन्हें बाह्य देहानुसन्धान नहीं रहा, केवल चेष्टा मात्र करते रहे। अब तक तो वे भगवान् को शास्त्रार्थ रूप से ईश्वर, महा पुरुष अथवा अपना सम्बन्धी बान्धव ही जान रहे थे; किन्तु अब वे अपने को शुद्ध सेवक और श्रीकृष्ण को अपना स्वामी मानने लगे। इस स्वामी सेवक भाव के उदय होने पर वे सोचने लगे कि यह परम दुर्लभ चरण रज यों पृथिवी पर ही क्यों पड़ी रहे ? उनके मन में यह भावोदय हुआ कि यह सारी धूलि मेरे शरीर में प्रविष्ट हो (समा जाय) इसीलिए वे उनमें तब तक लौटते ही रहे, जब तक वह सारी रज उनके शरीर में प्रविष्ट नहीं हो गई। वे चरण रज का माहात्म्य जानकर आश्चर्य रस में मग्न भी हो गए ॥२६।

श्लोक—देहं भृतामियानर्थो हित्वा दम्भं भियं शुचम्।
सन्देशाद् यो हरेर्लिङ्गदर्शनश्रवणादिभिः ॥२७॥

श्लोकार्थः—प्राणियों के देह धारण करने की सफलता इसी में है कि वे छल, भय, शोक आदि को छोड़कर अक्रूरजी की तरह स्वाभाविक निष्काम भक्ति से आनन्द पूर्वक-संदेश, दर्शन, श्रवण आदि के द्वारा श्रीहरि का भजन और सेवा करे ॥२७॥

सुबोधिनीः—एवं तस्य कृतमुक्त्वा फलमाह **देहं भृतामिति,** यदस्य जात **इयानेव देहं भृतामर्थः** पुरुषार्थः जन्मसाफल्यम्, **उत्पन्नेन हि परमः पुरुषार्थः साधनीयः स च भगवदीयभावः, तथा यत्नः कर्तव्यः यथा स भवति, ज्ञानादिस्तु अवान्तरफलरूपः, मोक्षादपि स्वभावत एवायं भावोधिकः,** तदुपपादित 'भगवदीयत्वेने'त्यत्र, अत **इयानेव** पुरुषार्थ इति युक्तमिति **हि**-शब्दः, देहसङ्ग्रहणं क्लेशात्मकं तदपि कृत्वा यदि परमपुरुषार्थं न साधयेत् तदा वैयर्थ्यमिति, स कोर्थ इत्याकाङ्क्षायामाह **सन्देशादिति,** सन्देशमारभ्य **हरेर्लिङ्गश्रवणदर्शनादिभिर्योर्थो** जातः, अयमेवार्थः सन्देशानन्तरमेव तस्य चित्तं भगवत्परं जातं तद्वर्धमानं भगवदीयत्वं च सम्पाद्य माहात्म्यज्ञानं कारितवत्, **लिङ्गानां** चिह्नानां भगवत्पदानां प्रथमतो **दर्शनं,** ततः स्पर्शनं ततस्तत्सायुज्यमिति, ततो भगवदीयत्वं माहात्म्यज्ञानं च, सर्वे च भगवदीया धर्मा **संदेशादिति** हेतोर्वा, अन्यार्थमपि प्रयुक्तं वाक्यं एतावत्फलं साधयतीति अल्पप्रसङ्गेनाप्येतावत्त्वं महाफलमित्यर्थः, परं तत्र दोषत्रयं परित्यज्येतत् कर्तव्यमित्याह **हित्वेति, दम्भो** राजसः, **भयं** सात्त्विकं, शोकस्तामसः, **दम्भो** बाह्यः, **भयं** शारीरम्, शोकोन्तःकरणस्य, एतत् सर्वथा त्यक्तव्यम्, अनेनापि त्यक्तमिति, **दम्भं** कापट्यं त्यक्तवान्, यथा कंसेनोक्तं भयं च त्यक्तवान्, भगवान् किं करिष्यतीति, शोकं च त्यक्तवान्, भगवति तत्र गते कंसः किं करिष्यतीति, भयानन्तरं चैतद्भवतीत्युक्तम्, भगवतो माहात्म्यज्ञानाभावे शोको भवति नान्यथा, एवमन्यैरपि लौकिका अलौकिकाश्चैते भावाः त्यक्तव्याः, **अन्यथा** एतावत्त्वं न भवेदिति ॥२७॥

व्याख्यार्थः—इस प्रकार अक्रूरजी का भगवान् के चरण चिन्हों से चिन्हित रेणु में लौटने का वर्णन करके इस-देहंभृतां-श्लोक से ऐसा करने के फल को वर्णन करते हैं, जो अक्रूरजी को हुआ। बस देहधारियों का यही पुरुषार्थ-जन्म की सफलता-है। देहधारी को उत्पन्न होकर जन्म ग्रहण करके परम पुरुषार्थ प्राप्त करना चाहिए। वह भगवदीय भाव ही परम पुरुषार्थ है। इसलिए भगवदीय भाव की सिद्धि के लिए तदनुकूल-वैसा ही-प्रयत्न करना ही चाहिए, जिससे उस भाव की सिद्धि हो सके। ज्ञानादि की प्राप्ति तो गौण फल है। मोक्ष की अपेक्षा भी-मोक्ष से भी-भगवदीय भाव-भगदीय-त्वेनैव परिसमाप्त सर्वार्थाः—के अनुसार उत्तम है। इसलिए इसी में जन्म की सफलता है, केवल यही पुरुषार्थ की सिद्धि है। क्लेशमय देह को प्राप्त करके यदि परम-पुरुषार्थ का लाभ नहीं किया तो जन्मग्रहण व्यर्थ ही है।

अक्रूरजी को भगवदीय भाव की प्राप्ति में सन्देश ही कारण है; क्योंकि सन्देश लेकर जाने के बाद ही उनका चित्त भगवत्परायण हुआ और बढ़ते बढ़ते उसने आगे भगवदीय भाव को उत्पन्न करके भगवान् के माहात्म्य का ज्ञान करा दिया। अर्थात् प्रथम भगवान् के चरणों का दर्शन फिर उनके स्पर्श से सायुज्यप्राप्ति और उस स्पर्श से भगवदीय भाव तथा माहात्म्य ज्ञान इस क्रम से ये सब सन्देश के कारण हुए। किसी अन्य के लिए भेजा गया वाक्य भी इतना फल सिद्ध कर देता है। अर्थात् सहज में ही बड़ा भारी फल देनेवाला हो जाता है।

परन्तु मनुष्य को इस भगवदीय भाव रूप परम फल की प्राप्ति में बाधक दोषों-दम्भ, भय, शोक-का सर्वथा त्यागकर देना चाहिए। इनमें दम्भ राजस तथा बाह्यदोष है, भय सात्त्विक तथा शरीर सम्बन्धी और शोक तामस तथा अन्तःकरण का दोष है। अक्रूरजी को भी इन तीनों दोषों का त्याग करने पर ही भगवदीय भावरूप परम पुरुषार्थ सिद्ध हुआ था। उन्होंने कंस के वाक्य को यथावत् कहकर दम्भ (कपट) को सुनकर भगवान् मेरे साथ क्या करेंगे? ऐसे भय का और भगवान् को लेकर मथुरा जाऊंगा तब कंस क्या करेगा? इस प्रकार के शोक को भी त्याग दिया था; माहात्म्य ज्ञान न होने तक ही शोक रह सकता है; माहात्म्य ज्ञान हो जाने पर शोकादि कुछ नहीं रहते। इसी तरह परम पुरुषार्थ को पाने के लिए औरों को भी लौकिक तथा अलौकिक ये सारे ही दोष छोड़ ही देने चाहिए ॥२७॥

श्लोकः—**ददर्श कृष्णं रामं च व्रजे गोदोहनं गतौ ।**
पीतनीलाम्बरधरौ शरदम्बुरुहेक्षणौ ॥२८॥

श्लोकार्थः—व्रज में पहुंचकर अक्रूरजी ने पीताम्बर तथा नीलाम्बर पहने हुए कृष्ण बलदेव को गोदोहनार्थ खिरक-गोशाला-में विराजमान देखा। उनके नेत्र शरत्काल के कमल के समान शुशोभित हैं ॥२८॥

सुबोधिनीः—ततो योग्यशरीरं प्राप्य भगवन्तं दृष्टवानित्याह **ददर्शे**ति, यादृशः सेवकः तादृशं वर्णयित्वा यादृशो भगवान् तादृशं वर्णयति षड्भिः, स्वरूपं च वयश्चैव देहेन्द्रियविचेष्टितम्। शोभास्वरूपं च तथा शोभा तस्याप्यलौकिकी ॥१॥ तत्र प्रथमं परिदृश्यमानं स्वरूपं

वर्णयति, भक्तत्वात् प्रथमं **कृष्णं ददर्श** ततो **राममावेशिन**, **चकारादाविष्टं**, **व्रजे** अधिकरणे तत्रापि **गोदोहनं गतौ** गोदोहनस्थाने स्थितौ गावो दुह्यन्ते अस्मिन्निति, देशमुक्त्वा आवरणमाह **पीतनीलाम्बरधराविति**, भगवान् पीताम्बरधरः रामो नीलाम्बरधर इति, तादृशमेव वस्त्रद्वयं द्वयं परिधृतमस्तीति ज्ञापयितुं **अम्बरधरावित्युक्तम्**, **शरत्काले** ये **अम्बुरुहे** सम्यक् जाते **तद्वदीक्षणे** ययोः, अनेन गुणा उक्ताः, देशकालयोः स्वाभाविकयोः विपरीतत्वेपि तत् समीचीनं विधाय ज्ञानादिसर्वपुरुषार्थान् प्रयच्छतीति तथोक्तम् ।२८।

व्याख्यार्थः—अक्रूरजी ने भगवद्दर्शन के योग्य उत्तम शरीर हो जाने पर भगवान् के दर्शन किए। यह 'ददर्श' इस श्लोक से कहते है। इस प्रकार सेवक के स्वरूप को कहकर अगले छ श्लोकों से भगवान् के स्वरूप का-जिसका अक्रूर को दर्शन हुआ—वर्णन करेंगे। पहले उनके दृश्यमान स्वरूप का वर्णन करते है। आगे के पांच श्लोकों से अवस्था, देह इन्द्रिय की चेष्टा, शोभास्वरूप तथा उनकी अलौकिक शोभा का वर्णन किया जायगा। अक्रूरजी भक्त थे, इसलिए पहले उन्हें श्रीकृष्ण के दर्शन हुए। तदनन्तर आवेशावतार बलदेवजी को देखा। वे दोनों भाई व्रज में और व्रज में भी गोदोहन-जहां गायें दोही जाती है—खिरक-स्थान में विराजमान हुए देखे। श्रीकृष्णजी पीताम्बर और बलदेवजी नीला धौत वस्त्र धारण किए हुए थे। उनके नेत्रों ने शरत्काल के कमलों की शोभा को हर लियाथा। दोनों भाईयों के नेत्र शरद् ऋतु के कमलों से सुशोभित थे। तात्पर्य यह है कि वे भगवान् देश काल के विपरीत होने पर भी ज्ञानेन्द्रियादि को अनुकूल शक्ति प्रदान करके ज्ञान आदि सकल पुरुषार्थ को दे देते हैं; क्योंकि कमल शरद् ऋतु में तथा जल में ही सुशोभित रहते हैं; किन्तु यहां भाद्रपद मास में काल की विपरीतता और नेत्र कमल में देश-जल-भी-विपरीत है। तथापि भगवान् ने नेत्र कमल को सुशोभित ही कर दिया ॥२८॥

श्लोकः—**किशोरौ श्यामलश्वेतौ श्रीनिकेतौ बृहद्भुजौ ।**
सुमुखौ सुन्दरवरौ बालद्विरदविक्रमौ ॥२९॥

श्लोकार्थः—उनकी किशोर अवस्था है, श्याम और श्वेत वर्ण है, बड़ी बड़ी विशाल भुजाए हैं। दोनों भाई लक्ष्मी के निवास स्थान और त्रिभुवन सुन्दर हैं। उनका विक्रम विचित्र बाल गजराज से भी अधिक है और अत्यन्त मनोहर मुखारविन्द है ॥ २९ ॥

सुबोधिनीः—वयमाह **किशोराविति**, कैशोरे वयसि विद्यमानौ, एकादशवार्षिकौ, नववर्षोर्दूर्ध्वं षोडशवर्षपर्यन्तं किशोरावस्था, गोकुलवासिषु विद्यमानः कालः स्वस्मिन् गृहीत इति तं प्रकटयितुं तथावस्थो जातः, अग्रे प्रयोजनाभावात् कालावस्थां न वक्ष्यति, अत एव ध्याने भक्तकृपया तामवस्थां गृह्णातीति 'सन्तं वयसि कैशोर' इत्युक्तम्, एकः **श्यामलः** अपरः **श्वेतः**, कैशोरे वयसि रूपमभिव्यक्तं भवतीति वयःकार्यत्वेन रूपमुक्तम्, **श्रीनिकेतौ** श्रीवत्साङ्कितौ, असाधारणं भगवच्चिह्नमेतत्, भगवत्त्वज्ञापकं तदपि तदैव प्रकटमिति, भगवतो महती क्रियाशक्तिरिति **बृहद्भुजावित्युक्तम्**, अव्यग्रत्वाय **सुमुखाविति**, भक्तदर्शनावस्थायां सुमुखत्वे तस्य सर्वपुरुषार्थाः सिध्यन्तीति, **सुन्दरवराविति**, सुन्दरश्रेष्ठौ, यत्राकृतिस्तत्र गुणा वसन्तीति सर्वगुणनिधानावित्यर्थः, **बालो** यो **द्विरदः** हस्ती तद्वद्विक्रमो ययोरिति अमानुषपराक्रमौ निरूपितौ,

व्याख्यार्थः—'किशोरौ' इस श्लोक से उनके अवस्था आदि स्वरूप का वर्णन करते हैं। नव वर्ष से आगे की और (षोडश) सोलह वर्ष तक की किशोर अवस्था है। वे दोनों ग्यारह वर्ष के हैं। गोकुल वासियों में रहे हुए काल को उन्होंने अपने में ले लिया था, उसे प्रकट करने के लिए भगवान् ग्यारह के हो रहे हैं। इसके आगे प्रयोजन के न होने के कारण अवस्था काल का वर्णन नहीं किया जायगा। भक्तों पर कृपा करके श्री प्रभु-सन्त वयसि कैशोरे-किशोर अवस्था को अङ्गीकार करते हैं। इसी अवस्था में रूप प्रकट होता है। इसलिए एक श्याम है और एक श्वेत है। भगवान् का असाधारण चिन्ह श्रीवत्स - जो वस्त्र से ढका नहीं था, उसी समय प्रकट हुआ था—से सुशोभित हैं। उनकी विशाल भुजाएं उनकी क्रियाशक्ति को प्रकट कर रही हैं। दोनों का मुखारविन्द परम सुन्दर और सुशान्त है, जिसका दर्शन करते ही भक्तों के सब पुरुषार्थ सिद्ध हो जाते हैं।

'यत्राकृतिस्तत्र गुणा वसन्ति' सुन्दर आकार वालों में अत्याधिक गुण होते हैं - इस नियम से परम सुन्दर वे गुणों के निधि हैं और बाल गजराज के समान पराक्रमी अर्थात् मनुष्यों से अत्यधिक पराक्रम वाले हैं। आपश्री ने यहां व्याख्या में बाल गजराज की समानता द्योतक दो कारिकाएं दी है:—

कारिका:—**सौन्दर्यं च तथा पुष्टिः प्रदृश्यत्वमसृण्यता।**
निर्भयत्व स्वतः सिद्धसाधनत्व च रूप्यते ॥१॥
अरण्य एव तद्वृद्धिः सुखं तस्य गृहं पुनः।
नान्यत्रेति च बोधाय विदेशक्लेशबाधने ॥२॥

कारिकार्थः—सुन्दरता, स्वानन्दतुन्दिलता, मनोहरता, निरङ्कुशता, निर्भयता, परमुखापेक्षा का अभाव, वन में ही बढना और सुखदायक वन ही घर, ये सारी वस्तुएं अन्यत्र उपलब्ध नहीं होती हैं। उनका यहां वर्णन भगवान् को गोकुल रूप विदेश में विराजने से उत्पन्न हुए विदेश क्लेश की निवृत्ति के लिए किया गया है। **१-२**

सुबोधिनी:—तद्वत् पराक्रम इति कौतुकार्थं सर्वानेव गोपालान् दूरादेव प्रक्षिपतीति निरूपितम् ॥२९॥

व्याख्यार्थः—ऐसे बाल गजराज के समान पराक्रमी वे दोनों भाई सारे गोप ग्वालों को अपने पास नहीं फटकने देते हैं ऐसा निरूपण किया गया है ॥२९॥

श्लोकः—**ध्वजवज्राङ्कुशाम्भोजैश्चिह्नितैरङ्घ्रिभिर्व्रजम्।**
शोभयन्तौ महात्मानौ सानुक्रोशस्मितेक्षणौ ॥३०॥

श्लोकार्थः—महापुरुष वे दोनों भाई ध्वजा, वज्र, अंकुश आदि चिन्हों से माहात्म्य प्रकट करनेवाले चरणों के चिन्हों से व्रज को सुशोभित कर रहे हैं। उनकी दृष्टि से अनुग्रह और मुसकान से प्रसन्नता प्रकट हो रही है ॥३०॥

सुबोधिनी:—भगवतो धर्मान् निरूपयन् बाह्यानि निरूपयति ध्वजवज्रेति, ध्वजादिभिश्चतुर्भिश्चिह्नैः पुरुषार्थचतुष्टयरूपैः **चिह्निता** ये **अङ्घ्रयः** तैर्भू मावुद्गतैः **व्रजं शोभयन्तौ** शोभायुक्तं कुर्वन्तौ, ये सर्वपुरुषार्थदातारः ते यत्र शोभाकरा जाताः भगवत्कृपया इतोऽधिक भगवान् व्रजस्य किं कुर्यात्, **महानात्मा** स्वरूप ययोः, अयं धर्मिनिर्देशः धर्माणामुत्कर्षख्यापक, तयोर्माहात्म्यमुक्त्वा कृपालुतामाह **सानुक्रोशस्मितेक्षणा**विति, दयापूर्वकं **स्मितपूर्वकमीक्षणं** ययोः, दीनेषु दया समेषु **स्मित**मुत्तमेषु ज्ञानमिति, संसारे क्लिष्टेषु दया, ततः कर्मणा परित्यागेन वा क्लिष्टेषु अल्पमोहनेन सुखदानम्, ततो भक्तेषु ज्ञानस्थापनमिति पर्यवसानतया दयया सुखदानं प्रत्यक्षत एव स्मितेनैव परमानन्दज्ञानमिति ।३०।

व्याख्यार्थः--भगवान् धर्मों को कहकर अब उनके बाह्य चिन्हों का वर्णन 'ध्वजवज्राङ्कुश' इस श्लोक से करते हैं। चारों पुरुषार्थों के देनेवाले ध्वज, वज्र, अङ्कुश, अम्भोज इन चारों चिन्हों से चिन्हित तथा पृथिवी पर दिखाई देनेवाले वे उनके चरणारविन्द उन्हीं (भगवान्) की कृपा से व्रज की शोभा बढ़ा रहे हैं। भगवान् व्रज का इससे बढ़कर और क्या हित करते। उनका स्वरूप परम महान् है। यह धर्मी-भगवान्-का निर्देश उनके धर्मों के उत्कर्ष का बोधक है।

इस प्रकार उनकी महिमा का वर्णन किया गया। अब आगे उनकी दयालुता का वर्णन करते हैं। उनकी चितवन-अवलोकन-दया और मन्दमुसकान से युक्त है। दीनों पर दया, समानों पर मन्द हास और उत्तमों पर ज्ञानवर्षण करने वाली चितवन है। संसार में दुखियों पर ही दया की जाती है, फिर कर्म से अथवा कर्म का परित्याग करके थोड़े से जगत् में मोह के कारण उन दुखियों को सुख देना, उस सुखदान के द्वारा भक्त जीवों पर माहात्म्य ज्ञान को स्थित करना, इस प्रकार वे प्रत्यक्षरूप से दया के द्वारा ही सुख प्राप्ति और मन्दस्मित के द्वारा ही भक्तों को परमानन्द का ज्ञान का दान कर रहे हैं ।।३०।।

श्लोकः—**उदाररुचिरक्रीडौ स्रग्विणौ वनमालिनौ ।**
पुण्यगन्धानुलिप्ताङ्गौ स्नातौ विरजवाससौ ।।३१।।

श्लोकार्थः—उनकी क्रीडाएं उदार और मनमोहक हैं। वे कण्ठ में मणियों की माला और वनमाला पहने, अङ्गों में चन्दनादि अंगराग लगाए और स्नानान्तर निर्मल नवीन वस्त्रों से सुशोभित हैं ।।३१।।

सुबोधिनी:—ततो लीलामाह **उदारी**ति, **उदारा रुचिरा क्रीडा** ययोः, भगवल्लीला पात्रापात्रविचारव्यतिरेकेण सर्वेभ्य एव सर्वपुरुषार्थान् प्रयच्छतीति **उदारा रुचिरा** मनोहरा च, स्वतः फलरूपा क्रीडेति सामान्यापि लीला आभासरूपा लीला न भवतीति, भगवन्तं वर्णयति **स्रग्विणा**विति, शिरसि कण्ठे नानाविधाः स्रजो ययोः, **वनमालायुक्तौ** च, 'आपादावलम्बिनी माला वनमाले'ति, आगन्तुकैः सहजनिवृत्तिं मत्वा वनमाला पृथग् निरूपिता, विरतिवेलेति चन्दनपुष्पवस्त्राभरणान्येवोक्तानि, विरत्यनोदनत्वाद् वा, **पुण्ये न गन्धेन अनुलिप्तान्यङ्गानि** ययोः, एते अभिलेपा एव **पुण्यगन्धाः** स्नानाङ्गभूताः, ततः **स्नातौ**, ततो नूतननिर्मलवस्त्रपरिधानमिति **विरजवाससौ** ।३१।

व्याख्यार्थः—अब 'उदाररुचिरक्रीडौ' इस श्लोक से उनकी लीला का वर्णन करते हैं। भगवान् की लीला बड़ी उदार और मनोहर है। वह पात्रता अपात्रता-योग्यता अयोग्यता-का विचार न करके सबको ही सारे पुरुषार्थ दे देती है। भगवान् की साधारण से साधारण लीला भी जिसे लोग समझते हैं—फलरूपा है, वह आभासरूप-मिथ्या-नहीं है।

भगवान् के स्वरूप का वर्णन करते हैं। श्रीहरि ने श्रीकण्ठ में और श्रीमस्तक पर अनेक प्रकार की मालाएं तथा श्रीमस्तक से चरणारविन्द तक लम्बी विविध सुगन्धित पुष्पों की बनी हुई सुन्दर वनमाला "आपादावलम्बिनी माला वनमाला" धारण कर रक्खी है। यहां हीरा, पन्ना, मोतियों की मालाओं पर भ्रमर सहज सुगन्ध न होने से नहीं आते। इसीलिए भौंरों से गुञ्जारित वनमाला का नाम अलग कहा गया है। सायङ्काल विश्राम करने का समय होने से अथवा विश्राम (विराम) का सहायक होने के कारण चन्दन, पुष्प, वस्त्र और आभूषणों का ही यहां वर्णन किया गया है। स्नान से पहले नाना सुगन्धित और उत्तमोत्तम पदार्थों से-जो स्नान के अङ्गभूत हैं–अभिलेप-उबटना करने के बाद स्नान करके अनुलिप्त नवीन निर्मल वस्त्रों से शुभोभित है ।।३१।।

लेख:—उदाररुचिरक्रीडौ-इस श्लोक की व्याख्या में 'विरत्यनोदनत्वाद्वा' ऐसे पाठ के स्थान में लेख में 'वित्त्यनोदनत्वाद्वा' ऐसा पाठ करके यह अभिप्राय प्रदर्शित किया है कि ज्ञान के वर्धक-बढाने वाले-होने से यहां चन्दन पुष्पादि का ही वर्णन-श्रीअङ्ग की शोभार्थ-किया है, क्योंकि वस्त्र तथा आभूषणों के कारण श्रीअङ्ग के दर्शन ठीक ठीक नहीं होते और चन्दनादि के आभरण में तो ठीक ठीक दर्शन होते रहते हैं।

'अभिलेपा एव' इत्यादि का तात्पर्य यह है कि 'अभिलेप' स्नान के पूर्वाङ्गभूत-स्नान से पहिले और 'अनुलेप' स्नान के उत्तराङ्ग स्नान के पीछे होता है, क्योंकि मूल में 'अनुलिप्तौ' इस विशेषण के बाद 'स्नातौ' स्नान करना वर्णन किया है। अतः स्नान से पूर्व अभिलेप और स्नान कर लेने के बाद अनुलेप किया जाता है, यह ज्ञान होता है ।।३१।।

श्लोकः—**प्रधानपुरुषावाद्यो जगद्धेतू जगत्पती ।**
अवतीर्णौ जगत्यर्थे स्वांशेन बलकेशवौ ।।३२।।

श्लोकार्थ:—अक्रूरजी ने उन श्रीकृष्ण और बलराम दोनों भाईयों के प्रधान पुरुष, आदि पुरुष, जगत् के कारण और जगत् के ईश्वर तथा पृथिवी का भार उतारने के लिए नर रूप से प्रकट हुए के दर्शन किए ।।३२।।

सुबोधिनीः—कथमेवं गोकुलवासिनोर्महतौ पूजासम्भृतिरिति चेत् तत्राह, **प्रधानपुरुषा**विति, **प्रधानपुरुष**रूपावुभावपि, कार्यप्रधानपुरुषव्यावृत्त्यर्थमाह **आद्या**विति, तयोः प्रधानपुरुषत्वे हेतुमाह **जगद्धेतु** इति, य एव जगत्कारणं स एव प्रथम **प्रधानपुरुष**रूपो भवतीति **प्रधानपुरुष**त्वं मुख्यपुरुषत्वं वा, जगत्कारणत्वमपि साधयति **जगत्पती** इति, यो भर्ता स एव स्रष्टा उत्पत्तिस्थितिलयानामेककर्तृत्वात्, पालकत्वं तस्य सर्वजनीनं, अत एव साम्प्रतं रक्षामाशङ्क्य **जगत्यर्थे** भूम्यर्थ**मवतीर्णौ**, **स्वस्य** निजांशेन आनन्दांशेन, उभयोरागमने विशेषकार्यं नाम्नैव निरूपयति, **बलः** क्रियाशक्तिप्रधानः उत्पत्तिस्थितिलयकर्ता, **केशवो** मोक्षदाता ब्रह्मादीनामपि ।।३२।।

व्याख्यार्थः—गोकुल में निवास करनेवाले उन राम कृष्ण की इस प्रकार पूजातिशय का कारण 'प्रधान पुरुषौ' इस श्लोक से बतलाते हैं कि वे दोनों ही प्रधान पुरुष हैं। आज कल के प्रधानजी की तरह साधारण प्रधान पुरुष नहीं; किन्तु ये आदि पुरुष हैं। ये जगत् के कारण हैं। जगत् का कारण ही आदि प्रधान पुरुष होता है, इसीलिएये दोनों प्रधान पुरुष किंवा मुख्य पुरुष हैं। ये ही जगत् के स्वामी-भरण पोषण-करनेवाले हैं और जो भरण पोषण करनेवाले हैं, वही एक जगत् की उत्पत्ति, पालन और संहार करता है। भगवान् सबका पालन करते हैं, यह तो सब ही जानते हैं, किन्तु अभी भी ये पृथिवी का भार दूर करने के लिए ही अवतरित हुए हैं, दैत्यों की रक्षा के लिए नहीं। ये व्रज में प्रकट होकर अद्‌भुत चरित्र करेंगे, यह बात तो इनके नामों से हो रही है; क्योंकि क्रियाशक्ति प्रधान भगवान् बलरामजी उत्पत्ति, पालन और प्रलय कर्त्ता हैं और केशव भगवान् ब्रह्मादि देवों को मोक्ष देनेवाले हैं ॥३२॥

श्लोकः—**दिशो वितिमिरा राजन् कुर्वाणौ प्रभया स्वया।**
यथा मारकतः शैलो रौप्यश्च कनकाश्चितौ ॥३३॥

श्लोकार्थः—ये दोनों भाई कृष्ण बलदेव अपने तेज के प्रभाव से दिशाओं के अन्धकार को दूर कर रहे हैं और सुवर्ण विभूषित नीलम तथा चाँदी के पर्वत जैसे सुशोभित हो रहे हैं ॥३३॥

सुबोधिनी—तादृशस्यावतारे लोके अभिज्ञापकमाह **दिश** इति, दश **दिशः स्वया** असाधारण्या **प्रभया वितिमिराः कुर्वाणौ**, कान्तिरेव सूर्याधिका अलौकिकी न शीता न चोष्णा मर्त्तापनाशिका सर्वेषां सर्वानन्ददायिनी ब्रह्मत्वबोधिका भवति, **राजन्नि**त्यलौकिकवस्तुपरिज्ञानार्थम्, अभूतोपमामाह **यथा मारकतः शैल** इति, मरकतमणिनिर्मितः **शैलः** भगवान्, **रौप्यः** कैलासतुल्यो बलभद्रः, उभावपि **कनकशृङ्गाङ्कितौ** चेत् उपमां प्राप्नुतः सर्वत्र **भगवान्** धराधरत्वेन वर्ण्यते सर्वाश्रयत्वाय महत्त्वादिधर्मार्थं च ॥३३॥

व्याख्यार्थः—इस 'दिशो वितिमिरा' श्लोक से उन भगवान् के प्राकट्य की असाधारण सूचना का वर्णन करते हैं। वे दोनों अपनी लोकोत्तर दिव्य कान्ति से दशों दिशाओं के अन्धकार को दूर कर रहे हैं। उनकी उस सूर्य से भी अधिक अलौकिक कान्ति, जो न ठण्डी, न गरम है और सबके सन्ताप को दूर करके परम आनन्द देनेवाली है, से ही जाना जा रहा है कि ये साक्षात् परब्रह्म हैं। परीक्षित को अलौकिक वस्तु का ज्ञान कराने के लिए मूल में 'राजन्' सम्बोधन का प्रयोग है। उनका अभूत उपमा से वर्णन करते हैं। मरकत मणि का पर्वत भगवान् और कैलाश के समान चाँदी का पर्वत बलदेव, दोनों ही यदि सोने के शिखरों से युक्त हों तो उनकी सी शोभा को प्राप्त हों। भगवान् सबके आश्रय और परम महान् हैं। इसीलिए सभी जगह उनका शैल रूप से वर्णन किया जाता है ॥३३॥

श्लोकः—**रथात् तूर्णमवप्लुत्य सोक्रूरः स्नेहविह्वलः।**
पपात चरणोपान्ते दण्डवद् रामकृष्णयोः ॥३४॥

श्लोकार्थ:—उन राम कृष्ण को देखते ही अक्रूरजी जल्दी ही रथ से उतर पड़े और स्नेह से विह्वल हो उनके चरणों में उन्होंने गिरकर दण्डवत प्रणाम किया ।३४।

सुबोधिनी:—एवं भगवन्तं वर्णयित्वा तादृशे स्वामिनि तादृशसेवकस्य कर्तव्यपूर्वकं भगवत्कार्यमाह दशभिः, तत्र द्वाभ्यां तस्य कृत्यम्, **अष्टभि**र्भगवत्कृत्यमिति, भक्तिप्रपत्ती तस्य, अष्टैश्वर्यादिदानं भगवतः, **रथ** इति, आदौ दृष्ट्वा रथे स्थित एव **तूर्णमवप्लुत्य,** तत उच्चस्थानाद् भूमौ पतित्वा न तूत्तीर्य, **स** प्रसिद्धः पूर्वं चरणरजस्सु यः पतितः, साक्षाद्दर्शनानन्तरमप्युत्कटो यो जातः **स्नेहः** तेनापि **विह्वलः रामकृष्णयोश्चरणोपान्ते** निकट एव **पपात**, पाते देहादेरविचारार्थमाह **दण्डवदि**ति, अत्र ज्येष्ठानुक्रम उक्तः व्यवहारे वयसो मुख्यत्वख्यापनार्थः ।।३४।।

व्याख्यार्थ:—इस प्रकार से भगवान् का वर्णन करके उन ऐसे सर्वशक्तिमान् स्वामी के प्रति अक्रूर जैसे परम सेवक के कर्तव्य को बतलाते हुए आगे दश श्लोकों से सेवक के प्रति भगवान् के कर्तव्य को कहते हैं। इन दश श्लोकों में प्रथम दो श्लोकों से सेवक अक्रूर की भक्ति और शरणागति का तथा अगले आठ श्लोकों से अक्रूर के लिए भगवान् का आठ प्रकार का ऐश्वर्य प्रदान करने का वर्णन है। 'रथात्' इस श्लोक से कहते हैं कि अक्रूर ने रथ पर बैठे बैठे ही पहले दूर से ही दर्शन किए थे। अब वही अक्रूर-जो अभी पूर्व में भगवच्चरण रज में लौटे थे-ऊंचा स्थान-रथ से-उतरे नहीं, किन्तु उन भगवान् राम कृष्ण के चरणों के निकट ही भूमि पर गिर पड़े। भगवान् का साक्षात् दर्शन करके वे प्रेम से अत्यन्त विह्वल हो गए और देह की सुध भूल गए तथा काष्ठ दण्ड की तरह उनके चरणों में हठात् गिर पड़े। व्यवहार में आयु का विचार मुख्य रूप से रखना चाहिए, इसलिए वे पहले बलरामजी के और पीछे श्रीकृष्णजी के चरणों में गिरे ।।३४।।

श्लोक:—**भगवद्दर्शनाह्लादबाष्पपर्याकुलेक्षणः ।**
पुलकाश्चित औत्कण्ठयात् स्वाख्याने नाशकन् नृप ।।३५।।

श्लोकार्थ:—भगवान् के दर्शन से अक्रूरजी परम आनन्दित हो गए। उनकी आंखों में प्रेमाश्रु भर आए और उनका शरीर रोमाश्चित हो गया। उत्कण्ठा से उनका कण्ठ रुंध गया और थोड़ी देर तक तो वह अपना परिचय भी नहीं दे सके ।३५।

सुबोधिनी:—अकस्मात्पतिते शङ्का भवतीति कथं स्वनाम न गृहीतवान् तत्राह **भगवद्दर्शने**ति, **भगवद्दर्शने**न योयं महाना**ह्लादो** जातः तेनान्तः पूर्णेन बहि**र्बाष्प**तया निर्गतेन **पर्याकुले ईक्षणे** यस्य, ज्ञानफलेन ज्ञानं तिरोहितमिति तस्य न विचार उत्पन्न इत्यर्थः, नन्वन्यो मास्तु विचारः अयमहमिति अपूर्वदर्शनत्वात् कथं न स्वाभिधानमुक्तवान्, तत्राह **पुलकाश्चित** इति, सर्वाङ्गे **रोमाञ्चः** प्रेमातिभरात् जातः तेन विवशत्वात् **स्वाख्याने** अयमहमस्मीति कथनेपि **नाशकत्**, न समर्थो जातः, परिज्ञानार्थं सम्बोधनमादरार्थं वा ।। ३५ ।।

व्याख्यार्थ—अक्रूरजी के अकस्मात् गिर पड़ने और अपना नाम भी न लेने के कारण उत्पन्न हुई शङ्का को निवारण करने के लिए -भगवद्दर्शन- यह श्लोक कहते हैं। भगवान् का साक्षात् दर्शन

करके अक्रूरजी को परम आनन्द प्राप्त हुआ। वह अत्युत्कट आनन्द उनके हृदय में नहीं समाया और नेत्रों के मार्ग से प्रेमाश्रु रूप से बाहर निकल पड़ा। उनकी आँखें आँसूओं से भर आईं। ज्ञान का फल श्रीहरि को पाकर उनका ज्ञान छिप गया, उन्हें कुछ विचार नहीं रहा। उनका सारा शरीर उत्कट प्रेम के कारण रोमान्चित हो गया और उस आनन्द के अतिशय से वे इतने विवश हो गए कि अपना परिचय देना भी वे भूल गए। अपना परिचय भी नहीं दे सके। राजा इस उत्कट प्रेम की महिमा को जान सके -इसलिए अथवा आदर के लिए मूल में-'नृप'- सम्बोधन पद कहा है ॥३५॥

श्लोकः—**भगवांस्तमभिप्रेत्य रथाङ्गाङ्कितपाणिना ।**
परिरेभेभ्युपाकृष्य प्रीतः प्रणतवत्सलः ॥३६॥

श्लोकार्थः—तब भक्तवत्सल भगवान् ने अक्रूर के आने का अभिप्राय उसके न कहने पर भी स्वयं ही जान लिया और प्रसन्नता पूर्वक अपने रथाङ्ग-चक्रधारण करने वाले श्री हस्त से उठाकर उन्हें गले से लगा लिया ॥३६॥

सुबोधिनी—ततस्तस्य वचनव्यतिरेकेणैव भगवांस्त ज्ञात्वा कर्तव्यं कृतवानित्याह **भगवानिति**, भगवत्त्वात् **तमक्रूरोयमित्यभिप्रेत्य** दुष्टसंसर्गजनितदोषनाशार्थं **रथाङ्गेन** चक्रेणाङ्कितेन कालात्मकेन तद्दोषं दूरीकृत्य **पाणिना** तमाकृष्य स्वसमीपे आनीय तस्मिन् स्वप्रवेशे लौकिकं कार्यं सेत्स्यतीति तमेव स्वस्मिन् आनीतवान्, ततः **परिरेभे**, उभयोरैक्यं सम्पादितवान्, दण्डवत्पातेनैव **प्रीतः**, नन्वस्य बहवो दोषाः सन्ति संसर्गजाः तत् कथं प्रीत इति चेत् तत्राह **प्रकर्षेण नतेषु वत्सलः**, वात्सल्ययुक्तः, भक्तकृपालौ **प्रकर्षेण** नतिमात्रेणैव कृपा अभिव्यक्ता भवति, अत आलिङ्गनमुचितमेव, यो भगवता परिगृहीतः यः कृष्णपादाङ्कितेषु लोटनेन भगवदीयत्वं प्राप्तः स भगवति सायुज्यमेव प्राप्तवान्, न स पुनरुद्गतः, भगवता परित्यक्त इति वचनाभावात्, तस्य पूर्वकामितसिद्ध्यर्थं प्रतिकृतिमेव कृत्वा पृथक् कृतवानिति लक्ष्यते, न हि परमप्रेम्णा भगवत्सायुज्यं प्राप्तस्य पुनरुत्थानं सम्भवति, लौकिकन्याये तु भक्तिर्वृथैव स्यात्, अतो बलभद्रालिङ्गनानुपपत्त्या भगवद्विश्लेषः तस्य कल्पयितुं शक्यः, एवं सति भक्तिमार्गः सफलो भवति, अन्यथा भावान्तरमुत्पादयन् पाक्षिकफलः स्यात् ॥३६॥

व्याख्यार्थः—उनके अपना परिचय न देने पर भी भगवान् ने अक्रूरजी को पहचान लिया और उनके साथ उचित व्यवहार किया-यह इस "भगवान्" इत्यादि श्लोक से कहते हैं। श्रीकृष्ण भगवान् हैं। इसलिए अक्रूरजी को पहचान कर उनके दुष्ट कंस के संसर्ग से उत्पन्न हुए दोष को भगवान् ने काल रूप चक्र से अङ्कित अपने श्री हस्त के स्पर्श से दूर कर दिया और उनको अपने पास लाकर गाढ़ आलिङ्गन किया। इस प्रकार आलिङ्गन करके अक्रूर में भगवान् प्रविष्ट हो गए और अपने में अक्रूर का प्रवेश कर लिया। दोनों की एकता प्राप्त कर ली। जिससे भगवान् लौकिक जैसा और अक्रूर अलौकिक जैसा कार्य करेंगे।

अक्रूर में संसर्ग से होनेवाले दोष बहुत होने पर भी भक्तवत्सल भगवान् केवल प्रणाम करने मात्र से ही उन पर प्रसन्न हो गए, क्योंकि भक्तों पर कृपा करनेवाले उन परम कृपालु भगवान् को

कृपा स्तोत-प्रवाह उनके चरणों में भक्त के प्रणाम करते ही बहने लग जाता है। इसलिए भक्त अक्रूर का आलिङ्गन उचित है। जिसको भगवान् ने अपना कर लिया और जो भगवान् के चरण चिन्हों से अङ्कित रेणु में लोटने से भगवदीय हो गए थे। वह अक्रूर भगवान् में सायुज्य को प्राप्त ही हो गया और फिर वह भगवान् से अलग नहीं हुआ; क्योंकि यहां मूल में भगवान् का उनको त्याग देना नहीं कहा है। ऐसा जान पड़ता है कि अक्रूर की पहली इच्छाओं को सिद्ध करने के लिए उसकी सी आकृति वाला पुरुष भगवान् ने अपने से अलग कर दिया है, क्योंकि यह सम्भव ही नहीं है कि अत्युत्कट प्रेम से भगवान् में सायुज्य पाकर फिर वह जीव उनसे अलग हो जाय और यदि अलग हो जाता है तो भक्ती ही व्यर्थ हो जायगी, किन्तु अलग हुए बिना बलदेवजी का आलिङ्गन नहीं हो सकता। इसलिए अक्रूर से भगवान् से अलग होने की कल्पना की जाती है। अक्रूर को सायुज्य-प्राप्ति होने पर ही भक्ती मार्ग सफल होता है। अन्यथा सायुज्य पाकर फिर लौकिक भाव हो जाने पर तो भक्ति मार्ग का परम मुख्य फल सायुज्य नहीं रहेगा अर्थात् पाक्षिक-गौण-फल ही रह जायगा ।।३६।।

लेख—भगवान्-इस श्लोक की व्याख्या में-तस्मिन् स्वप्रवेशे-का तात्पर्य यह है कि अक्रूर में भगवान् का प्रवेश होने पर अक्रूर की तरह उसमें प्रविष्ट भगवान् भी लौकिक कार्य और भगवान् में अक्रूर के प्रवेश होने पर वह भी प्रविष्ट हुए भगवान् की तरह अलौकिक कार्य करने लगेंगे। 'यो भगवता' इत्यादि व्याख्या के पदों का अभिप्राय है कि सारे ही जीव भगवान् में हैं ही। उनमें से किसी वैसे दो स्वभाव वाले जीव को अक्रूर जैसा शरीर धारी करके अलग कर दिया, ऐसा लक्षित होता है। यदि यह कहा जाय कि अक्रूरजी लौकिक प्रकार से आए थे। इसीलिए सायुज्य देकर भी अलग कर दिया; तब तो भक्ति व्यर्थ हो जायगी। इसलिए भक्ति की सार्थकता और अक्रूर की बलभद्रजी को आलिङ्गन करने की इच्छा की सी आकृति वाला करके भगवान् अपने से-भगवान् से-अलग कर दिया-ऐसी कल्पना की जाती है ।।३६।।

श्लोक—सङ्कर्षणश्च प्रणतमुपगुह्य महामनाः।
गृहीत्वा पाणिना पाणि अनयत् सानुजो गृहम् ।।३७।।

श्लोकार्थ—इसके बाद नम्रता पूर्वक हाथ जोड़े खड़े हुए अक्रूर को-महा मनस्वी बलभद्रजी-हाथ पकड़कर-अपने भाई श्रीकृष्ण के साथ घर ले गए ।।३७।।

सुबोधिनी—सङ्कर्षणेपि प्रणत इति भावसङ्कटात् सङ्कर्षणोपि तं तथा कृतवानित्याह **सङ्कर्षणश्चेति**, अत्रापि प्रणतत्वमेव हेतुः, न तु लौकिक इति चकारेणातिदिष्टोप्यर्थः कर्तृधर्मपर इति पुनराह '**प्रणतमिति**' **महामना** इति तस्य लौकिकधर्माभिनिवेशः, ततोयं पितृव्यः समागत इति **पाणिना पाणि गृहीत्वा** भगवत्सहितः तं **गृहमनयत्**, कामनासिद्धेति कथनार्थमुच्यते ।।३७।।

व्याख्यार्थ—जब अक्रूर ने भगवान् श्रीकृष्ण के समान ही बलदेवजी को भी प्रणाम किया तब तो बलदेवजी ने भी उनका समान भाव देखकर श्रीकृष्ण की तरह ही अक्रूर का आलिङ्गनादि किया, यह 'सङ्कर्षणश्च' इस श्लोक से कहते हैं। बलदेवजी, महामना-उदार मन वाले हैं। लोक मर्यादा की रक्षा करने में उनका विशेष आग्रह है। इसलिए-ये काका अक्रूरजी आए-यों कहकर

अपने श्रीहस्त से उनका हाथ पकड़कर भगवान् कृष्ण के साथ २ उन्हें आदर पूर्वक घर में लिवा ले गए। अक्रूर की मार्ग में की हुई कामना सिद्ध हो गई, यह इस श्लोक से कहा है ।।३७।।

श्लोक—**पृष्ट्वाथ स्वागतं तस्मै निवेद्य च वरासनम् ।**
प्रक्षाल्य विधिवत् पादौ मधुपर्कार्हणमाहरत् ।।३८।।

श्लोकार्थ—बलदेवजी ने उन्हें घर में ले जाकर स्वागत्-सत्कार के बाद उत्तम आसन पर बिठलाया। फिर यथा विधि उनके पांव धोकर मधुपर्क आदि से उनका पूजन किया ।।३८।।

सुबोधिनी—ततो लौकिकवैदिकमार्गेण तं पूजितवानित्याह **पृष्ट्वे**ति, अनामयमारोग्यं **पृष्ट्वा** उत्कृष्टं तस्य गृहेपि दुर्लभं **आसनं** निवेद्य, ततः शास्त्रानुसारेण अभ्यागते यथा कर्त्तव्यं तथा **पादौ प्रक्षाल्य मधुपर्क**सहित**मर्हणं** पूजां **आहरत्** ।।३८।।

व्याख्यार्थ—घर में ले जाकर लौकिक वैदिक रीति से वहाँ उनका पूजन किया। यह इस 'पृष्ट्वाथ' श्लोक से कहते हैं। वहाँ उनकी सकुटुम्ब कुशल मंगल पूछने के बाद उन्हें बड़े सुन्दर तथा बहुमूल्य आसन पर बिठलाया। फिर अभ्यागत के उचित शास्त्र विधि से उनके चरण धोकर मधुपर्क आदि उत्तम उत्तम वस्तुओं से पूजन किया। ३८।

श्लोक—**निवेद्य गां चातिथये संवाह्य श्रान्तमादृतः ।**
अन्नं बहुगुणं मेध्यं श्रद्धयोपाहरद् विभुः ।।३९।।

श्लोकार्थ—श्रीकृष्ण भगवान् ने फिर अपने अतिथि अक्रूर को एक सब गुणों से युक्त श्रेष्ठ गाय दान दी और तैलाभ्यङ्ग मर्दन आदि से उनके परिश्रम-थकान-को दूर किया। तब बलदेवजी ने अनेक गुणों से युक्त पवित्र अन्न लाकर बड़ी श्रद्धा से अक्रूरजी को भोजन कराया ।।३९।।

सुबोधिनी—**निवेद्ये**ति, ततो **गां निवेद्य**, 'महोक्षं वा महाजं वे' ति स्मृतेः, उत्सर्गपक्ष एव वात्र, यद्यप्ययमभ्यागतः तथाप्यपूर्व इत्य**तिथि**रेव, धर्मार्थं च भगवान् करोति न तु सम्बन्धेनेति ज्ञापयितुं च तथोक्तवान्, **अतिथि**स्तु गोघ्नो भवतीति हननार्थमेवेति केचित्, चकारात् महाजं च वस्त्रादिकं च, ततः **संवाह्य** तैलाभ्यङ्गमर्दनादिना सर्वाङ्गश्रमं दूरीकृत्य **आदृतो** जातः, **संवाहे** हेतुः **श्रान्त**मिति, ततो **बहुगुण**मनेकव्यञ्जनयुक्त**मन्नं** ओदनं श्रद्धापूर्व**मुपाहरत्**, **मेध्य**मिति, तदानीं शुद्धतया निर्मितं रोहिण्या पक्वमित्यर्थः, न तु यथाकथञ्चित् सम्पादितं, तथात्वे श्रद्धा हेतुः, अकालेपि सहसा सर्वसामग्रीसिद्धौ हेतुः **विभु**रिति, अतिथिधर्मं जानातीत्यक्रूरः सर्वं तथैव कृतवान्, उभावपि भिन्नभावापन्नाविति न किञ्चिद् विरुध्यते ।।३९।।

व्याख्यार्थ—यद्यपि अक्रूरजी अभ्यागत ही थे; तो भी प्रथम आने के कारण भगवान् ने 'महोक्षं वा महाजं वा'-इस स्मृति के अनुसार उन्हें अतिथि मानकर उनको गाय का दान दिया। यह भेंट भगवान् ने धर्म समझकर ही दी, उन्हें अपना संबंधी मानकर नहीं दी। अन्य कोई व्याख्याकार कहते हैं कि अतिथि गोघाती होता है, इसलिए इसी अभिप्राय से गाय भेंट में दी।

तदनन्तर तैल मर्दन उबटना आदि से उनकी थकान को उनके मार्ग में यातायात के परिश्रम को दूर किया। फिर बलदेवजी ने अपनी माता रोहिणीजी से बड़ी पवित्रता से बनाए हुए, अनेक प्रकार के व्यञ्जनों से युक्त अन्न चावल आदि का भोजन किया। बलदेवजी सर्व समर्थ हैं, इसलिए असमय में भी सारी सामग्री का उसी समय सिद्ध हो जाने में कोई आश्चर्य नहीं है। अक्रूर और बलदेवजी दोनों ही अतिथि धर्म के सदाचार को जानने वाले हैं, अतः बलदेवजी ने धर्मानुकूल आदर सत्कार किया और अक्रूर ने भी अतिथि सत्कार ग्रहण किया। वे दोनों आतिथेय और अतिथि रूप से भिन्न २ भाव वाले हो गए। इसलिए सत्कार और सत्कार्य में कुछ विरोध नहीं रहा ॥३९॥

लेखः—"निवेद्य गां"—इस श्लोक की व्याख्या में 'उभावपि भिन्न भावापन्नौ'—पदों का यह आशय है कि बलदेवजी का लौकिक भाव में आग्रह है और अक्रूर प्रतिकृति रूप है। इसलिए दोनों के पृथक्-पृथक् भावापन्न होने के कारण कोई विरोध नहीं है ॥३९॥

श्लोक—**तस्मै भुक्तवते प्रीत्या रामः परमधर्मवित्।**
मुखवासैर्गन्धमाल्यैः परां प्रीतिं व्यधात् पुनः ॥४०॥

श्लोकार्थ—जब वह भोजन कर चुके, तब उत्तम धर्म के जानने वाले बलदेवजी ने मुखवास-पान इलायची देकर इत्र फुलेल आदि सुगन्धित द्रव्य लगाया तथा सुरभित माला पहनाकर उन्हें अत्यन्त प्रसन्न किया ॥४०॥

सुबोधिनी—भोजनान्तमेवातिथिकृत्यमिति अग्रिमोपचारं न कुर्यादिति पुनराह **तस्मा** इति, **भुक्तवते** आतृप्तेः, ततः **परमप्रीत्या मुखवासै**-स्ताम्बूलादिभिः **गन्धैश्च**तुः समैः **माल्यैश्च** राजवत् **तस्मै परां प्रीतिं व्यधात्**, अयमसाधारणो धर्मः, अतिथिं स्वसदृशं कुर्यादिति, ततोप्यधिकं कृतवान्, यद्यपि पूर्वं मधुपर्कादिसमये माल्यं दत्तमेव तथापि प्रीत्यैतद्दानमिति **पुनरि**त्यनेनास्य लौकिकत्व-मुक्तम् ॥४०॥

व्याख्यार्थ—भोजन के पश्चात् किए जाने वाले अतिथि के उपचार, सेवादि सत्कार, का वर्णन 'तस्मै'-इस श्लोक से करते हैं। तृप्ति पूर्वक भोजन कर चूकने पर परम धर्मज्ञ बलदेवजी ने बड़े स्नेह से ताम्बूल, पान, इलायची तथा सुगन्धित द्रव्य, माला आदि से उनका राजा की तरह सत्कार करके उन्हें अत्यन्त प्रसन्न किया। अतिथि को अपना सा बना देना, यह भी एक असाधारण धर्म हैं; किन्तु यहाँ तो उस असाधारण धर्म से भी अधिक सत्कार किया। यद्यपि पहले मधुपर्क आदि के द्वारा सत्कार करते समय माला पहनाना कह दिया हैं, तो भी प्रेम से फिर माला पहनाने का वर्णन इसके लौकिक भाव को सूचित करता है ॥४०॥

श्लोक—**पप्रच्छ सत्कृतं नन्दः कथं स्थ निरनुग्रहे ।**
कंसे जीवति दाशार्ह सौनपाला इवावयः ॥४१॥

श्लोकार्थ—इस प्रकार सत्कार हो चुकने पर नन्दरायजी ने अक्रूरजी से पूछा-हे दाशार्ह अक्रूर निर्दयी कंस अभी जीवित ही है । इसलिए कसाई के घर में पली हुई भेंड़ों के समान तुम लोगों को हर घड़ी ही अपने प्राणों का खटका लगा ही रहता होगा । तुम पर आजकल कैसी बीतती है ॥४१॥

सुबोधिनी--ततो ग्रामप्रभुणा असम्मानितश्चेत् लोके बालकैः सम्मानितोपि न परितुष्टो भवेत् इति सम्भाषणात्मकं सम्माननं नन्दकृतमाह **पप्रच्छे**ति त्रिभिः, पूर्वमेव सत्कृत इति पूजामकृत्वैव केवलं **पप्रच्छ**, प्रश्नमेवाह **निरनुग्रे कंसे** तस्य समीपे **कथं स्थे**ति, सम्भावितोपद्रवस्थानकुशलप्रश्नोयम्, **कंस**स्य न केपि गुणाः सन्तीति **जीवनमेवोक्तम्**, अपकीर्त्या व **अजीवति**, न हि मृतकस्थाने श्मशाने कश्चित्तिष्ठतीति भावः, **दाशार्हे**ति सम्बोधनं स्वतो वंशतश्च महत्त्वेन स्तोत्रार्थम्, सर्वत्र स्थितौ **दोषाः** सन्तीति जन्मभूमित्वात् स्थीयत इति चेत् तत्राह **सौनपाला** इति, सूनापरः **सौनः** नित्यशमिता मांसविक्रयी, स एव **पालो** येषां ते च **अवयः** गतानुगतिकाः, ते यथा अविचार्य तिष्ठन्ति तथा स्थीयत इति स्थितिरनुचितेति भावः ॥४१॥

व्याख्यार्थ--लोक में कोई भी आगन्तुक बालकों के द्वारा किए गए सम्मान को पाकर भी तब तक सन्तुष्ट होता, जब तक ग्रामाधिपति अथवा घर का स्वामी उसका सम्मान नहीं करता। घर या गांव के स्वामी से आदर पाकर अतिथि परम सन्तुष्ट होता है । इस लोक सामान्य रीति के अनुसार-पप्रच्छ-इत्यादि तीन श्लोकों से नन्दरायजी के द्वारा किए गए सम्भाषण रूप-अक्रूर के-सम्मान का वर्णन करते हैं । पहले बालकों ने अक्रूर का यथा विधि भोजनादि पर्यन्त पूजन कर दिया होने से नन्दजी उनका पुनः पूजन न करके केवल उनसे पूछने ही लगे कि निर्दयी कंस के समीप में आप कैसे रह रहे हैं । उस सतत् उपद्रव पूर्ण स्थान में कुशल मङ्गल की सम्भावाना ही कैसे की जाय ? क्योंकि उस दुष्ट कंस में एक भी गुण नहीं है । वह तो अपकीर्ति पूर्वक जी रहा है, जो मरा हुआ ही है । मृतक-मुर्दे-के स्थान श्मशान में कोई नहीं रहता है । आप कैसे रह रहे हैं ?

यदि आप-'जननी जन्म भूमिश्च'-जन्म भूमि होने के कारण ही वहाँ रह रहे हैं तो आपका यह-भेड़ों की तरह बिना विचारे, गतानुगतिक- वहाँ रहना सर्वथा अनुचित ही है । जैसे किसी नित्य मांस बेचने वाले कसाई के पालन पोषण में पलने वाली और एक के पीछे दूसरी लगकर चलने वाली विचार हीन भेड़ें, एक दिन उसी कसाई के हाथ से मार दी जाती हैं । उन भेड़ों का उस कसाई के पालन पोषण में रहना जैसे सवर्था अनुचित ही है, वैसे ही आपका भी कंस के पास रहना अनुचित है ॥४१॥

श्लोक—**योवधीत् स्वस्वसुस्तोकान् क्रोशन्त्या असुतृप् खलः ।**
किं नु स्वित् तत् प्रजानां वः कुशलं विमृशामहे ॥४२॥

श्लोकार्थ—वह दुष्ट कंस सदा अपने शरीर का ही पालन पोषण करने को चेष्टा में तत्पर रहता है। जिसने अपनी विलखती हुई दीन छोटी बहिन के निरीह नन्हे बच्चों (पुत्रों) को उसके देखते देखते मार डाला, उसकी प्रजा की कुशल पूछना तो मेरी समझ में व्यर्थ ही है। उसकी प्रजा का तो जीवन भी दुर्लभ होगा ॥४२॥

सुबोधिनी— कंसस्य निर्दयत्वमाह **योवधी**-दिति, भागिनेया: अतिमान्या:, तत्रापि बालका:, तत्रापि **क्रोशन्त्या: स्वसु:** सत्या:, **क्रोशन्त्या** कन्यया सह वा, ननु क्वचित् कर्मविशेषे पुत्रादयोपि हन्यन्त इति किमाश्चर्यं भागिनेयहनने, तत्राह **असुतृप्**, केवलं प्राणपोषक: तेष्वमारितेषु स्वप्राणा गमिष्यन्तीति, तदपि न सर्वसम्मत्या नापि क्रिया-दिना, किन्तु **खल:** दुष्ट:, यत्रैतादृश: प्रभु: तत्र **प्रजानां** तदधीनानां **वो** युष्माकं **कुशलं किं विमृशामहे किं** विचारयाम:, अत: सन्देहे प्रश्न:, अत्र तु विपरीतभाव एव भिन्नतया कुशलप्रश्ने बन्धु-विरोधो दुष्टोयमक्रूर इत्युक्तं भवति, अत: कुशल-सम्भावनायामपि तथा नोक्तवान् ॥४२॥

व्याख्यार्थ—'योऽवधीत्'-इस श्लोक से कंस की निर्दयता बताते हैं। भानेज-बहिन के पुत्र-अत्यन्त आदरणीय होते हैं। वे भानेज भी अत्यन्त नन्हे बालक-जात मात्र-उनको अपनी बिल-बिलाती हुई छोटी बहिन सती देवकी के देखते जिस कंस ने मार डाला। यद्यपि कभी कहीं किसी विशेष कर्म से पुत्रादिक तक मार डाले जाते हैं; फिर भानेजों को मार डालने में आश्चर्य की कोई बात नहीं है; किन्तु उसने तो केवल अपने प्राणों का ही पोषण-रक्षा-करने के लिए भानेजों को मार डाला है, क्योंकि वे नहीं मारे जाते तो उसके अपने प्राण चले जाते। उनका बध जो उसने किया है, वह किसी की सलाह-सम्मति से अथवा किसी कर्म विशेष से नहीं किया है। उसने तो केवल अपनी दुष्टता के कारण ही ऐसा किया है; क्योंकि वह तो महान् दुष्ट ।

जहाँ ऐसा क्रूर स्वामी है, वहाँ उसके अधीन रहने वाली प्रजारूप आपकी कुशलता का क्या विचार किया जाय? इस प्रकार यह सन्देह में प्रश्न है। यहाँ इस प्रकार के सन्देहात्मक प्रश्न से तो विपरीत भावना ही नन्दजी की सूचित होती है, क्योंकि भिन्न रूप से इस प्रकार कुशल प्रश्न में—"बन्धु विरोधी यह अक्रूर दुष्ट है"—ऐसा कहा जा सकता है। इसीलिए कुशल सम्भावना होने पर भी सन्देहात्मक कुशल प्रश्न ही किया। सीधे शब्दों में कुशल नहीं पूछा ॥४२॥

श्लोक—इत्थं सूनृतया वाचा नन्देन सुसभाजित:।
अक्रूर: परिपृष्टेन जहावध्वपरिश्रमम् ॥४३॥

श्लोकार्थ—इस प्रकार सत्कार के बाद नन्दरायजी ने मीठे वचनों से अक्रूर से उनकी कुशल पूछी। कृष्ण बलराम के सत्कार से अक्रूर के मार्ग का परिश्रम दूर हो गया और वे स्वस्थ हुए ॥४३॥

सुबोधिनी—एतादृशं नन्दवाक्यमुक्त्वा उपसंहरति **इत्थमिति, सूनृतया** अत्यन्तं सत्यरूपया कोमलया सुखदया च **वाचा नन्देन सुष्ठु सभाजितः** पूजितः **अक्रूरः** कायिकवाचिकमानसश्रमान् **जहौ**: सुतरां **पृष्ट** इति, अन्याभिनिवेशेन स्मृत्या प्राप्तमपि **अध्वपरिश्रमं जहा**वित्यर्थः ।।४३।।

सुबोधिनी—एवमपेक्षितमान्तरबाह्यधर्मपरान् स्मार्तान् निरूप्य श्रौतान् निरूपयति **त्रय्येति**, श्रुतौ पक्षत्रयं काण्डत्रयभेदात्, तत्र **कर्ममार्गे त्रयी प्रधानं, उपनिषदो ज्ञानमार्गे, उपासनायां तु प्रणवादिमन्त्राः,** तत्क्रमेण त्रयमाह, **सर्वेषामेव भगवज्ज्ञानोपयोग** इत्यवोचाम्, मन्त्रभेदेन वेदानां त्रैविध्यं ऋचः सामानि यजूंषीति, तदुपयोगि ब्राह्मणं च, **बाह्यक्रिया वा यजुषा क्रियते आन्तरी साक्षाद्देवतायै द्रव्यसमर्पणादिरूपा ऋचा क्रियते, ततो देवतायाः फलदानार्थं हविर्ग्रहणार्थं च साम्ना स्तूयते,** एवं प्रकारेण **वैतानिकाः** यज्ञवितानपराः यज्ञरूपं **त्वां विततैः** विस्तीर्णैः सहस्रसंवत्सरान्तैः नानाविधैर्यज्ञैः **यजन्त** इति सर्वत्र सम्बन्धः, चकारादङ्गोपाङ्गादिभिः सह, ज्ञानेनापि सहेति, **केचिद् द्विजा** इति जन्मकर्मावदाताः श्रोत्रियाः न तु सर्वेषां तत्राधिकार इति, ननु तत्रेन्द्रादय एवेज्यन्ते न तु भगवानित्यभिप्रेत्याह **नानारूपेति**, नानाविधानि रूपाणि येषाममराणामिन्द्रादीनां तेषामा**ख्यया,** आधिदैविकत्वात् भगवत एव तन्नामेति वा, तेषामा**ख्यया** भगवानेवेज्यते, वस्तुतस्त्वङ्गप्रायास्ते, यथा राज्ञः मुकुटोष्णीषादिनिर्माता सेवक एव भवति यद्यपि शिरस एव परिचर्यां करोति, एवं कर्णादिष्वपि, तथापि राजसेवक एवोच्यते न त्वङ्गसेवक इति, तथा प्रकृतेपि, इन्द्रादयो बाहव इत्यादिभिरङ्गत्वश्रुतेः अतो भगवानेवेज्यते ॥५॥

व्याख्यार्थ—वेद में तीन काण्ड होने के कारण तीन पक्ष हैं। उनमें कर्म मार्ग में तीनों ही वेद प्रधान हैं। ज्ञान मार्ग में उपनिषदों की और उपासना मार्ग में तो प्रणव आदि मंत्रों की प्रधानता है। इस क्रम से तीन प्रकार के पूजा करने वालों-पूजकों-का वर्णन करते हैं, क्योंकि सब ही का भगवान् का ज्ञान प्राप्त करने में उपयोग है, ऐसा ऊपर के श्लोक की व्याख्या में कहा जा चुका है।

मंत्रों के भेद से वेदों के ऋग्वेद, सामवेद और यजुर्वेद ये मंत्र, ब्राह्मण, उपनिषद, तीन प्रकार के हैं। उन मंत्रों के उपयोगी-वेद के मंत्रों का भिन्न २ यज्ञों में उपयोग करने की विधि को बताने वाले—वेद भाग को ब्राह्मण कहते हैं। अथवा बाहरी कार्य यजुर्वेद के और देवता को साक्षात् द्रव्य-(पदार्थ)—समर्पण करना आदि अन्दर का कार्य ऋग्वेद के मत्रों से किया जाता है। फिर देवता से फल देने तथा आहुति को ग्रहण करने की प्रार्थना करने के लिए सामवेद के मंत्रों से देवता की स्तुति की जाती है। इस प्रकार से लम्बे समय तक चलते रहने वाले यज्ञों में आसक्त हुए याज्ञिक लोग विभिन्न—एक हजार वर्षों में पूरे होने वाले—लम्बे यज्ञों से यह रूप -आप (भगवान्)- की पूजा करते हैं। यह भगवान् की पूजा करने का सम्बन्ध सब जगह ही समझ लेना चाहिए। अर्थात् अङ्गों, उपाङ्गों तथा ज्ञान के भी सहित तीनों वेदों की विद्या और यज्ञों से आपकी ही पूजा करते हैं। मूल श्लोक में 'केचिद् द्विजाः' कितने ही ब्राह्मण, कहने का अभिप्राय यह है कि जन्म और कर्म से शुद्ध श्रोत्रिय ब्राह्मण ही ऐसा करते हैं, सभी ब्राह्मणों को ऐसा करने का अधिकार नहीं हैं। उन यज्ञों में तो इन्द्र, अग्नि आदि देवता ही पूजे जाते हैं। उनमें भगवान् की पूजा तो नहीं की जाती। इसके समाधानार्थ कहते हैं कि विभिन्न रूप वाले देवों के नाम से इत्यादि शब्दों का प्रयोग है। अनेक प्रकार के रूपों वाले जो इन्द्रादि देव हैं, उन देवों के नाम से अथवा भगवान् ही आधिदैविक रूप से उन देवों में विराजते हैं। इस कारण से भी वे नाम भगवान् के ही नाम हैं, इसलिये इन्द्रादि के नाम से वे भगवान् का पूजन व यजन करते हैं।

वास्तव में तो ये सभी देवता भगवान् के अङ्ग रूप हैं। जैसे राजा के मुकुट, पगड़ी, कुण्डल

बनाने वाले सेवक यद्यपि राजा के उत्तमाङ्ग की, कान आदि की भिन्न भिन्न सेवाएँ करते हैं, तो भी वे सिर, कान, आदि की सेवा करने वाले न कहलाकर राजा के सेवक ही कहे जाते हैं । इसी प्रकार से यज्ञ यागादि के प्रसङ्ग में भी 'इन्द्रादयो बाहव' इन्द्रादि भगवान् की भुजाएँ हैं, इत्यादि वाक्यों से देव भगवान् के अङ्ग हैं, ऐसा ज्ञान होता है । इसलिए उनकी पूजा से भगवान् की ही पूजा होती है ॥५॥

श्लोक—**एके त्वाखिलकर्माणि संन्यस्योपशमं गताः ।**
ज्ञानिनो ज्ञानयज्ञेन यजन्ति ज्ञानविग्रहम् ॥६॥

श्लोकार्थ—इसी प्रकार कई एक ज्ञानी लोग कर्मों के त्याग से शान्ति को प्राप्त करके ज्ञान रूप विग्रह वाले आप की ही आराधना करते हैं ॥६॥

सुबोधिनी—एकेति, अन्ये पुनः सर्व**कर्माणि** त्यक्त्वा **उपशमं गताः** चित्तस्य परमां शान्ति प्राप्य **ज्ञानिनो** भूत्वा ब्रह्मात्मत्वस्फूर्तियुक्ताः आत्मयाजिनो भूत्वा ज्ञानरूपमेव यज्ञं कुर्वन्तः **ज्ञान**यज्ञो नाम आत्मानमेव चिद्रूपं यज्ञरूपेण परिकल्प्य भगवते समर्पयन्ति, भगवत्प्रीतिसाधकत्वाद् वा **ज्ञानमेव यज्ञ**शब्देनोच्यते, अथवा, जरामर्यादादिप्रकाराः **ज्ञानयज्ञाः**, तत्र इज्योऽपि ज्ञानरूप एवेत्याह **ज्ञानविग्रह**मिति ॥६॥

व्याख्यार्थ—कितने लोग कर्मों का त्याग करके चित्त की शान्ति को प्राप्त करते हैं। वे चित्त की अत्यन्त शान्ति को पाकर ज्ञानी आत्मा ब्रह्म ही है, ऐसी स्फूर्ति रख कर आत्मा का पूजन करने वाले–आत्मयाजी–बनकर ज्ञान रूप ही यज्ञ करते हैं । चिद् (ज्ञान) रूप आत्मा को ही--यज्ञ रूप से कल्पना करके–भगवान् के समर्पण करना, अथवा ज्ञान भगवान् की प्रसन्नता को प्राप्त कराने का साधन है, इसीलिए ज्ञान को ही यज्ञ शब्द से कहा गया है, अथवा जिनके करने से बुढ़ापा और मरण आदि न हो, ऐसे यज्ञों को ज्ञान यज्ञ कहते हैं । इन तीनों प्रकार के भी ज्ञान-यज्ञों में जिनका पूजन किया जाता है, वह भी ज्ञान रूप ही है, यह ज्ञान विग्रहम् (ज्ञान रूप विग्रह वाले) इस विशेषण से कहा है ॥६॥

श्लोक—**अन्ये च संस्कृतात्मानो विधिनाभिहितेन ते ।**
यजन्ति तन्मयास्त्वां वै बहुमूर्त्येकमूर्तिकम् ॥७॥

श्लोकार्थ—पवित्र देहान्तःकरण वाले कई लोग वेदोक्त मार्ग के अनुसार तन्मय होकर मत्स्य, कच्छप आदि अनेक रूपों से एक ही स्वरूप वाले आप का ही पूजन करते हैं ॥७॥

सुबोधिनी—औडुलोमिवत् उपासकानाह **अन्ये** चेति, ते हि स्वात्मानं भगवन्तं च भिन्नमभिन्नं च मन्यन्ते 'नारुद्रो रुद्रमर्चयेत्' इत्यादिवाक्यैः, अत आह **अन्ये** भिन्नाश्चकारादभिन्ना अपि,

संस्कृतात्मानो दीक्षादिभिः शोधितसङ्घाताः, गुरुणा **अभिहितेन मार्गेण, ते** प्रसिद्धाः तत्तत्प्रकारेणैव तत्तद्देवतामन्त्रोपासकाः,ततस्**तन्मया** भूत्वा उपास्यदेवतया व्याप्तस्वरूपा भूत्वा **त्वामेव, वै** निश्चयेन नात्र तिरोहितमिव, बहुमूर्त्या मत्स्यकूर्मादिरूपैः **एकमूर्तिकं** एकस्वरूपमेव **यजन्ति,** सर्वे हि विष्णूपासका इति, अत्र शैवादयोपि भगवन्निष्ठा एवेति ज्ञातव्याः,उपासनायां हि मन्त्र एव प्रधान, स मन्त्ररूपः यज्ञवदेक एव इन्द्रादिवत् तत्तदभिमानिन्यो देवता इति, ततः पञ्चविधैः अनेकविधैर्वा मन्त्रैः उपासनामार्गसिद्धो भगवानेक एवोपास्यते क्षुद्रोपासकांश्चाग्रे वक्ष्यते भिन्नप्रकारसिद्धांश्च ।७।

व्याख्यार्थ—'अन्ये च' इस श्लोक से औडुलोमि ऋषि के मतानुसार उपासना करने वालों का वर्णन करते हैं। 'नारुद्रोरुद्रमर्चयेद्' जो रूद्र न हो, उसे रूद्र की पूजा नहीं करनी चाहिए, इत्यादि वाक्यानुसार वे औडुलोमि के मतावलम्बी उपासक स्वय को और भगवान् को भिन्न भी तथा अभिन्न भी मानते हैं। दीक्षा संस्कार आदि के द्वारा शुद्ध की हुई देह वाले वे भी उनके गुरुओं के बतलाए हुए मार्गानुसार भिन्न-२ रीति से अलग-अलग देवों के मन्त्रों के उपासक नाम से प्रसिद्ध होकर, तन्मय बन कर तथा अपने उन उपास्य देवों का अपनी देह में आवेश करा कर आपका ही पूजन करते है, यह निश्चित तथा स्पष्ट ही हैं।

वे मत्स्य, कच्छप आदि अनेक रूपों से एक स्वरूप वाले आपका पूजन करते हैं; क्योंकि सारे ही विष्णु की उपासना करते हैं। इन उपासकों में शैव आदिकों को भी भगवान् में ही श्रद्धा वाले समझना चाहिए; क्योंकि उपासना में मन्त्र ही प्रधान है और यज्ञ में जैसे विभिन्न आकारवाले इन्द्रादि अभिमानी देवों के भिन्न-भिन्न होते हुए भी मन्त्र रूप भगवान् एक ही हैं, वैसे ही अनेक रूपों से भी एक रूप वाले आपका ही पूजन किया जाता है, (इसलिए पांच प्रकार के अथवा अनेक प्रकार के मन्त्रों के द्वारा उपासना, मार्गानुसार प्रसिद्ध एक ही भगवान् की उपासना की जाती है। हीन तथा भिन्न प्रकार से प्रतिष्ठापित देवों के उपासकों का निरूपण आगे किया जाएगा ।।७।।

श्लोक—**त्वामेवान्ये शिवोक्तेन मार्गेण शिवरूपिणम् ।**
बह्वाचार्यविभेदेन भगवन् समुपासते ।।८।।

श्लोकार्थ—हे भगवान्! इसी तरह शैव लोग भी शिवोक्त विधि के अनुसार शैव, पाशुपत आदि सम्प्रदाय भेद से शिवरूप आप की ही भली-भाँति उपासना करते हैं ।।८।।

सुबोधिनी—किञ्च, शिवरूपोपि त्वमेवेति शैवा अपि त्वामेवोपासत इत्याह **त्वामेवेति, अन्ये** उपासकेभ्यो भिन्नाः शिवशास्त्रानुसारिणः तामसे कल्पे **शिवरूपेण** विष्णुस्तिष्ठतीति शैवास्तमेव पक्षमाश्रित्य स्वभावरुच्या **तथोपासते, शिवोक्तो मार्गः** शैवपञ्चरात्रे पाशुपतादौ च प्रसिद्धः, तत्र **शिवरूपी** विष्णुरेव, केचिदावेशिनमाहुः, तत्र **बहवश्चाचार्याः** महापाशुपतपाशुपतादिभेदभिन्नाः, **भगवन्निति** सम्बोधनात् यदा वैराग्यगुणप्राधान्येन कार्यं करोषि तदा शिवरूपो भवसीति ज्ञापितं, सम्यगेवोपासत इति ।।८।।

व्याख्यार्थ – शिवरूप भी आप ही हैं। इसलिए शैव भी आपकी ही उपासना करते हैं, यह इस 'त्वामेवान्ये' श्लोक से कहते हैं। ऊपर बताए हुए उपासकों से अन्य उपासक शिव शास्त्र के अनुसार आपकी उपासना करते हैं; क्योंकि तामस कल्प में विष्णु शिव रूप से रहते हैं। इसलिए शैव उसी ऊपर के श्लोक में प्रदर्शित सर्वरूप के पक्ष का आश्रय करके अपनी स्वाभाविक रूचि के अनुसार उस तरह से शिवरूप की उपासना करते हैं।

शिवजी के द्वारा कहा हुआ शैव मार्ग शैव पञ्चरात्र और पाशुपत आदि में प्रसिद्ध है। उस मार्ग में शिवरूपी विष्णु ही हैं। कई एक विष्णु का शिव में आवेश हुआ कहते हैं। उस शैव मार्ग में महा-पाशुपत, पाशुपत आदि भेदों से भिन्न भिन्न बहुत आचार्य हैं। हे भगवन्! इस सम्बोधन से यह बतलाया है कि जब आप अपने (श्रीकृष्ण) वैराग्य गुण को मुख्य रख कर कार्य करते हैं; तब आप शिवरूप होते हो। इसलिए वे शैव भी भलीभाँति आपकी ही उपासना करते हैं।

श्लोकः— **सर्व एव यजन्ति त्वां सर्वदेवमयेश्वरम्।**
येऽप्यन्यदेवताभक्ता यद्यप्यन्यधियः प्रभो ॥ ९ ॥

श्लोकार्थः—हे नाथ! जो लोग अन्य अनेक देवताओं के भक्त हैं और सब देवताओं को अलग अलग समझते हैं; वे भी वास्तव में आप ही की पूजा करते हैं क्योंकि सर्व देवमय ईश्वर आप ही हैं। तात्पर्य यह है कि उनकी उपासना में केवल बुद्धि का ही भेद है, वस्तु का भेद नहीं है ॥९॥

सुबोधिनी—एवं षड्विधान् निरूप्य सामान्येन क्षुद्रोपासकानाह **सर्व एवेति**, किं बहुना क्षेत्रपालाद्युपासका अपि **त्वामेवोपासते**, यतस्त्वं **सर्वदेवमयः** तेषामपीश्वरः, 'अहं हि सर्वयज्ञानां भोक्ता **चे'ति** वाक्यात्, **सर्वदेवमयश्चासावीश्वर**श्चेति, ननु बुद्धिस्तेषां न भगवत्परेति कथं सर्वेषां भगवदुपासकत्वमित्याशङ्क्याह **येऽप्यन्यदेवताभक्ता** इति,वयमात्मव्यतिरिक्तस्य विष्णुव्यतिरिक्तस्य च देवतान्तरस्योपासका इति **यद्यप्येषामन्यबुद्धिः** तथापि उपास्यो महानिति मत्वा हि **तं** उपासते न त्वस्मदुपास्यो न किञ्चित्कर इति, अन्यथा नोपासीरन्, न हि कश्चिद्दीनमप्रयोजकं ज्ञात्वा कञ्चनोपास्ते, परं भ्रमादुपासना भवति, भ्रमे तु भगवद्धर्मा एव तत्रारोपिता इति भगवानेव सेव्यते, आरोपस्य तुल्यत्वात्,अबुद्धिपूर्वकोयमिति विशेषः, योपि भ्रमाद् रजतं जानाति सोपि रजतज्ञानवानेव, अन्यथा अनुव्यवसायोपि भ्रान्तः स्यात्, यदुक्तं भगवता 'न तु मामभिजानन्ती'ति तद्विधिपरत्वेन, 'अविधिपूर्वक' मिति वचनात्, प्रतिमादावपि भगवानारोप्यते तद्धर्माश्च, तथा तत्तदुपासका अपि स्वसेव्ये भगवत्त्वं तद्धर्माश्चारोपयन्ति परं विध्यभावात् न तस्य ज्ञानजनकत्वं किन्तूद्देश्य फलमेव, अतो भगवदज्ञानात् तेषां संसार एव स्थितिरिति वदता भगवता विधिमार्गो मुख्यतया स्थापितः न त्वविहितो मार्गो निन्दितः, अन्यथा 'मामेव यजन्ति', 'अहं हि सर्वयज्ञानां', 'लभते च ततः कामान् मयैव विहितान् हि तानि' ति न वदेत्, तस्मात् विधिस्तुतिपरमेवैतद्वाक्यं, अतः सुष्ठूक्तं **येऽप्यन्यदेवताभक्ता यद्यप्यन्यधियः** तथापि **त्वामेवोपासते** इति, नन्वेवं भ्रमं भगवानुत्पाद्य किमित्येवं फलं प्रयच्छति कथं सर्वानेव नैकविधान् करोतीत्याशङ्क्याह **प्रभो** इति, स हि सर्वप्रकारसमर्थः, तथापि च करोत्येव च नाना प्रकारान् ॥९॥

व्याख्यार्थ—इस प्रकार छः प्रकार के विशेष उपासकों का वर्णन करके 'सर्व एव' इस श्लोक से सामान्य रीति से साधारण देवों की उपासना करने वालों को बतलाते हैं। इस विषय में अधिक क्या कहें ? क्षेत्रपाल आदि के उपासक भी आप ही की उपासना करते हैं; क्योंकि 'अहं हि सर्वयज्ञानां भोक्ता', 'सर्वदेवमयश्चासावीश्वरश्च' (सारे यज्ञों का भोक्ता मैं ही हूं) इस वाक्य से आप सर्व देव-मय और देवों के भी ईश्वर हो। जो सर्व देवमय और ईश्वर होता है, उसे ही सर्व देवमयेश्वर कहा जाता है।

उन विभिन्न देवों के उपासकों की ऐसी बुद्धि तो भी हम भगवान् की उपासना कर रहे हैं, नहीं होती, तब वे सारे ही भगवान के ही उपासक कैसे कहे जा सकते हैं ? इस शंका के उत्तर में कहते हैं कि 'ये प्यान्य देवता भक्ता' यद्यपि वे यह समझते हैं कि हम आत्मा तथा विष्णु से भिन्न किसी अन्य देवता की ही उपासना करते हैं; तो भी वे अपने उपास्य देव को सबसे बड़ा मान कर ही उसकी उपासना करते हैं। वे ऐसा मान कर कि हमारा उपास्य देव निर्बल है, कुछ नहीं करता है तो उसकी उपासना नहीं करते। यदि वे उसे ऐसा समझलें तो उसकी उपासना करना ही छोड़ दें; क्योंकि दीन, निर्बल जान कर उसकी आराधना को भी नहीं करता। इसलिए निर्बल को बड़ा मान लेना रूप भ्रम से ही वे उन उन की उपासना करते रहते हैं और भ्रम में भगवान के धर्मों का ही उन क्षुद्र देवों में आरोप किया जाता है। इसलिए भगवान् की ही सेवा होती है; क्योंकि भगवान् की उपासना में और साधारण देव को भगवान् मानकर की जाने वाली (उसकी) उपासना में भगवान् के गुणों का आरोप तो समान ही होता है; किन्तु भेद इतना सा है कि क्षुद्र देव को भगवान् मान कर उसकी उपासना में किया जाने वाला आरोप अज्ञान से किया हुआ है।

जैसे जो कोई सीप को भ्रम से चांदी समझ लेता है, उसे चांदी का ज्ञान तो है ही। यदि वह कोई चाँदी को ही नहीं जानता हो तो (यह वह चाँदी है) उसका यह निर्णय भी भ्रमात्मक ही हो। चाँदी का ज्ञान हीन, चांदी का निर्णय नहीं कर सकता। 'वे मुझे तत्व से नहीं जानते'(गीता ६।२४) भगवान् ने जो यह कहा है, वह भी वे अविधिपूर्वक मेरा यजन करते हैं' (गीता ६।२३) इस वाक्य से विधि को लक्ष्य में रख कर ही कहा है, और जैसे प्रतिमा आदि में भगवान् का तथा उनके गुणों का आरोप किया जाता है, वैसे ही वे भिन्न भिन्न देवों के उपासक भी अपने अपने उपास्य देवों में भगवान् का और उनके गुणों का आरोप तो करते हैं; परन्तु (वेदोक्त) विधिपूर्वक नहीं करते। इसी लिए उन्हें उससे ज्ञान नहीं होता, केवल उनके अभीष्ट फल की प्राप्ति ही हो जाती है और भगवान् के स्वरूप का ज्ञान होने के कारण वे संसार में ही रहते हैं। ऐसी आज्ञा (गीता (६ २४) करके भगवान् ने मुख्य रीति से विधि मार्ग का ही स्थापन किया है। विधिहीन उपासना मार्ग की निन्दा नहीं की है। यदि विधि रहित उपासना की (भगवान्) निन्दा करते होते तो मेरा ही पूजन करते हैं, सब यज्ञों का मैं भोक्ता हूँ—(६।२३, २४) और उन देवों से वे मेरे द्वारा ही निर्माण किये हुए फलों (कामनाओं) को (७।२२) को प्राप्त करते हैं। भगवान् इस प्रकार नहीं कहते, इसलिए यह (६।२३) अविधि पूर्वक उपासना बतलाना केवल विधि की प्रशंसा के लिए ही है। इसलिए 'अन्य देवों के भक्त और अन्य में बुद्धि रखने वाले भी उपासक आपका पूजन करते हैं, यह जो कहा गया है, वह उचित -सत्य- ही कहा है।

भगवान् इस प्रकार भ्रम उत्पन्न करके इस तरह से फल कैसे देते हैं ? सभी जीवों को एक ही

प्रकार के क्यों नहीं करते ? ऐसी शंका के समाधान के लिए ही श्लोक में 'प्रभो' यह सम्बोधन पद दिया है। तात्पर्य यह है कि भगवान् सब प्रकार से सब ही करने में समर्थ हैं। वे यद्यपि सब जीवों को एक ही प्रकार के बनाने, सबसे एक सी ही उपासना कराने और एक सा ही फल प्राप्त करने देने में शक्तिवाले हैं; किन्तु फिर भी विभिन्न प्रकार के जीवों को उत्पन्न करते ही हैं।

श्लोक—**यथाद्रिप्रभवा नद्यः पर्जन्यपूरिताः प्रभो ।**
विशन्ति सर्वतः सिन्धुं तद्वत् त्वां गतयोऽन्ततः ॥१०॥

श्लोकार्थ—हे भगवान् ! जिस तरह पर्वतों से निकली हुई नदियाँ वर्षा ऋतु में जल प्रवाह से परिपूर्ण होकर चारों ओर से आकर समुद्र में ही प्रवेश करती हैं, वैसे ही अन्त में सब सिद्धान्तों का स्थान (केन्द्र) आप ही हैं ॥१०॥

सुबोधिनी—ननु तत्तदुपासकानां तत्तद्देवतासायुज्यस्योक्तत्वात् कथं प्रमेयबलविचारेण तेषां गत्यभाव इति चेत् तत्राह **यथाद्रिप्रभवा** इति. साधनपरं चैतद्वाक्यं, 'आकाशात् पतितं तोयं यथा गच्छति सागरं। सर्वदेवनमस्कारः केशवं प्रति गच्छती'ति वाक्यात्, प्रमेयबले च तेषां भगवत्सा-युज्यमेव यदि निष्कामाः,परम्परा कालविलम्बश्च भवति, यथा भूतोपासकाःभूतसायुज्यं प्राप्नुवन्ति, ततो भूतानि महादेवसायुज्यं महादेवो भगवत्सा-युज्यमिति, एवं विहितानामविहितानां वा साक्षात् परम्परया वा भगवत्सायुज्यमेव फलमिति यथा सर्वासामेव पर्वत**प्रभवानां** नदीनां मेघैरा-**पूर्यमाणानां सिन्धुरेव** प्रवेशस्थानं चतुर्दिक्षु न त्वन्यः कश्चित् प्रवेशयोग्यो भवति **तद्वदेव** नदी-प्राया जीवगणाः सहजेन पर्वतजलेनागन्तुकेन वा वृष्टिजलेन **पूरिता** भवन्ति तथा विधिना अविधिना च **पूरिता** जीवा जन्मकोटिभिः भगवत्सायुज्यमेव प्राप्नुवन्ति, तथाभूतानामपि फलं साधयतीति ज्ञापनार्थं **प्रभो** इति, **गतयः** फलानि **अन्ततः** त्वय्येव **विशन्ति** ॥१०॥

व्याख्यार्थः—अब उन उन विभिन्न देवों के उपासकों को उन उन अपने उपास्य देवों का सायुज्य प्राप्त होना कहा गया है, तब तो उन्हें फिर प्रमेय बल के विचार से फल (भगवान्) की प्राप्ति नही (कैसे) होती होगी ? इस शंका के समाधानार्थ यह "यथाद्रिप्रभवा" श्लोक कहते हैं। जैसे आकाश से गिरा हुआ जल सागर में जाता है, वैसे ही सब देवों के लिए किया हुआ नमस्कार केशव को पहुँचता है" इस वाक्य के अनुसार उन उन देवों के उपासकों को उन उन के सायुज्य को प्राप्त होने की बात (गीता ९।५) साधन को ध्यान में रख कर कही गई है। यदि वे उपासक निष्काम होते हैं तो उन्हें तो प्रमेय बल के विचार से भगवान् का सायुज्य ही प्राप्त होता है; किन्तु उसमें जैसे भूतों के उपासक भूतों के सायुज्य को पाकर फिर वे भूत महादेव का सायुज्य और महादेव को भगवान् का सायुज्य होने की परम्परा है,वैसे ही परम्परा तथा समय का विलम्ब होता है।

इस प्रकार विधि से अथवा विधि के बिना भी उपासना करने वाले उपासकों को साक्षात् तथा परम्परा से भगवान् का सायुज्य ही फल मिलता है। जैसे पर्वतों में से निकली हुई और मेघों के जल से परिपूर्ण (उमड़ी) हुई सारी ही नदियों के प्रवेश करने योग्य स्थान चारों दिशाओं में केवल एक समुद्र ही है, किन्तु उनके प्रवेश (समाने) के योग्य दूसरा कोई नहीं है, वैसे ही जीवों के समूह भी

नदियों के समान हो हैं। नदियाँ जैसे पर्वत, के स्वाभाविक जल से अथवा आकर मिले हुए वर्षा के जल से उमड़ जाती हैं, वैसे ही विधि से विधि बिना भी उपासना करने वाले जीव करोड़ों जन्म लेकर भगवान् के सायुज्य को ही प्राप्त (होते हैं) करते हैं। ऐसे उपासक जीवों को भी आप फल प्रदान करते हो, इस बात को बतलाने के लिए मूल में 'प्रभो' यह सम्बोधन दिया है। अन्त में वे आपमें ही प्रवेश रूप फलों को प्राप्त करते हैं ।।१०।।

श्लोक—**सत्त्वं रजस्तम इति भवतः प्रकृतेर्गुणाः।**
तेषु हि प्राकृताः प्रोता आब्रह्मस्थावरादयः ।।११।।

श्लोकार्थः—क्योंकि सत्त्व, रजस्, तमस् आपकी माया के गुण हैं और ब्रह्मा से लेकर तृण तक सब जीव उन्हीं गुणों से ओत-प्रोत (युक्त) हैं। इस प्रकार उपाधि धारी सारे देवगण गुणों में, गुण प्रकृति में और वह प्रकृति आप में प्रविष्ट है ।।११।।

सुबोधिनी—किञ्च, उत्पत्तिविचारेणापि त्वत्त एवोत्पन्ना त्वय्येव विशन्ति त्वमेवेति कथं तेषां त्वत्सायुज्यं न भवेत्, न ह्यन्यः कश्चिदस्ति, तदाह **सत्त्वमिति**, त्वमेव प्रकृतिः अतो **भवतः प्रकृतेस्त्व**दीयाया वा **सत्त्वं रजस्तम इति** त्रयो **गुणाः तेषु** सर्व एव **प्राकृताः** प्रकृतिप्रकारेणोत्पादिताः **तेषु** गुणेषु **प्रोताः ब्रह्मावधिस्थावरान्ताः**, अतः सर्वेषामेव गुणे लयः गुणाः प्रकृतौ प्रकृतिस्त्वयि, त्वमेव वा ।।११।।

व्याख्यार्थ—और सब पदार्थों की उत्पत्ति के विचार से भी वे सब आपसे ही उत्पन्न हुए हैं; आप में ही प्रवेश पाते हैं और आप ही हैं। तब वे फिर आपके सायुज्य को प्राप्त कैसे नहीं होते ? क्योंकि आपके बिना कोई दूसरा है ही नहीं, यह इस "सत्त्वं" श्लोक से कहते हैं।

आप ही प्रकृति हो। इसलिए आप प्रकृति के अथवा आपकी प्रकृति के सत्व, रजस और तामस ये तीन गुण हैं। इन तीनों गुणों में प्राकृत (प्रकृति के प्रकार से उत्पन्न हुए) स्थावर से लेकर ब्रह्मा पर्यन्त सारे पदार्थ ओत-प्रोत हैं। इस कारण से सबों का गुणों में लय होता है। गुणों का प्रकृति में और प्रकृति का आप में लय होता है। अथवा आप ही प्रकृति हो ।।११।।

श्लोक—**तुभ्यं नमस्तेस्त्वविषक्तदृष्टये सर्वात्मने सर्वधियां च साक्षिणे।**
गुणप्रवाहोयमविद्यया कृतः प्रवर्तते देवनृतिर्यगात्मसु ।।१२।।

श्लोकार्थ—इस प्रकार प्रकृति से सम्बन्ध होने पर भी आपकी दृष्टि किसी में आसक्त नहीं होती। आप सब की आत्मा हैं और सब की बुद्धियों के साक्षी हैं। आपको आपकी प्राप्ति के लिए नमस्कार हो ।।१२।।

अविद्या से किया हुआ यह गुणों का प्रवाह देवों, मनुष्यों और पशु पक्षियों की देह को धारण वाले सभी पर प्रवृत्त हो (पड़) रहा है (आप गुणों से परे हैं, आप पर उनका प्रभाव नहीं है)।

सुबोधिनी—एवं सूपपत्तिकं प्रमाणं भगवद्-विषयकं सफलं निरूप्य प्रमाणतः प्रमेयतश्च महत्त्वं निरूप्य नमस्यति **तुभ्यमिति**, अन्यथा महत्त्वं हृदयारूढं नेति शङ्का स्यात् तदर्थं माहात्म्यमुक्त्वा नमस्कर्तव्यं, **तुभ्यमे**ताहृशाय **नमः**, **ते तुभ्यं** त्वदर्थमेव त्वमेव फलमित्यर्थः, एवं त्वन्नमस्कारे त्वमेव फलं भवसीति प्रार्थयति **अस्त्विति**, नन्ववतीर्णोऽहं तद्धर्मैर्व्याप्त इति किं मम नमस्कारेणेत्यत आह **अविषक्तदृष्टय** इति, न विषक्ता दृष्टिर्यस्य, क्वापि धर्मेषु भगवद्दृष्टिर्न विषज्जते, तत्र हेतुः **सर्वात्मन** इति, अन्यस्मिन् हि आसक्तिर्भगवांस्तु सर्व एव, आत्माशक्तिरुत्तमैव, अनेन स्वापराधोपि परिहृतः, प्रमाणं चाह **सर्वधियां च साक्षिण** इति, सर्वबुद्धीनां द्रष्टा, अन्तर्बहीरूपत्वं चोक्तं, चकारादात्मनः प्राणादीनां च, यो हि सर्वात्मा भवति तस्यान्याध्यासो न भवति, यो वा सर्वसाक्षी स कर्ता न भवति, यस्त्वेताहृशः स विषक्तदृष्टिर्न भवति क्वापि, अतो भगवति नान्यधर्मसम्बन्धः, अन्यधर्माभावाच्च, तर्हि कस्यापि न स्यादित्याशङ्क्य यस्याविद्या तस्य भवतीत्याह **गुणप्रवाह** इति, **अयं गुणानां प्रवाहः अविद्ययैव देवनृतिर्यगात्मसु** त्रिविधेषु सात्त्विकराजसतामसेष्वेव **प्रवर्तते** न तु गुणातीते ब्रह्मणि, तेषां तु असकृदेव यावदविद्या न निवर्तत इति ॥१२॥

व्याख्यार्थ—इस प्रकार युक्ति पूर्वक भगवत्सम्बन्धी प्रमाण का फल सहित निरूपण करके तथा प्रमाण और प्रमेय (स्वरूप) से भगवान् सबसे उत्तम हैं, यह सिद्ध करके इस श्लोक 'तुभ्यनमस्ते' से उनके लिए नमस्कार करते हैं। यदि भगवान् को नमस्कार नहीं किया जाए तो ऐसी शंका हो सकती है कि भगवान् की उत्तमता का ज्ञान अक्रूर के हृदय में दृढ नहीं हैं। इसलिए (भगवान् की) उत्तमता बतला कर ही नमस्कार करना चाहिए। ऐसे सर्वरूप आपको नमस्कार हो। (मुझे) आपकी प्राप्ति हो, इसलिए आपको नमस्कार हो; क्योंकि आप ही फल हैं। इस प्रकार आपको नमस्कार करने से आप ही फल रूप हो जाते हो। इसलिए प्रार्थना करते हैं कि आपको नमस्कार हो।

भगवान् कदाचित् ऐसी आज्ञा करें कि मैंने तो प्रकृति के गुणों से प्राप्त होकर अवतार (धारण) लिया है, इसलिए प्राकृत मुझे नमस्कार करने से क्या लाभ है? तो इसके उत्तर में कहते हैं कि आप (भगवान्) की दृष्टि किसी भी पदार्थ में आसक्त नहीं है। भगवान् की दृष्टि सत्त्व आदि गुणों में किसी भी स्थान पर आसक्त नहीं होती हैं; क्योंकि वे तो सभी की आत्मा हैं। वे सर्वरूप सर्वात्मा हैं। इसलिए उनसे दूसरा कोई पदार्थ ही नहीं है, जिसमें उनकी दृष्टि -बुद्धि- आसक्त हो। अपने (आत्मा) आपमें आसक्ति तो उत्तम ही है। इस कथन से अक्रूर ने अपना अपराध भी दूर कर दिया।

इसमें प्रमाण रूप से कहते हैं कि आप सब बुद्धियों के द्रष्टा-देखने-(जानने) वाले हो। भगवान् सबकी बुद्धियां के जानकार हैं। इस प्रकार से सर्वात्मा और सबकी बुद्धियों के द्रष्टा कह कर भगवान् के भीतरी और बाहरी रूप का वर्णन किया है। भगवान् सब की बुद्धियों और आत्मा तथा प्राणादिकों के भी द्रष्टा (जानकार) हैं; क्योंकि जो सब की आत्मा होता है उसका किसी अन्य पदार्थ में अध्यास (मिथ्या-ज्ञान)नहीं होता, जो सबका साक्षी होता है, वह कर्ता नहीं होता और जो सबका साक्षी-द्रष्टा-

होता है, उसकी दृष्टि किसी में आसक्त नहीं होती। भगवान् में चूंकि अन्य के धर्म नहीं है, इस कारण से उनका अन्य के धर्मों का सम्बन्ध भी नहीं है।

तब तो किसी को भी अन्य के अविद्या आदि के धर्मों का सम्बन्ध नहीं होता होगा ? ऐसी बात तो नहीं है; किन्तु जिसमें अविद्या (अज्ञान) होता है, उसीका अन्य के धर्मों का सम्बन्ध होता है। इसलिए यह गुणों का सम्बन्ध देव, मनुष्य और पशु पक्षी आदि सात्विक, राजस तथा तामस जीवों में ही बार बार बना ही रहता है जब तक अन्य गुणों का सम्बन्ध भी दूर नहीं होता; किन्तु गुणों से पर, परमात्मा में तो अन्य का जरा भी सम्बन्ध नहीं है ॥१२॥

श्लोक—**अग्निर्मुखं तेवनिरङ्घ्रिरीक्षणं सूर्यो नभो नाभिरथो दिशः श्रुतिः।**
द्यौः कं सुरेन्द्रास्तव बाहवोर्णवाः कुक्षिर्मरुत् प्राणबलं प्रकल्पितम् ॥१३॥

श्लोकार्थ—अग्नि आपका मुख है। पृथ्वी आपके चरण हैं; सूर्य नेत्र और आकाश नाभि है। सब दिशाएँ आपके कान हैं। स्वर्गलोक आपका मस्तक है। उत्तम देवगण आपकी भुजा और समुद्र कोखें हैं। वायु आपका प्राण और कर्म (आपका) बल हैं ॥१३॥

सुबोधिनी—एवं निर्दोषत्वं उक्त्वा माहात्म्यं निरूप्य नमस्कृत्य अवयवानां स्वरूपमाह **अग्निर्मुखमिति**, सर्वदेवतात्मको भगवानिति वक्तुं सर्वे अवयवाः देवतात्वेन निरूप्यन्ते, यो **अग्नि** स **ते मुखं**, या **अवनिः** भूमिः सा **ते अङ्घ्रिः**, यः **सूर्यः** स **ते ईक्षणं** चक्षुः, **नभ**स्त्वाकाशः **नाभिः**, एतानि महाभूतान्यपि भवन्तीति केवलं देवता एवाग्रे निरूप्यन्ते, **अथो** इति **दिशस्ते श्रुतिः** श्रोत्रम् **द्यौः** स्वर्गः **ते कं** शिरः, **सुरेन्द्रास्ते बाहवः**, **अर्णवाः** समुद्रा ते **कुक्षिः**, **मरुद्** वायुस्ते **प्राणः**, स्थूलरूप एवायं सूक्ष्मरूप इति ज्ञात्वा तथा निरूपयति न तु पुरुषोत्तममेनं जानाति, यत् किञ्चित् **प्रकल्पितं** लोके कृतिसाध्यं तत् ते **बलम्** ॥१३॥

व्याख्यार्थ—इस प्रकार से भगवान् की निर्दोषता का, महिमा का निरूपण पूर्वक उन्हें नमस्कार करके अब 'अग्निर्मुखं' इस श्लोक से उनके अवयवों का स्वरूप कहते हैं। भगवान् सभी देवता रूप हैं। इसलिए उनके सारे अवयवों का देवता रूप निरूपण किया जाता है। जो अग्नि है, वह आपका मुख है। जो पृथ्वी है, वह आपका चरण है। जो सूर्य है, वह आपकी चक्षुः है और आकाश आपकी नाभि है।

ये अग्नि आदि महाभूत भी हैं। इसलिए आगे केवल देवतों का ही निरूपण करने के अभिप्राय से मूल में अथो यह व्यवच्छेदक पद का प्रयोग किया है। दिशायें आपके कान हैं। द्यौः -स्वर्ग- आपका मस्तक है, उत्तम देवगण आपकी भुजाएँ और समुद्र उदर है। पवन आपका प्राण है। अक्रूरजी इस स्थूल रूप वाले भगवान् को ही सूक्ष्म रूपवाला जान कर इस प्रकार से निरूपण करते हैं। वह भगवान् को पुरुषोत्तम नहीं जानते हैं। जो कुछ यहाँ प्रकल्पित कर्म हैं, वह आपका बल है ॥१३॥

श्लोक—**रोमाणि वृक्षौषधयः शिरोरुहा मेघाः परस्यास्थिनखानि तेद्रयः ।**
निमेषणं रात्र्यहनी प्रजापतिर्मेढ्रस्तु वृष्टिस्तव वीर्यमिष्यते ॥१४॥

श्लोकार्थ—वृक्ष और औषधियाँ आपकी रोमावलि रोंगटे हैं । मेघ आपके केश हैं, पर्वत आपकी हड्डियाँ और नाखून हैं, रात-दिन आपकी पलकें खुलना, मूँदना है । सब प्रजापति परब्रह्म आपकी गुप्तेन्द्रिय हैं और वृष्टि आपका वीर्य है ॥१४॥

सुबोधिनी-रोमाणीति, **वृक्षौषधयस्ते रोमाणि**, **मेघाः शिरोरुहाः**, ननु बाधितोयमर्थः कथमुच्यत इत्याशङ्क्य सर्वसमाधानार्थं च निरूपयति **परस्य त** इति, त्व परः स्वराट् परं ब्रह्म वा, **अद्रयस्ते अस्थिनखानि च**, **रात्र्यहनी तु** प्रजापतेः संवत्सरात्मकस्य कालस्य **ते निमेषणं** निरीक्षणं, निमीलनं रात्रिरुन्मीलनमहरिति, **प्रजापतिस्ते मेढ्रं** गुह्यमिन्द्रियम्, **वृष्टिस्तु तव वीर्यम्**, तुशब्दस्तु केशाम्बुत्वं व्यावर्तयति, ननु कथं साध्यसाधनयोर्विरुद्धरूपत्वमित्याशङ्क्य प्रमाणमाह **इष्यत** इति, प्रामाणिकानामियमिष्टिः, दिवि चलन्तीति मेघानां केशत्वं, वृष्टिः सर्वोत्पत्तिसाधनमिति रेतस्त्वं तस्य चोच्यते ॥१४॥

व्याख्यार्थ—वृक्ष और औषधियाँ आपके रोम हैं । मेघ आपके केश हैं । यह कथन तो प्रमाण से विरुद्ध है, इसलिए यों नहीं कहना चाहिए । ऐसी शङ्का के तथा यहाँ किए गए सारे वर्णन के समाधान के लिए कहते हैं कि भगवान् पर हैं । आप अपने आप (स्वतः) प्रकाश तथा पर ब्रह्म हो ।

पर्वत आपके अस्थि (हड्डियाँ) और नख हैं । रात-दिन सम्वत्सरात्मक कालरूप आपके नेत्रों के पलकों का बन्द करना और खोलना है । पलक का मूँदना रात और पलक का खोलना दिन है । प्रजापति आपकी गुप्त इन्द्रिय है और वृष्टि तो आपका वीर्य है । मूल में 'तु' शब्द से यह बतलाते हैं कि वृष्टि आपके केशरूप मेघों का जल नहीं है ।

यद्यपि मेघों से ही वृष्टि होती है, वृष्टिरूप कार्य का मेघ ही कारण है और मेघ भगवान् के केश हैं, तब वृष्टि को केशों का कार्य कहना कैसे सम्भव है ? क्योंकि वृष्टि केश का जल है, यह कैसे हो सकती है ? इसके उत्तर में कहते हैं कि प्रमाणिक लोगों की -इष्यते- ऐसी ही मान्यता है; क्योंकि मेघ आकाश में चलते हैं,इस कारण से मेघ भगवान् के केश हैं और वृष्टि को सबकी उत्पत्ति का साधन होने के कारण आपका वीर्य कहा है; सर्वथा उचित ही है ॥१४॥

लेख—'रोमाणि' इस श्लोक की व्याख्या में -केशाम्बुत्वं- इस पद का तात्पर्य है कि केशों को मेघ कहने से वृष्टि केशों का जल होना मानी जा सकती है; किन्तु ऐसा नहीं । वृष्टि तो भगवान् का वीर्य है ।

श्लोक—**त्वय्यव्ययात्मन् पुरुषे प्रकल्पिता लोकाः सपाला बहुजीवसङ्कुलाः ।**
यथा जले सञ्जिहते जलौकसोप्युदुम्बरे वा मशका मनोमये ॥१५॥

श्लोकार्थ— जैसे जल में उत्पन्न हुए असंख्य जल जन्तु, गूलर फल में अनन्त सूक्ष्म जीव और मनोरथ में असंख्य जीव एक साथ रहते हैं, इसी तरह असंख्य जीवों से भरे हुए -पूर्ण- ये सारे लोक और लोक पाल विकार शून्य आत्म स्वरूप पुरुष आपके श्रीअङ्ग में विरचित हैं ।।१५।।

सुबोधिनी--एवमवयवान् निरूप्य सर्वलोकाधारत्वं निरूपयति **त्वय्यव्ययात्मन्निति**, एतेषामाधारत्वेन उपचयापचयावाशङ्क्य **पुरुषरूपे** त्वयि 'पातालमेतस्य हि पादमूल'मिति न्यायेन **अव्ययात्मनि सर्वे लोकाः प्रकल्पिताः** विशेषेण रचिताः, भगवतो भारमाशङ्क्य दृष्टान्तमाह **यथा जले सञ्जिहत** इति, जले मत्स्यादिजीवास्तिष्ठन्तीति न तावतापि तस्य कश्चन भारो भवति, एवं भगवत्यपि सर्वे **लोकाः सञ्जिहते** संहतास्तिष्ठन्ति, अचेतनस्य जलस्य दृष्टान्तो विषम इति चेतनमाह **उदुम्बरे वा यथा मशका** इति, एकैकस्मिन् फले कोटिशो **मशकाः** तत्रैवोत्पन्नास्तत्र तिष्ठन्ति, एकत्र वहवश्च भवन्ति, यथा **जलौकसां** जलमेव स्थानं तथोदुम्बर एव मशकानामपि, एतदपि प्रत्यक्षसिद्धं न भवति को वेदोदुम्बरस्य मशकैः क्लेशोऽस्ति न वेति, शरीरावयवेषु जीवानां स्थितौ तत्रोत्पन्नानामपि क्लेशो भवतीत्याशङ्क्य दृष्टान्तान्तरमाह **मनोमय** इति, मनोरथे यथा जीवा विषयाश्च मनसः सुखदा एव भवन्ति न तु भाररूपाः, तथा भगवत्यपि सुखार्थमेव **कल्पिताः** ते **लोका**स्तिष्ठन्ति न तु भाररूपा भवन्ति ।।१५।।

व्याख्यार्थ—इस प्रकार भगवान् के अवयवों (अङ्गों) का वर्णन करके-भगवान् सारे लोकों के आधार हैं'–यह इस 'त्वय्यव्ययात्मन्' श्लोक से निरूपण करते हैं। भगवान् यदि इन सब लोकों के आधार हैं तो उन में वृद्धि-ह्रास (कमी वेशी) होती होगी ?

ऐसी शङ्का करके कहते हैं कि–"पाताल आपके चरण का तलवा है (२।१।२६)" इस न्याय से विकार रहित आत्मा पुरुष रूप आप (भगवान्) में सारे ही लोक अच्छी तरह रचित-कल्पित–हैं।

जब इन सब लोकों के आधार भगवान् ही हैं, तो उन्हें इन लोकों का भार लगता होगा ? इस शङ्का का समाधान दृष्टान्तों के द्वारा करते हैं। जैसे जल में असंख्य मछली आदि जल जन्तुओं के रहने पर भी जल को उन का कुछ भार नहीं होता, वैसे ही भगवान् में भी सारे लोक बिना भार हुए इकट्ठे रह रहे हैं।

दुःख अथवा भार तो चेतन को ही होता है और जल तो अचेतन है। जड़ को बोझा अथवा दुःख लगता ही नहीं हैं। इस लिए जल जड़ का दृष्टान्त -विषम योग्य नहीं-है। इस विचार से दूसरा चेतन का दृष्टान्त देते हैं। जैसे गूलर के फल में अनेक प्राणी उत्पन्न होते और उसी में रहते हैं; किन्तु उन प्राणियों का भार अथवा दुःख गूलर को जरा भी नहीं होता, वैसे ही भगवान् को भी सारे लोकों का भार नहीं लगता है। और जैसे सारे जलचरों का जल ही तथा सारे मच्छरों का गूलर का फल ही एक मात्र निवास स्थान है वैसे ही सब लोकों का एक मात्र भगवान् ही आधार है।

गूलर के भीतर उत्पन्न होकर उसी में रहने वाले उन असंख्य जीवों का भार लगता है अथवा नहीं होता, यह बात तो प्रत्यक्ष प्रमाण से सिद्ध नहीं है। शरीर के अवयवों में उन्हीं के भीतर उत्पन्न

हुए जीवों के रहने से भी दुःख तो होता ही है ? ऐसी शङ्का करके दृष्टान्त के द्वारा समाधान करते हैं कि जैसे मनोरथ में जीव और विषय मन को सुख देने वाले ही हैं, कभी भार भूत नहीं होते, वैसे ही भगवान् में भी सुख के लिए रचना किए हुए, वे लोक रह रहे हैं; किन्तु भार रूप नहीं होते ॥१५॥

श्लोक—**यानि यानीह रूपाणि क्रीडनार्थं बिभर्षि हि ।**
तैरामृष्टशुचो लोका मुदा गायन्ति ते यशः ॥१६॥

श्लोकार्थ—पृथ्वी पर क्रीड़ा करने के लिए आप जिन-जिन रूपों से प्रकट होते हो, उनसे लोगों का कल्याण ही होता है । आपके उन अवतारों से लोगों के दुःख दूर हो जाते हैं और वे प्रसन्न होकर आपके पवित्र यश का गान करते हैं ॥१६॥

सुबोधिनी—एवं भगवदवयवानां सर्वाधारत्वं सर्वदेवतारूपत्वं च निरूप्य तादृशस्य महतः लोके जुगुप्सितरूपेणावतरणं न युक्तमित्याशङ्क्य अवतारप्रयोजनमाह **यानि यानीति**, हे भगवन् नानाविधक्रीडार्थं जले स्थले अरण्ये सर्वत्र क्रीडनार्थं मत्स्यादिरूपाणि करोषि, तावतापि न तेषां रूपाणां लोके निन्दा, किन्तु **यानि यानि रूपाणि** त्वं **बिभर्षि, क्रीडार्थं** कृतत्वात् तव नातीवादरः, तथापि तैः रूपैः **आमृष्टशुचः** सर्वतो नाशितशोकाः सर्वं एव **लोकाः ते यशो मुदा गायन्ति, अतो** लोकानां गानार्थं तव चरित्रं तेन च सर्वपुरुषार्थसिद्धिः, सर्वेषां दुःखनाशार्थमवताराणि चेत्युक्तम्, **मुदा गायन्तीत्यनेन** चरित्राणां स्वतः पुरुषार्थता च निरूपिता ॥१६॥

व्याख्यार्थ—इस प्रकार भगवान् के श्री अवयवों को सब का आधार और सारे देवता रूप बतलाकर ऐसे परम महान् भगवान् का लोक में निन्दनीय रूपों से अवतार लेना उचित नहीं है ? ऐसी शङ्का करके इस 'यानि यानीह' श्लोक से उनके अवतार लेने के प्रयोजन का वर्णन करते हैं । उद्धवजी कहते हैं कि हे भगवान् आप अनेक प्रकार से क्रीड़ा करने के लिए जल-थल और वन में सभी जगह मछली आदि के रूपों को धारण करते हो । आपके उस कार्य से लोक में उन रूपों की निन्दा नहीं होती है; किंतु जिन जिन रूपों को आप धारण करते हो, उन्हे आप क्रीड़ा के लिए ही लेते हो । इस लिये यद्यपि उन रूपों में आप विशेष आदर नहीं रखते हो; तो भी उन रूपों के चिन्तन से लोकों के सभी शोक दूर हो जाते हैं और वे सारे ही लोक प्रशन्न होकर आपके यश को गाते हैं । इस लिए लोकों के गान करने के लिए ही आपके सारे चरित्र हैं और उन्हें आपके चरित्रों के गान से सारे पुरुषार्थ प्राप्त हो जाते हैं । आपके अवतार सब लोकों के सभी दुःखों का नाश करने के लिए हैं । आनन्द से गाते हैं इस कथन से बतलाया है कि आपके चरित्र स्वतः पुरुषार्थ रूप हैं ॥१६॥

श्लोक—**नमः कारणमत्स्याय प्रलयाब्धिचराय च ।**
हयशीर्ष्णे नमस्तुभ्यं मधुकैटभमृत्यवे ॥१७॥

श्लोकार्थ—आप कारणवश मत्स्य रूप धारण करके प्रलय के समुद्र में विचरते रहे। आपने हयग्रीव रूप धारण किया और मधु तथा कैटभ नाम के राक्षसों को मारा। आपको बारम्बार प्रणाम है ॥१७॥

सुबोधिनी—यद्यप्यनन्तानि रूपाणि तथापि प्रसिद्धानि कानिचित् गणयन् महत्त्वख्यापनाय सर्वत्र नमस्यति **नमः कारणमत्स्यायेति, मत्स्याय** ते **तुभ्यं नमः**, ननु निन्दितो मत्स्यः किमिति भगवान् जात इत्याशङ्क्याह **कारणे**ति, यदा मत्स्या जाताः तदा बीजत्वेन कश्चिन्मत्स्यः पूर्वसिद्धः कारणत्वेनाङ्गीकर्तव्यः,अन्यथा मत्स्यानामुत्पत्तिर्न स्यात्, उदुम्बरादिषु मांसेषु वा जीवानामुत्पत्तौ कारणभूतरूपस्य तत्र स्थितिरवश्यमङ्गीकर्तव्या, अन्यथा कारणता भज्येत, अनेन जगति यावन्ति रूपाणि तावन्ति रूपाणि भगवतः कारणरूपाणीति न भगवतः कस्मिंश्चिद्रूपे गृहीते विगान भवति, कारणार्थं वा प्रलये सत्यव्रतरक्षा वेदोद्धारश्च कार्यं तदर्थं मत्स्य इति तस्मै **नमः**, तदपि रूपमुपास्यमिति, **प्रलय**कालीनो यो**ब्धिः** तस्मिंश्चरतीति चरित्रं सत्यव्रतरक्षात्मकं, वेदोद्धारः रूपद्वयेन कृत इति हयग्रीवरूपं च कृतवानित्याह **हयशीर्ष्णे** इति, **हयस्य** शिर इव शिरोभाग एव, अङ्गं तु पुरुषरूपमेव,हयग्रीवावतारेण कृतं चरित्रमाह **मधुकैटभयोः मृत्युरिति, मधुकैट**भौ तेन रूपेण हताविति, **मृत्युत्वात्** स्वत एवोत्पन्नयोरपि वधे न कश्चिद्दोषः, अत्युपकारित्वात् तस्मै ते **तुभ्यं** सर्वदा **नमो**स्त्विति प्रार्थयति ॥१७॥

व्याख्यार्थ--यद्यपि भगवान् के अनन्त रूप हैं, तो भी उनमें से कुछ प्रसिद्ध रूपों की गणना पूर्वक उत्तमता बतलाने के लिए 'नमः' इस श्लोक से उन्हें -प्रणाम-नमन करते हैं। आप मत्स्य को नमस्कार हो। मत्स्य तो निन्दित है। भगवान् निन्दित ऐसे मत्स्य क्यों हुए ? ऐसी शंका के उत्तर में कहते हैं कि भगवान् कारण मत्स्य है। जब मच्छ उत्पन्न हुए, तब उनका बीज रूप से कोई मत्स्य पहले कारण रूप से मानना ही होगा। यदि पहले बीज रूप किसी मत्स्य को आदि कारण नहीं मानेंगे तो मच्छलियों की उत्पत्ति ही नहीं होगी। गूलर के फलों में अथवा मांस आदि में जहां जीवों की उत्पत्ति होती है, वहाँ भी उनकी उत्पत्ति के कारण से पहले रहने वाला कोई रूप अवश्य स्वीकार करना ही होगा। यदि ऐसा नहीं मानेंगे तो प्रत्येक कार्य का कारण अवश्य ही होना चाहिए, इस नियम का भङ्ग हो जायगा।

इसलिए यह मान लेना चाहिए कि जगत् में जितने भी रूप हैं, उन सबका कारण रूप भगवान् हैं; क्योंकि श्रुति कहती है कि (स एव सर्वाणिरूपाणि बिभर्ति) वही सब रूपों को धारण करता है। इन नाना रूपों के धारण कर लेने में भगवान् का कुछ भी नहीं बिगड़ता हैं। अथवा भगवान् ने कारण वश मच्छ का रूप धारण किया है अर्थात् प्रलय में सत्यव्रत राजा की रक्षा और वेदों का उद्धार करना रूप कार्य के लिए मत्स्य बने भगवान् को नमस्कार करते हैं, क्योंकि वह रूप भी उपासना करने योग्य ही है। प्रलय काल के समुद्र में वह मत्स्य फिरता है, ऐसा उनका राजा सत्यव्रत की रक्षा रूप चरित्र हैं।

वेदों का उद्धार दो रूपो से किया है। इस लिए हयग्रीवरूप-जिस में केवल सिर ही घोड़े का

सा था और शेष सारा अङ्ग मनुष्य का ही था-वह भी आपने ही धारण किया है और इस हयग्रीव अवतार से आपने मधुकैटभ नाम के दैत्यों का नाश रूप चरित्र किया है। भगवान् मृत्यु (काल) रूप हैं, इस लिए भगवान् के ही काल से उत्पन्न होने वाले भी इन दोनों को मार देने में कोई दोष नहीं है। यह अवतार जगत् का अत्यन्त उपकारक है। इसलिए हयग्रीव रूप आपको सदा नमस्कार हो,प्रार्थना करते हैं ॥१७॥

श्लोक—**अकूपाराय बृहते नमो मन्दरधारिणे ।**
क्षित्युद्धारविहाराय नमः शूकरमूर्तये ॥१८॥

श्लोकार्थ—अत्यन्त विशाल कच्छप रूप को धारण करके अपनी पीठ पर मन्दराचल को धारण कर लेने वाले आपको प्रणाम हो। पृथ्वी का रसातल से उद्धार करने के लिए ही वराह रूप से क्रीड़ा करने वाले आपको प्रणाम हो ॥१८॥

सुबोधिनी—कूर्मं नमस्यति **अकूपारायेति**, **अकूपाः** अनिम्नाः **आरा** रेखा यस्येति कूर्मः, योगप्राधान्यात् समुद्रवत् कूर्मस्यापि वाचकः **अकूपारः** शब्दः, समुद्रादप्यधिक इति जलचरत्वदोषपरिहारार्थमाह **बृहत** इति, अतिस्थूलाय, चरित्रमाह **मन्दरधारिण** इति, अमृतमथने मग्नं **मन्दरं** धृतवानिति **क्षित्युद्धारार्थमेव विहारो** यस्येति वराहरूपत्वेपि न काचित् क्षतिः, अत एव रूपात् प्रथमतः चरित्रमुक्तम्,**शूकररूपा मूर्तिर्यस्य** ॥१८॥

व्याख्यार्थ—'अकूपाराय' इस श्लोक में कच्छप और वराह को नमस्कार करते हैं (अकूपाः) ऊँची आराः) गतियों वाला अकूपार शब्द का व्युत्पत्ति से कच्छप अर्थ भी होता है और समुद्र अर्थ तो अकूपार शब्द का होता ही है। यह कछुआ तो समुद्र से भी विशाल था, अत्यन्त मोटा था। इस लिए जलचर होने का दोष उस में नहीं था। उसके चरित्र का वर्णन करते हैं कि अमृत के लिए समुद्र का मथन किया तब डूबते हुए मन्दराचल को इस कूर्म रूप ने पीठ पर धारण किया था।

केवल पृथ्वी का उद्धार करने के लिए ही क्रीड़ा करने वाले भगवान् को वराह रूप धारण कर लेने में भी कोई हानि नहीं है। इसी अभिप्राय से मूल श्लोक में रूप का वर्णन पहले न करके चरित्र का वर्णन पहले किया है। वराह (शूकर) के आकार वाली मूर्ति वाले आपको नमस्कार हो ॥१८॥

श्लोक—**नमस्तेऽद्भुतसिंहाय साधुलोकभयापह ।**
वामनाय नमस्तुभ्यं क्रान्तत्रिभुवनाय च ॥१९॥

श्लोकार्थ—हे सत्पुरुषों को निर्भय बनाने वाले भगवान्! आपने अद्भुत नरसिंह रूप धारण करके प्रह्लाद की रक्षा की है। आपको प्रणाम है। वामन अवतार लेकर तीन पेंड़ से त्रिभुवन को नाप लेने वाले आपको नमस्कार हैं ॥१९॥

सुबोधिनी—नमस्त इति, **अद्भुतसिंहो**र्ध्वसिंहः अर्धं च नरः, वचनप्रामाण्यात् स्तम्भाद् वा निर्गमादद्भुतत्वं, चरित्रमाह सम्बोधनेन, **साधुलो**कानां प्रह्लादादीनां **भयमपहन्तीति**, यद्यपि वामनोपि नावताररूपं किन्तूपेन्द्र एव, तथापि कार्यं तेन रूपेण कृतमिति **वामनायेत्युक्तम्**, **क्रान्तानि त्रिभुवनानि पदक्रमैर्येन, चेति** बलिबन्धनादिकमपि कृतवान् ।।१९।।

व्याख्यार्थ—अद्भुत सिंह (शरीर का ऊपर का सिंह का सा और नीचे का भाग मनुष्य जैसा) रूप धारण करने वाले अथवा भक्त प्रह्लाद के वचन को सत्य करने के लिए स्तम्भ से प्रकट हुए अद्भुत सिंह रूप लेने वाले आपको प्रणाम है। 'साधु लोग भयावह' इस सम्बोधन पद से चरित्र का वर्णन करते हैं कि आप सज्जनों के भय के दूर करने वाले हो।

अवतार लेने के समय में यद्यपि वामन रूप नहीं था, उपेन्द्र [इन्द्र के छोटे भाई] रूप ही था; तो भी अवतार का कार्य वामन रूप से ही किया था। इसलिए वामन रूप को नमस्कार करते हैं कि वामनजी को प्रणाम हो। उनके चरित्र का वर्णन करते हैं कि आपने तीन पेंड़ में तीनों भुवनों को नाप लिया था और बलि राजा का बन्धन आदि भी किया था ।।१९।।

श्लोक—नमो भृगूणां पतये दृप्तक्षत्रवनच्छिदे ।
नमस्ते रघुवर्याय रावणान्तकराय च ।।२०।।

श्लोकार्थ—भृगुपति परशुराम के रूप से अहङ्कारी क्षत्रियों के वन को काटने वाले आप को नमस्कार हो और राक्षस रावण का संहार करने वाले रामचन्द्र आप को प्रणाम हो ।।२०।।

सुबोधिनी—नम इति, **भृगूणां पतये** भार्गवोत्तमाय परशुरामाय, चरित्रमाह **दृप्तं** यत् **क्षत्रं** तदेव दैत्यत्वादतिप्रवृद्धं **वनरूपं** जातं तत् **छिन्त**तीति, **रघुवर्यः** रघुवंशोत्पन्नेषु श्रेष्ठो रामभद्रः, चरित्रमाह **रावणस्य अन्तकरायेति**, **च**कारादन्यदप्यनन्तमेव चरित्रं गृह्यते ।।२०।।

व्याख्यार्थ—भृगुओं के पति अर्थात् भृगुवंश में उत्पन्न होने वालों में श्रेष्ठ परशुराम रूप आपको प्रणाम हो। आप दैत्यों जैसे मदोन्मत्त क्षत्रियों के बढ़ते हुए कुल का नाश करने वाले हो और रघुवंश में उत्पन्न होने वालों में उत्तम रामचन्द्र रूप से अवतार लेकर रावण का संहार तथा अन्य अनन्त चरित्र करने वाले आपको प्रणाम हो ।।२०।।

श्लोक—नमस्ते वासुदेवाय नमः सङ्कर्षणाय च ।
प्रद्युम्नायानिरुद्धाय सात्वतां पतये नमः ।।२१।।

श्लोकार्थ—भगवान् वासुदेव को नमस्कार हो, संकर्षण को नमस्कार हो। प्रद्युम्न, अनिरुद्ध तथा वैष्णवों के स्वामी के लिए नमस्कार हो ।।२१।।

सुबोधिनी – भगवांश्चतुर्मूर्तिरवतीर्ण इति, भगवतः कृष्णस्यावतारे विशेषमाह **नमस्ते वासुदेवायेति**, अत्रादिमध्यावसानेषु नमनम्, **सङ्कर्षण** आवेशमपि भगवान् करोतीति तदपि रूपं **च**कारेण परिगृहीतं, चरित्रमाह **सात्वतां पतय** इति, समस्तभक्तानां **पतये** सर्वथा रक्षकाय, प्रार्थनाव्यतिरेकेणापि स्वकीयानां सर्वपुरुषार्थसिद्धयर्थमवतार इत्यर्थः ॥२१॥

व्याख्यार्थ—भगवान् (श्रीकृष्ण) ने चार मूर्ति से अवतार लिया है। भगवान् श्रीकृष्ण के अवतार के सम्बन्ध में 'नमस्ते' इस श्लोक से विशेष चिन्ह का वर्णन करते हैं। इस श्रीकृष्णावतार के सम्बन्ध में पहले, बीच में और अन्त में भी नमस्कार करते हैं। भगवान् अपने आवेश को भी सङ्कर्षण रूप में करते हैं, इसलिए आपने आवेश वाला सङ्कर्षण रूप भी धारण किया है। इस रूप से आप अपने सभी भक्तों की रक्षा करते हो तथा उनकी प्रार्थना के बिना ही उन्हें सारे पुरुषार्थों की प्राप्ति कराने -प्रदान करने- के लिए यह अवतार है ॥२१॥

श्लोक—**नमो बुद्धाय शुद्धाय दैत्यदानवमोहिने ।**
म्लेच्छप्राय क्षत्रहन्त्रे नमस्ते कल्किरूपिणे ॥२२॥

श्लोकार्थ—दैत्यों और दानवों को अपने उपदेश से मोहित करने वाले शुद्ध बुद्ध रूप आपको प्रणाम हो। म्लेच्छ प्राय कलियुगी क्षत्रियों का संहार करने वाले कल्कि रूप आपको प्रणाम हो ॥२२॥

सुबोधिनी—अग्रे जायमानमाह **नमो बुद्धायेति**, आर्षज्ञानेन यथा यथा पश्यति तथा तथा निरूपयति,भगवान् वा तं प्रति तथा तथा आत्मानं प्रदर्शयति, बुद्धो वेदादिनिन्दया विसदृशो भविष्यतीत्याशङ्क्याह **शुद्धायेति**, सर्वदोषरहिताय, तर्हि किमर्थं तथोक्तवानित्याशङ्क्य परिहरन् चरित्रमाह **दैत्यान् दानवांश्च मोह**यतीति,**दैत्यदानवानां** यो **मोहः** सोस्य वर्तत इति, अयं चेत् न प्रकटीकुर्यात् तदा मोहो न भवेदिति, मत्वर्थीय इन् प्रत्ययः, कल्किनं नमस्यति **म्लेच्छप्रायेति**, **क्षत्रं** रक्षकत्वेन स्थितं हन्तीति क्षत्रघ्नः **क्षत्रहन्ता**, तदा क्षत्रियाः **म्लेच्छ**रूपा इति **म्लेच्छप्राये**त्युक्तं, द्वयं भिन्नतया निरूपितवान् गुणदोषयोर्विपरीततत्त्वबोधनाय, **म्लेच्छा** ये सहजदैत्याः ते गुणवन्तोपि हन्तव्याः क्षत्रियास्तु दोषवन्त एवेति, एवं प्रयोजनमुक्त्वा पश्चात् स्वरूपमाह **कल्किरूपिण** इति, कल्कस्येव निष्पीडितरसस्य चतुर्युगात्मकस्य कालस्य स्वरूपमस्मिन् वर्तत इति **कल्की**,न केवलं तस्यैव रूपं स्वस्मिन् प्रतिबिम्बितं प्रतीयते किन्तु अस्यापि पृथग्रूपत्वमुक्तम् ॥२२॥

व्याख्यार्थ—'नमो बुद्धाय' इस श्लोक से आगे होने वाले अवतार का वर्णन करते हैं। अक्रूरजी ऋषि हैं। इसलिए आर्ष (दिव्य) ज्ञान से वह जैसा जैसा (वहाँ जल के भीतर) देखते हैं, वैसा वर्णन करते हैं अथवा भगवान् अपने उस उस रूप के उन्हें दर्शन कराते हैं। वेद आदि की निन्दा करने वाले बुद्ध रूप की अवतारों में गणना करना तो अयोग्य ही होगा। ऐसी आशङ्का को दूर करने के अभिप्राय से मूल श्लोक में 'शुद्ध' सब दोष रहित, ऐसा विशेषण दिया है। इस बुद्धावतार का चरित्र वेद की निन्दा के वाक्यों से दैत्यों और दानवों को मोह उत्पन्न करना है। उनका वह मोह भगवान् (बुद्ध)

का मोह है। यदि वे अपने मोह को प्रकट नहीं करते तो उन दैत्यों को मोह नहीं होता। [दैत्य दानव मोहिन्] यह अर्थ इस मत्वर्थक 'इन्' प्रत्यय से ज्ञात होता है। अब कल्कि रूप को नमस्कार करते हैं। 'क्षत्र' रक्षक रूप से रहने वाले क्षत्रियों का नाश करने वाले कल्कि अवतार को नमस्कार हो। उस समय क्षत्रिय म्लेच्छों के आकार वाले होंगे। इसलिए म्लेच्छों का नाश करने वाले, ऐसा विशेषण दिया है। क्षत्रिय, गुण वाले होने चाहिए, वे दोष वाले होंगे और म्लेच्छ, दोष वाले होने चाहिए, वे गुण वाले होंगे। इस प्रकार विपरीत भाव बतलाने के लिए दोनों को अलग-अलग (क्षत्रिय और म्लेच्छ) कहा है। म्लेच्छ जो स्वभाव से ही दैत्य हैं, वे गुण वाले हो, तब भी मारने योग्य हैं और क्षत्रिय जो दोषयुक्त हो, वे ही नाश करने योग्य होते हैं। दोष रहित क्षत्रिय मारने योग्य नहीं होते।

इस प्रकार से कल्कि अवतार का प्रयोजन कहकर 'कल्कि रूपवाले' शब्द से स्वरूप का वर्णन करते हैं। इस कल्कि में कल्क पीसे हुए रस जैसा चारों युग रूप काल का स्वरूप रह रहा है। इस लिए यह कल्कि कहलाता है। केवल उस (कल्क) काल का रूप ही अपने -कल्कि के- भीतर प्रतिबिम्बित हुआ नहीं दिखलाई देता है; किन्तु अपना कल्कि रूप उस अपने में प्रतिबिम्बित हुए कल्करूप काल से अलग भी है ॥२२॥

श्लोक—**भगवन् जीवलोकोयं मोहितस्तव मायया।**
अहं ममेत्यसद्ग्राहो भ्राम्यते कर्मवर्त्मसु ॥२३॥

श्लोकार्थ—हे भगवान्! यह सारा जीव लोक आपकी माया से मोहित हो रहा है। इसी कारण 'मैं हूँ' 'मेरा है', ऐसा इन दुष्ट पदार्थों में आग्रह करके कर्म के मार्गों में भटक (भ्रमण कर) रहा है ॥२३॥

सुबोधिनी—एवं कियन्ति रूपाणि भगवतो नत्वा किञ्चित् प्रार्थयितुं सर्वेषामेव साधारणं दुःखं निवेदयति **भगवन्निति**, एतादृशेपि त्वयि सर्वदा जागरूके **लोका:** त्वन्**मायया मोहिता** इति दुःखं प्राप्नुवन्ति, अन्यथा कथं दुःखं स्यात्. **भगवन्निति** सम्बोधनं सर्वसामर्थ्याय, **अयं** सर्वोपि परिदृश्यमानो **जीवलोकः तवैव मायया** अनुल्लङ्घ्यया **मोहितः**, अन्यथा **अहं ममेति असति** दुष्टे देहादौ **ग्राहः** आग्रहो यस्य तादृशः कथं भवेत्, अत एव **कर्म**मार्गेषु उच्चावचेषु श्वयोन्यादिषु **भ्राम्यते** पुनः पुनः परिभ्रमति, यदि मायया मोहितो न स्यात् तदा सकृत् क्लेशं प्राप्य पुनरहंममाभिमानं न कुर्यात् ॥२३॥

व्याख्यार्थ—इस प्रकार भगवान् के कितने एक रूपों को नमस्कार करके कुछ प्रार्थना करने के लिए -'भगवन्'- इस श्लोक से सब के ही साधारण दुःख को निवेदन करते हैं। ऐसे महान् भी आप सदा सावधान रहते हो, तो भी लोक आपकी माया से मोहित होकर दुःख भोगते हैं। यदि यह माया से मोहित न हो, तो दुःख क्यों पावें ? आप -कर्तुं अकर्तुं, अन्यथा कर्तुं- सब प्रकार की शक्ति वाले हैं। इस बात को बतलाने के लिए श्लोक में 'भगवन्' यह सम्बोधन कहा है। यह चारों तरफ दिखाई देने वाला सारा जीवलोक, नहीं लाँघी जा सकने वाली -आपकी ही- माया से मोहित हो रहा है।

यदि यह मोहित नहीं हो रहा हो, तो देह आदि दुष्ट पदार्थों में 'मैं, मेरा' ऐसा आग्रह क्यों हो? इसीलिए यह कर्मों के मार्गों में ऊँची नीची, कुत्ते आदि की योनियों में बार बार भटकता फिरता है; क्योंकि माया से मोहित नहीं हो तो एक बार दुःख भोगकर फिर 'मैं, मेरा' ऐसा अभिमान नहीं करता ॥२३॥

श्लोक—**अहं चात्मात्मजागारदारार्थस्वजनादिषु ।**
भ्रमामि स्वप्नकल्पेषु मूढः सत्यधिया विभो ॥२४॥

श्लोकार्थ—हे प्रभो! मूढ़ मैं स्वप्न जैसे इन देह, पुत्र, स्त्री, घरबार, धन, सम्पत्ति और अन्यान्य सगे सम्बन्धियों में -इन्हें- सत्य मान कर भटक रहा हूँ ॥२४॥

सुबोधिनी—तर्हि तव किमित्याकाङ्क्षायामाह **अहं चेति**, यथा अन्ये मोहिताः एवं **अहमपि** मोहितः, किञ्च, मयि विशेषोप्यस्तीत्याय **आत्मात्मजेति**, **आत्मा** देहः, **आत्मजाः** पुत्राः, **अगारं** गृहं, **दाराः** स्त्रियः,**अर्थो** धनम्,**स्वजनाः** बान्धवाः, तेषु सर्वेष्वेव सकृदवगतवैषम्योपि पुनः पुन**र्भ्रमामि**, न वा एते स्वरूपतः सन्तः नापि कात्स्र्न्येनाभिव्यक्ताः, अन्यथा तेषां कार्यं आपाततोपि प्रकटं स्यात्, यतोहं **स्वप्नकल्पे**ष्वपि **भ्रमामि** न केवलमहन्ताममतामात्रमपि, अतो **मूढः** सर्वापेक्षयापि, किञ्च, न केवलं भ्रममात्रं किन्तु तेषु **सत्य**बुद्धिरपि जायते येन विचारेपि अन्यथाबोधेपि भ्रमो न निवर्तते, **प्रभो** इति सम्बोधनं त्वं सर्वसमर्थः एतादृशमप्यसाध्यं साधयिष्यसीति ॥२४॥

व्याख्यार्थ—तब अक्रूरजी तुम्हारी क्या दशा है इस प्रकार की आकाङ्क्षा में 'अहं' यह श्लोक कहते हैं। हे प्रभो ! जैसे और लोग सभी आपभी माया में मोहित हो रहे हैं; वैसे ही मैं भी मोहित हो रहा हूँ। सारे लोगों की अपेक्षा मेरे में विशेषता यह भी है कि मैं तो देह, पुत्र, घर, स्त्री, धन आदि इन सबको एक बार दुःख रूप जानकर भी बार बार इसमें भटकता रहता हूँ। ये सब न तो स्वरूप से सत्य हैं और न पूर्ण रीति से स्पष्ट जाने ही जाते हैं। यदि इन्हें स्पष्ट जानलिया जाय तो इनका कार्य भी उत्तरोत्तर प्रकट होता रहे।

इसलिए मैं ही अहन्ता ममता में फँस रहा हूँ। केवल इतना ही नहीं, किन्तु स्वप्न के समान भी झूठे इनमें भ्रमता ही रहता हूँ। इसी कारण मैं सब से अधिक मूढ़ हूँ। केवल मुझे भ्रम ही नहीं हैं, मैं तो उन्हें सत्य भी मान रहा हूँ और विचार करने पर भी तथा किसी दूसरे प्रकार (अनित्यता) का ज्ञान होने पर भी मेरा भ्रम नहीं मिटता हैं। हे प्रभौ ! आप सर्व समर्थ हो। मुझ जैसे अधिकार हीन को भी, कभी भी न मिलने योग्य वस्तु को भी प्राप्त करा देते हो। इसी अभिप्राय को प्रकट करने के लिए श्लोक में 'प्रभो' यह सम्बोधन पद दिया है ॥२४॥

श्लोक—**अनित्यानात्मदुःखेषु विपर्ययमतिर्ह्यहम् ।**
द्वन्द्वारामस्तमोविष्टो न जाने त्वात्मनः प्रियम् ॥२५॥

श्लोकार्थ—अज्ञान से अन्धा बना हुआ मैं इन अनित्य, अनात्म पदार्थों को नित्य

तथा आत्मा जान कर दुःख को सुख मान रहा हूँ। नाथ! मैं सुख, दुःख आदि द्वन्द्व धर्मों में रम रहा हूँ। इसीलिए अज्ञानी, मैं आत्मा के परम प्रिय, परमात्मा, जो आप हैं, उनको नहीं जानता (पहचानता)॥२५॥

सुबोधिनी—ननु शास्त्राद् विवेक उत्पन्ने संसारस्यासारतां ज्ञात्वा स्वयमेव सर्वं त्यक्ष्यसि किं मया कर्तव्यमित्याशङ्कायामाह **अनित्येति**, शास्त्रमप्युल्लङ्घ्य **मम** बुद्धिर्विपरीता जाता, **अनित्ये** सर्वत्र नित्यबुद्धिः, देहे दैहिके **च अनात्मनि** आत्मबाधके आत्मबुद्धिः, देहादावेव **दुःखे** विण्मूत्रपूयस्थितौ सुखबुद्धिः, अतो ज्ञातमपि शास्त्रं नानुभवं बाधते, अतो **द्वन्द्वेष्वेव** सुखदुःखादिषु **रागद्वेषादिषु** वा **आरामो** यस्य तादृशो जातः, ननु कथमेवं भ्रमस्तत्राह **तमोविष्ट** इति, **तमो** महामोहः अज्ञानमेव वा, तर्ह्यस्य निवृत्तिः कदेत्याशङ्कायां त्वयि ज्ञाते प्रकाशो भवतीति निश्चित्य त्वज्ज्ञानमेव चक्षुषि विद्यमानतमसा न जायत इत्याह **न जान** इति, न हि स्वप्रकाशमपि सूर्यमन्धः पश्यति, तथा **त्वामपि** आत्मानमपि **प्रियं** परमानन्ददातारं सुगममपि प्रत्यक्षसिद्धमपि तथात्वेन **न जाने**, **आत्मनः** परमिति वा नियन्तारम् ॥२५॥

व्याख्यार्थ—शास्त्र से ज्ञान के उत्पन्न होने पर जब संसार की असारता जान लेगा, तब तू (अक्रूर) स्वयं ही सब का त्याग कर देगा। इस में मुझे (भगवान् को) क्या करना है ? ऐसा सन्देह होने पर 'अनित्या' यह श्लोक कहते हैं। नाथ ! मेरी बुद्धि शास्त्र का भी उल्लङ्घन करके विपरीत हो गई है। यह तो अनित्य (नाश होने वाले) पदार्थ को भी नित्य-सदा रहने वाला-मान रही है और देह तथा देह सम्बन्धी,जो आत्मा से भिन्न हैं, (आत्मा नहीं है) और आत्मा की प्राप्ति में बाधक हैं-विघ्नरूप हैं-उन्हें आत्मा समझ रही है। विष्टा, मूत्र, पूय आदि से भरी हुई दुःखदायी देहादिक में ही मैं सुख मान रहा हूँ। इसलिए उत्पन्न हुआ शास्त्र का ज्ञान भी अनुभव को नहीं दबा रहा है। इसी कारण से मैं सुख, दुःख, राग, द्वेष आदि परस्पर विरोधी गुणों में ही सुख समझ रहा हूँ। मैं (तमोविष्ट) महामोह अथवा अज्ञान से भरा हुआ हूँ, इसीलिए मुझे ऐसा भ्रम हो रहा है। यह अज्ञान आपको जान लेने पर ही मिट सकता है; क्योंकि आपका ज्ञान होने पर प्रकाश हो जाता है, तब तम,मोह, अज्ञान (अन्धेरा नहीं रहने पाता, दूर हो जाता है); किन्तु आंखों में अँधेरी छाई होने से आपका ज्ञान नहीं होता। जैसे अन्धा पुरुष स्वतः प्रकाशमान सूर्य को भी नहीं देख सकता, वैसे ही मैं आत्मारूप, परम प्रिय, परम आनन्द के देनेवाले, सहज प्राप्त हो जानेवाले और प्रत्यक्ष दर्शन देनेवाले आप को भी इस प्रकार (यथार्थ रूप से प्राण प्रिय) नहीं जानता हूँ, अथवा आप आत्मा से भी परे हो-वश में रखने वाले हो-ऐसे नहीं पहचानता हूँ ॥२५॥

श्लोक—**यथाबुधो जलं हित्वा प्रतिच्छन्नं तदुद्भवैः ।**
अभ्येति मृगतृष्णां वै तद्वत् त्वाहं पराङ्मुखः ॥२६॥

श्लोकार्थ—जैसे कोई मूर्ख मनुष्य जल में ही उत्पन्न हुए घास फूस अथवा काई आदि से ढके हुए पानी को छोड़ कर मृग-मरीचिका के पीछे जल की आशा से भटकता फिरे, वैसे ही अपनी माया के गुणों से छिपे हुए आत्मा रूप आप को छोड़ कर मैं मूढ़

सुख की आशा से देह आदि के लालन पालन में लग रहा हूँ, आपसे विमुख हो रहा हूँ ॥२६॥

सुबोधिनी—ननु श्रुत्यनुभवं परित्यज्य युक्तिमान् विवेकी कथं न जानातीत्याशङ्क्य दृष्टान्तेन स्पष्टयति **यथेति, अबुधो** मूर्खः जलार्थी सन् जलाशयोपरि तिष्ठन् कमलपत्रादिभिः **आच्छन्नं जलं** तृणपत्रादि समूहमेव ज्ञात्वा तददूरीकृत्य मध्यस्थितं **जलमगृहीत्वा** दूरे मरुमरीचिकाजलं पश्यन् तदर्थमभिधावति, **तद्वदेवान्तःस्थितं** भगवन्तं अहङ्कारादिभि**स्तद्द्वैराच्छन्नं** तददूरीकृत्य परमानन्दमननुभूय दुःखात्मके बहिर्विषये अभिधावति **तद्वदहं त्वां हित्वा** विषयसुखार्थं गच्छामि, अत्र हेतुमाह **पराङ्मुख** इति, **पराक्** बहिरेव **मुखं** यस्येति, **मुखमत्र** प्रवृत्तिस्वभाव आत्मा तस्य प्रतिनिधिरूपमिदं **मुखं** यदभिमुखस्तदेव च करोति, अतः **शास्त्रादिद्वारा यदा अन्तर्मुखो भवति तदैव निकटे भगवन्त प्राप्नोति,** बहिर्जलप्राप्तिस्तु भगवदिच्छया प्रलय इव सर्वत्र भगवदभिव्यक्तौ भवति यथैव वायं प्रदर्शयति तथैव स मन्यत इति स्वयमपि तथैव तं प्रत्यभिव्यक्त इति न काप्यनुपपत्तिः ॥२६॥

व्याख्यार्थ—वेद और अनुभव का आश्रय न लेकर भी तर्क शक्तिवाले और ज्ञानी अक्रूरजी तुम मुझे (भगवान् को) कैसे नहीं जानते ? ऐसी शङ्का में 'यथाऽबुधो' इस श्लोक से भगवान् को न जानने का कारण दृष्टान्त से स्पष्ट करते हैं। जैसे जलाशय के किनारे खड़ा हुआ जल पीने की इच्छा वाला कोई मूर्ख कमल के पत्तों, काई आदि से ढ़के हुए जल को घास फूस का ढ़ेर ही समझ कर और उस काई को दूर करके वहाँ के जल को न लेकर (न पीकर) दूरी पर मृग-मरीचिका के जल को देख कर उसे लेने के लिए उधर ही दौड़ता है, उसी प्रकार से शरीर के भीतर रहने वाले और शरीर में ही उत्पन्न होने वाले अहंकार आदि से आच्छादित (ढ़के हुए) आप भगवान् को (वहीं शरीर में ही विराजमान को) न जानकर उन अहंकार आदि को दूर न हटाकर परमानन्द का अनुभव न करके दुःखरूप बाहरी पदार्थों की ओर सुख की आशा, अभिलाषा से दौड़ता हो, ठीक वैसे ही मेरी दशा है। आप से बहिर्मुख मैं भी आपको छोड़कर विषय सुख के लिये दौड़ रहा हूँ।

यहां पराङ्मुख पद में मुख शब्द का अर्थ प्रवृति स्वभाव वाला आत्मा (जीव) है। उसका प्रतिनिधि रूप यह जिस तरफ मुख रखता है (जिधर देखता है), वहीं करता है। इसलिए शास्त्र आदि के द्वारा जब यह (जीव) अन्तर्मुख होता है, तब ही भगवान् के निकट आता है। बाहर जल तो तब मिल सकता है, जब भगवान् की इच्छा से प्रलय काल की तरह सब जगह जल ही जल हो जाए। इसी तरह से भगवान् की बाहर प्राप्ति तो तब ही हो सके, जब वे अपनी इच्छा से सभी स्थान पर प्रकट हो जावें।

अथवा भगवान् जिस रूप से (जैसे जैसे) दर्शन देते हैं, अक्रूरजी उन्हें वैसा ही मानते हैं। इसलिए भगवान् स्वयं भी उसी रीति से उस (अक्रूर) के सामने प्रकट होते हैं। इसलिए इस प्रकार के वर्णन में किसी प्रकार की अनुचितता नहीं है; सब उचित ही वर्णन है ॥२६॥

श्लोक—नोत्सहेहं कृपणधीः कामकर्महतं मनः।
रोद्धुं प्रमाथिभिश्चाक्षैर्ह्रियमाणमितस्ततः ॥२७॥

श्लोकार्थ—भगवन्! विषय वासनाओं से मेरी बुद्धि हीन (दीन) हो रही है, इस लिए काम्य कर्मों और कामनाओं से चञ्चल हुई तथा बलवान् इन्द्रियों के द्वारा इधर उधर चलायमान (भटकने वाले) मन का दमन करने में मैं असमर्थ हो रहा हूँ।। २७।।

सुबोधिनी—ननु जाते विवेके कथं मोह इति चेत् तत्राह **नोत्सहेहमि**ति, **मनो** हि द्विःस्वभावं क्रियाशक्तियुक्तं च, यथा विवेकेन शास्त्रेण च ज्ञानशक्तिरुत्पद्यते एवं योगेन क्रियाशक्तिरपि चेदुत्पाद्येत तदैकमुखं **मनो** भवति, अन्यथा बलिष्ठा क्रिया ज्ञानं बाधित्वा स्वकार्यमेव करोति, अत एव केचित् ज्ञानापेक्षया योगमेव प्रशंसन्ति, 'ज्ञानिभ्योप्यधिको मत' इति भगवानप्याह,ज्ञानेच्छाप्रयत्नानामुत्तरोत्तरप्राबल्यं तथैव मनोवाक्कायानामपि, तत्र **कामादयो** बाधकाः, तैः संसार एव **मनः** प्रवर्त्यते, योगादयस्त्वशक्याः, न ह्यन्धकारे महति वायौ वृष्टौ च दोपः स्थापयितुं शक्यते तत्राह **कृपणधी**रिति, **कृपणा** दीना बुद्धिर्यस्य, मनसो हि नियामिका बुद्धिः, सैवादौ **कृपणा** दीना विषय परा, न हि चौरेणान्यः सन्मार्गे स्थापयितुं शक्यः, किञ्च, **मनः** पुनः **कामकर्मभ्यां हृतं**, उत्कटेच्छा **कामः**, तदनुगुणं च **कर्म**, ज्ञानं तु दुर्बलमसहायं, कामकर्मभ्यां च हृतं, न तु स्वच्छं, तद्द्वयेन तदनुगुणमेव भवति न त्वात्मानुगुणं, अतो रोद्धुमुत्साहमपि **न** करोमि अशक्यज्ञाननिश्चयात्, किञ्च, **प्रमाथिभिर्ब**लिष्ठै रिन्द्रियैः **इतस्ततो ह्रियमाणं**, अतः सर्वत्रैवाशक्तः केवल शरणं गच्छामि बलिष्ठांस्तांश्च निवेदयामि स्वाशक्यत्वं च ।।२७।।

व्याख्यार्थ--जब नित्य और अनित्य पदार्थों का ज्ञान हो जाय तब मोह कैसे हो ? ऐसी आशङ्का में 'नोत्सहे' यह श्लोक कहते हैं। मन दो स्वभाव वाला है। (१) क्रियाशक्तिवाला और (२) ज्ञानशक्तिवाला। जैसे नित्य अनित्य के ज्ञान की शक्ति से और शास्त्र के द्वारा ज्ञानशक्ति उत्पन्न होती है, वैसे ही योग से यदि क्रियाशक्ति भी मन में उत्पन्न करदी जाए, तब तो मन एक मुख-एक ही प्रयोजन वाला - हो जाता है और यदि ऐसा नहीं होता है तो, बलवती क्रिया ज्ञान को दबा (हटा) कर अपना ही कार्य करती है। इसी कारण से कई लोग ज्ञान की अपेक्षा योग की अधिक ही प्रशंसा करते हैं। भगवान् ने भी आज्ञा की है कि "ज्ञानिभ्योप्यधिकोमतः" (गीता ६/४६) योगी ज्ञानी की अपेक्षा भी अधिक माना गया है।

जिस प्रकार ज्ञान, इच्छा और प्रयत्न क्रम से एक से द्वितीय और दूसरे से तृतीय, अधिक बलवान है, उसी प्रकार मन, वाणी और काया भी एक के बाद एक अधिक बलवान है। उन में काम,क्रोध आदि विघ्न करने वाले हैं। वे मन को संसार में ही फँसाते हैं। अत्यन्त कठिनता से होने वाले योगादिक किए नहीं जा सकते; क्योंकि अन्धकार में जोर की आँधी तथा वर्षा होने पर दीपक नहीं रक्खा जा सकता है। इसी लिए मूल में अक्रूरजी अपने आपको कृपणधी(दीन बुद्धिवाला) कहते हैं। मन के वश में रखने वाली तो बुद्धि ही है और वही मेरी बुद्धि दीन (विषयों में अत्यन्त आसक्त) हो रही है। इस लिए वह मन को वश में नहीं रख सकती; क्योंकि चोर दूसरे किसी को अच्छे माग पर नहीं चला सकता है, फिर मेरा मन भी काम और कर्म के आधीन हो रहा है। उत्कट इच्छा काम है और इच्छा (काम) के अनुकूल ही क्रिया करना कर्म है। ज्ञान तो बेचारा बलहीन और असहाय और काम तथा कर्म से दबा हुआ है, स्वच्छ नहीं है। इसीलिए यह

मलिन ज्ञान भय से उन काम और कर्म के अनुकूल ही हो जाता है। वह (ज्ञान) स्वयं अपने अनुकूल नहीं रहता है। इसीलिये यही समझ और निश्चय कर कि मन को रोकना अशक्य है, मैं उसको रोकने का उत्साह (साहस) भी नहीं करता हूँ। वह मेरा मन बलवान इन्द्रियों के द्वारा इधर उधर भटकाया जा रहा है। इसलिये मैं मन, इन्द्रियों को रोकना आदि सभी विषयों में असमर्थ हूँ, केवल भगवान् की शरण जाता हूँ और उन से निवेदन करता हूँ कि ये इन्द्रियों, काम, कर्म आदि सब बड़े बलवान हैं और मैं मन को वश में करने में असमर्थ हूँ ॥२७॥

श्लोक—सोहं तवाङ्घ्र्युपगतोस्म्यसतां दुरापं तच्चाप्यहं भवदनुग्रह ईश मन्ये।
पुंसो भवेद् यर्हि संसरणापवर्गस्त्वय्यब्जनाभ सदुपासनया मतिः स्यात् ॥२८॥

श्लोकार्थ—हे प्रभो! आपके चरण कमल दुष्ट लोगों के लिए परम दुर्लभ हैं, तथापि मुझ जैसे अधम को आपके चरणों की प्राप्ति हो जाना मैं तो आपकी ही कृपा का फल मानता हूँ। हे पद्मनाभ! जब मनुष्य का अन्तिम जन्म होता है अर्थात् जीव के आवागमन का अन्त निकट आ जाता है, तभी सत्पुरुषों की सेवा सत्सङ्ग के द्वारा उसकी बुद्धि आपकी ओर झुकती है ॥२८॥

सुबोधिनी—एवं सति यत् कर्तव्यं भगवतैव तत् चेत् क्रियेत कृपया स्वव्रतविचारेण अस्मद्भाग्येन तस्यैव वा कार्यार्थं तदैव निस्तारो नान्यथेत्यभिप्रायेणाह **सोहं तवाङ्घ्र्युपगतोस्मीति**, सर्वथा अशक्यसाधनः **सोहं तवाङ्घ्रिमुपगतः** दीनतया शरणं प्रविष्टः इदानीमस्मि, एतदपि शरणागमनमपि **असतां दुरापं**, ये असन्तः पूर्वोक्ताः विवेकरहिता अपि विवेकेन त्वेतावत् सम्पाद्यत इति, किञ्च, **भगवदनुग्रहमेव तत् मन्ये** अन्यथा शरणागतो न भवेत्, शरणागतो जात इति वा न भवेत्, यदि सङ्घातमनुगुणं कुर्यात् त्याजयेद् वा तदा शरणागतिः सिद्धेति ज्ञातव्यं, अनुगुणपक्षस्तु ज्ञातुं सुगमः, त्याजनपक्षस्तु दुर्ज्ञेयोपि अनुभावेन कृपाप्रकाशेन च ज्ञायते, अतः स्वरूपतो निष्पत्त्या वा शरणागमनमेव **भगवतोनुग्रहः** सत्सेवानुग्रह इति स्वरूपसत्त्वमेव नियामकं तथैव ते उत्पादिता इति मूलेच्छात्र नियामिका, ननु त्याजनमनुगुणं वा तस्यापि स्वार्थमात्रेप्यशक्यं भगवान् कथं करिष्यतीति चेत् तत्राह **ईश** इति, हे सर्वसमर्थ, अत्र ममानुभव एव प्रमाणमित्याह **मन्य** इति, अनेन भगवानेव यदि करोति तदैव निस्तारो भवति इति ज्ञापितं, नन्वेवं सति शास्त्रं व्यर्थं स्यात् ज्ञानस्याप्यनुपयोगादिति चेत् तत्राह **पुंसो भवेदिति, यर्हि पुंसः** भगवदिच्छया **संसरणापवर्गः** स्यात्, **सृष्टिसमये हि भगवान् सर्वानेव विचारयति इममित्थं करिष्यामीति**, तत्र यं मोचयिष्यामीति मन्यते तत्र जन्मानि अवधिमन्ति करोति, तथा सति यदैवान्तिमं जन्म भवति स **संसरणापवर्ग** उच्यते अग्रे संसरणाभावात्, अत्रोपपत्तिरूपं किञ्चिदाह **पुंसो भवेदिति**, अन्यथा तं पुरुषमेव न कुर्यात्, 'तासां मे पौरुषी प्रिये'ति भगवद्वाक्यात्, अतः पुंसां मुक्तिरस्तीति सम्भाव्यते, परं कालनियमे न प्रमाणं तदाह **यर्हीति**, यर्ह्येवान्तिमं जन्म, तथा करिष्यतीत्यत्र नियामकमाह **अब्जनाभेति**, अन्यथा स्वयमागत्य सृष्टिं नोत्पादयेत्, **अब्जं नाभौ** यस्येति स्वयमाविर्भूय यतः सृष्टिं कृतवान् न तु सेवकद्वारा, अतो ज्ञायते केषाञ्चित् मुक्तिस्तस्यां सृष्टौ दास्यतीति, तदा तस्मिन्

जन्मनि भगवति मतिर्भवति 'तमेव विदित्वाति-मृत्युमेती'ति नियमात्, 'ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरमि'ति भगवद्वाक्याच्च भगवज्ज्ञा-नमावश्यकं, तत्र सतां बोधकत्वेन उपदिश्यमान-त्वेन च शास्त्रोपयोगः, साधनेनैव सर्वं करोतीति एतावानर्थस्तुल्य इति अशक्ये भगवानेव वर्तत इति त्याजनपक्षेपि न काप्यनुपपत्तिः, अतः सत्से-वारुचिः **भगवत्स्वरूपज्ञानेच्छा भगवच्छास्त्रपरत्वं च अन्तिमजन्मज्ञापकम् ॥२८॥**

व्याख्यार्थ—ऐसी स्थिति में जो भी जीव का कर्तव्य है, उसे भगवान् ही कृपा करके, अपने—दास रक्षा-व्रत को विचार कर, जीवों के भाग्य से अथवा भगवान् उसे स्वयं अपना ही कार्य समझ (मान) कर करें, तब तो जीव की सद्गति हो सकती है, यदि भगवान् ऐसी कृपा न करे तो जीव का निस्तार नहीं हो सकता, इस अभिप्राय से'सोऽहं'यह श्लोक कहते हैं ।

सब प्रकार से साधन हीन मैं अब दीन होकर आपके चरणारविन्द की शरण में आया हूँ । यह आपकी शरणागति भी दुष्ट पुरूषों के लिये तो अत्यन्त दुर्लभ ही है । जो दुष्ट है, जिन्हें पहले श्लोकों में कही गई रीति से नित्य अनित्य वस्तु का ज्ञान नहीं हैं, वे भी आपके चरणारविन्द को प्राप्त नहीं कर सकते हैं; किन्तु इस प्रकार के सत्य, असत्य की ज्ञान शक्ति ही आपके चरणारविन्द की शरणागति प्राप्त कराती है ।

भगवान् के शरण में चले जाना भी भगवान् का ही अनुग्रह मानता हूँ । यदि भगवान् की कृपा न हो तो जीव उन की शरण में जावे ही नहीं और-मैं भगवान् के शरणागत हो गया हूँ-ऐसा ज्ञान भी (जीव को) नहीं हो सकता । इसलिये जब भगवान् (जीव के) देह, इन्द्रिय आदि के समूह अपने अनुकूल करें अथवा इनका त्याग करा दें, तब ही जीव का भगवान् के शरण आना सिद्ध हुआ जानना चाहिये, तब ही शरणागति सिद्ध हुई मानी जाती है । जीव की इन्द्रियादि को भगवान् ने अपने अनुकूल बना दिया, यह बात तो सहज ही जान ली जासकती है; किन्तु भगवान् के द्वारा इस संघात का त्याग करा देने का पक्ष तो कठिनता से जाना जा सकने योग्य होने पर भी उनके प्रभाव से अथवा उनकी कृपा के प्रकाश से जान लिया जा सकता है।इसलिए स्वरूप से सङ्घात को अनुकूल बना कर अथवा उसका त्याग कराकर (जीव को अपनी) शरण में ले आना रूप कार्य भी भगवान् की कृपा (का) ही (फल) परिणाम है और जब (भगवान् की कृपा का फल) वह शरणागति हो तभी सत्पुरुषों की सेवा जिसके द्वारा भगवान् में बुद्धि लगती है, होती है । इसलिए आगन्तुक शम, दम आदि के न होने पर भी स्वरूप से सत्पुरुष होना ही योग्य है; किन्तु कई जीव स्वभाव से ही सज्जन अथवा दुर्जन हैं । उनको भगवान् ने वैसा ही उत्पन्न किया है । इसलिए इस विषय में भगवान् की इच्छा ही मूल-नियामक-है ।

अपने हित के विचार से सत्पुरुष भी जिस सङ्घात को अनुकूल नहीं कर सकता और छोड़ ही सकता है, उसे भगवान् कैसे अनुकूल करा देंगे अथवा छुड़ा देंगे ? एसी शङ्का के उत्तर में अक्रूरजी कहते है कि आप (ईश्वर) ईश सर्व -समर्थ- हैं, सब कुछ कर सकते हैं; ऐसा मैं मानता हूँ, मेरा अनुभव ही इस में प्रमाण है । इस कथन से यह बतलाया कि भगवान् ही कृपा करे, तब ही जीव का निस्तार-मोक्ष प्राप्ति-हो । तब तो जीव का निस्तार-मोक्ष-होने में ज्ञान का भी कुछ

उपयोग न होने से शास्त्र व्यर्थ हैं ? ऐसी शङ्का का समाधान करते हुए कहते हैं कि पुरुष का जब भगवान् की इच्छा से अन्तिम जन्म होता है, भगवान् जब सृष्टि करते है तब विचार करते है कि अमुक जीव को ऐसा करूंगा। उस समय जिसका मोक्ष(करना)विचार लेते हैं,उसके जन्मों की अवधि-संख्या-कर देते हैं। ऐसा होने पर जब ही अन्तिम जन्म होता है, वही संसरणापवर्ग कहा जाता है, क्योंकि इस जन्म के आगे फिर इसका जन्म नहीं होगा। इस कथन में'पुंसः' (पुरुषका)-श्लोक में कहा गया पुरुष शब्द ही प्रमाण है। "तासां मे पौरुषी प्रिया" (उन सब योनियों में मुझे पुरुष जन्म प्यारा है) इस वाक्य से यदि पुरुष का जन्म अन्तिम भव-जन्म-नहीं होता तो भगवान् इसे पुरुष ही नहीं (उत्पन्न) करते। इस कारण से पुरुष की मुक्ति होना तो सम्भव है, किन्तु कितने जन्म अथवा कितने समय के बाद मुक्ति होगी, इस प्रकार की अवधि का नियम नहीं है। इसलिये अन्तिम जन्म होने पर ही भगवान् जीव की-सत्पुरुषों की सेवा के द्वारा - अपने में बुद्धि करेंगे - लगावेंगे- इस नियम को हे कमलनाभ ! यह सम्बोधन सूचित करता है। भगवान् यदि जीव की बुद्धि को अपनी ओर लगाना नहीं चाहते तो स्वयं पधार कर सृष्टि नहीं करते। भगवान् की नाभि में कमल है। उन कमलनाभ भगवान् ने स्वयं प्रकट होकर ही सृष्टि की है, अपने किसी सेवक द्वारा नहीं की है। इससे यह जाना जाता है कि इस अपनी रची हुई सृष्टि में भगवान् किन्हीं पुरुषों को मुक्त करेंगे। तब उस मुक्ति को प्राप्त करने योग्य अन्तिम जन्म में "उसको जानकर ही (मनुष्य) मृत्यु से पार होता है (मृत्यु को तरता है) इस नियम से जीव की बुद्धि भगवान् में लगती है।" इस लिये "मुझे तत्वं से जानने के बाद मेरे में प्रवेश करता है" (भगवद्गीता १८/५५) भगवान् के इस वाक्यानुसार अन्तिम जन्म में भगवान् का ज्ञान जरूरी है। उस होने वाले आवश्यक भगवज्ज्ञान में बोध करानेवाले के रूप से और उपदेश दिये जाने योग्य सत्पुरुषों के रूप से शास्त्रो का उपयोग है। भगवान् साधनों के द्वारा ही (जीव-से) सब कराते हैं-यह नियम-संघात को अनुकूल करना तथा सर्वथा त्याग करा देना, इन दोनों पक्षों में समान है। इस लिये जीव से अशक्य (नहीं किये जासकने योग्य) संघात का त्याग के पक्ष में भी किसी भी प्रकार की अड़चन-अयोग्यता-नहीं है। इसलिये (१) सत्पुरुषों की सेवा करने में रूचि होना (२) भगवान् के स्वरूप के ज्ञान की इच्छा होना और (३) शास्त्र में तत्पर-श्रद्धा रखना-इन से पुरुष का अन्तिम जन्म जाना जाता है ॥२८॥

लेख—'सोऽहं' इस श्लोक की व्याख्या में 'पूर्वेक्ताः' पद का अर्थ पहले 'भगवज्जीव लोकोयं'-इत्यादि श्लोकों में कहा हुआ हैं। 'विवेकेन तु' (इत्यादिका) और विवेक-यह ज्ञान-मुझ को है कि मैं भगवान् के शरण जाऊँ, ऐसा अर्थ है।

किञ्च—वास्तविक रूप से भगवान् की कृपा से ही ऐसा ऊपर कहा हुआ विवेक होता है। 'त्याजनेत्यादि' का भाव यह है कि संघात का त्याग करना तो देह के न रहने पर ही जाना जा सकता है; किन्तु देह के रहते हुए भी भगवान् की कोई महिमा और कृपा से वे स्वयं ही "मेरा (जीव का) संघात से छुटकारा हो गया"जीव को ऐसा प्रकाश करा देते हैं, तब देह पात के पहले (देह के रहते हुए) भी जान सकता है। 'अनुग्रह' - अनुग्रह का कार्य है स्वरूपतः, जो स्वरूप से वास्तविक ही सज्जन है; शम दम आदि के द्वारा आगंतुक सज्जन नहीं है। स्वरूप से ही कुछ सज्जन होते हैं और कुछ दुष्ट। 'शास्त्रं' सायुज्य की प्राप्ति के लिये मन बुद्धि भगवान् में लग जाय, इसलिये शास्त्रों का उपयोग है, शास्त्राध्ययन व्यर्थ नहीं है।

श्लोक—**नमो विज्ञानमात्राय सर्वप्रत्ययहेतवे ।
पुरुषेशप्रधानाय ब्रह्मणेऽनन्तशक्तये ॥२९॥**

श्लोकार्थ—हे भगवान्! विज्ञान आपका वैभव है । सारे ज्ञानों का मूल कारण आप ही हैं । आप परिपूर्ण ब्रह्म हैं । आपकी शक्ति का अन्त नहीं है । काल, कर्म, स्वभाव आदि के नियामक आपको प्रणाम है ॥२९॥

सुबोधिनी—एवं विज्ञाप्य विज्ञापनासिद्धचर्थं नमस्यति **नमो विज्ञानमात्रायेति**, शास्त्रस्य सतां च तदैवोपयोगो भवति यदा भगवान् विशिष्टज्ञानमात्रमेव भवति, अन्यथा ज्ञाने सामान्यसिद्धिः मनननिदिध्यासादिना च विशेषसिद्धिरित्ययमर्थो नोपपद्येत, ज्ञानस्याङ्गत्वं च न स्यात्, शास्त्रेण हि ज्ञानमेवोत्पाद्यते न त्वन्यत्, तच्चेद् विज्ञानमन्यदेव स्यात् किं भगवद्भजनेन शरणागमनेन वा स्यात्, अतस्त्वं **विज्ञानमात्ररूपः**, किञ्च, यदि **भगवान्** आन्तरो न भवेत् आत्मा वा न भवेत् तदान्यत्रस्थितमन्यो न प्राप्नोति, अन्यश्चान्यो न भवतीति मुक्तिरेव न स्यात्, **सर्वेषां प्रत्ययानां** ज्ञानानां **हेतुः** कारणमन्तर्यामी आत्मा वा स भवानेव, ननु तस्य ज्ञानैकरूपस्यात्मनः कथं जगत्कारणत्वमित्याशङ्क्याह **पुरुषेशप्रधानायेति**, **पुरुषः** प्रकृतिभर्ता,**ईशः** कालः गुणक्षोभकः, गुणात्मिका च प्रकृतिः, हेतुत्रितयरूपः, नन्वेकस्य कथमनेकरूपता तत्राह **ब्रह्मण** इति, बृहत्त्वात् बृंहणत्वात् सर्वभवनसमर्थं तदेव, ब्रह्मशब्दस्तादृश एव वर्तत इति प्रकारान्तरेणापि सर्वरूपत्वमुपपादयति **अनन्तशक्तय** इति, **अनन्ताः शक्तयो** यस्येति तत्तच्छक्त्या तथा तथा भवतीति न काप्यनुपपत्तिः, स्वरूपमेव वा तथेति पक्षद्वयमप्यविरुद्धम् ॥२९॥

व्याख्यार्थ—इस प्रकार विज्ञप्ति करके प्रार्थना की सफलता के लिये-'नमो विज्ञानमात्राय'-इस श्लोक से भगवान् को प्रणाम करते हैं । भगवान् जब केवल उत्तम ज्ञान रूप ही हो, तभी शास्त्र और सत्पुरूषों का उपयोग हो सकता है । यदि ऐसा न हो (भगवान्) केवल ज्ञान रूप ही न हो) तो ज्ञान से साधारण लाभ ही हो सकेगा । मनन, निदिध्यासन से उत्तम सिद्धि मिल नहीं सकती और ज्ञान इनका अङ्ग भी नहीं; क्योंकि शास्त्र केवल ज्ञान को ही उत्पन्न करता है और कुछ नहीं करता । शास्त्र द्वारा उत्पन्न हुआ ज्ञान यदि भगवान् (विज्ञानरूप) से भिन्न ही हो तो भगवद्भजन करने तथा उनके शरण जाने से कुछ लाभ नहीं हो (मुक्ति ही न हो) इस से आप केवल ज्ञान रूप ही हो ।

यदि हृदय में भगवान् न विराजते हों अथवा आत्मारूप होवे तो अपने से अलग रहने वाले को कोई प्राप्त नहीं करता है और न कोई दूसरा होता है । इस से मुक्ति भी नहीं हो सकेगी । इस लिये सारे (प्रत्ययों) को ज्ञानों का कारक (हेतु) जो अन्तर्यामी अथवा आत्मा है, वह आप ही हैं ।

केवल ज्ञान रूप आत्मा जगत् का कारण कैसे हो सकता है ? इस शङ्का के समाधानार्थ-पुरुष, काल और प्रकृतिरूप इन तीन शब्दों का श्लोक में प्रयोग है । (१) पुरुष (प्रकृति के भर्ता) (२) काल (गुणों में क्षोभ-हलचल करने वाला) और (३) प्रधान (गुणरूप प्रकृति) जगत के कारण, ये तीनों आप ही हो ।

भगवान् तो एक हैं उन एक के अनेक रूप कैसे हो सकते हैं ? इस शङ्का के उत्तर में कहते हैं कि आप ब्रह्म हैं, ब्रह्म सबसे महान् और सबका पोषण करने वाले होने के कारण से सर्वरूप होने की शक्तिवाले हो और इसी कारण से आप (ब्रह्म) अनन्त शक्तिवाले हो। जिनकी शक्तियाँ अनन्त हैं, वे आप अपनी भिन्न २ शक्ति से भिन्न भिन्न रूपवाले होते हो। इसलिये आप-भगवान्-के एक होने पर भी अनेक रूप होने में कोई विरोध -अनुचितता- नहीं है। अथवा भगवान् का स्वरूप ही अनेक रूप वाला है। इसलिये विभिन्न शक्तियों से तथा स्वरूप से ही अनेक रूप होने (दोनों पक्ष) में कोई विरोध (अड़चन) नहीं है ॥२९॥

श्लोक—**नमस्ते वासुदेवाय सर्वभूतक्षयाय च ।**
हृषीकेश नमस्तुभ्यं प्रपन्नं पाहि मां प्रभो ॥३०॥

श्लोकार्थ—आप वासुदेव -चित्त के अधिष्ठाता- हैं। सब प्राणियों का आश्रय भूत अहङ्कार के अधिष्ठाता -संकर्षण- भी आप ही हैं। हे हृषीकेश! सब प्राणियों के स्थान रूप आपको प्रणाम है। हे प्रभो! मुझ शरणागत की रक्षा कीजिए ॥३०॥

सुबोधिनी—पुनर्विज्ञापनार्थं नमस्यति **नमस्ते वासुदेवाये**ति, मोक्षदात्रे, ननु तथाप्येतावत् कालं त्वमन्यत्र स्थितः कृतापराधश्च ततः कथं मोक्षो देय इत्याशङ्कायामाह **सर्वभूतानां क्षयाय** स्थानरूपायेति, तेन त्वय्येव स्थिताः भूतेषु स्थितावपि त्वय्येव स्थिताः,**च**कारात् सर्वभूतस्वरूपाय,किञ्च, यदपि कृतं तत्रापि त्वमेव हेतुः, यतो **हृषीकेशः** इन्द्रियप्रेरकः,अतः सर्वापराधशान्त्यर्थं **तुभ्यं नमः**, विज्ञापनामाह **प्रपन्नं** शरणागतं **मां पाहि** पालय, यथा पुनः प्रवाहे न पतामीति प्रार्थना वाचनिकी, शरणागमनं प्रथमतो मानसं पश्चात् कायिकमिति तदुपपादितं शरणागतिप्रकरणे ॥३०॥

इति श्रीभागवतसुबोधिन्यां श्रीमल्लक्ष्मणभट्टात्मजश्रीवल्लभदीक्षितविरचितायां दशमस्कन्धविवरणे सप्तत्रिंशाध्यायविवरणम् ।

व्याख्यार्थ—'नमस्ते' इस श्लोक से फिर प्रार्थना करने के लिये प्रणाम करते हैं।

अक्रूर, तुम मोक्ष देने वाले भी मुझ (भगवान्) से इतने समय तक अलग रहे तथा अपराधी हो। तुम्हें मोक्ष कैसे दे दिया जाय ? इस के उत्तर में कहते हैं कि सब प्राणिमात्र आप में ही रह रहे हैं, आप ही सब के एक मात्र स्थान हो। इसलिये महा भूतों में रहे हुए भी आप में ही सब रह रहे हैं। अतः सर्वभूत रूप आप को नमस्कार है। मैंने जो कुछ भी किया है, उसके कारण आप ही हैं; क्योंकि आप हृषीकेश हैं, इन्द्रियों को प्रेरणा करनेवाले हैं। इसलिये सारे अपराध की शान्ति के लिये आप को नमस्कार है।

हे प्रभो, शरण में आये हुए मेरी रक्षा करिये,यह प्रार्थना है। फिर मैं प्रवाह में न पड़ूँ,इसलिए मेरी रक्षा करो। यह वाणी से प्रार्थना की है। भगवान् के शरण जाना पहले मन से होता है

और पीछे शरीर से होता है-यह सब पहले शरणागति के प्रकरण में-इसी अध्याय के अट्ठाईसवें श्लोक में निरूपण किया जा चुका है।

इति श्रीमद्भागवत महापुराण दशम स्कन्ध (पूर्वार्ध) ४०वें अध्याय की श्रीमद्वल्लभाचार्य चरणकृत श्री सुबोधिनी (संस्कृत टीका) राजस-प्रमाण-अवान्तर प्रकरण पञ्चम अध्याय हिन्दी अनुवाद सहित

सम्पूर्ण ।

छंदः—को जान तुम्हरो भेव हरि तुम सकल देव मयी प्रभो।
आदि करण सबहि के तुम विश्व सब तुम्हरो विभो ।।
नाग नर सुर असुर अग जग दास सब तुम्हरो हरी।
रहति माया सब तुम्हारी जाहि तुम ज्यहि विधिकरी ।।
योग यज्ञ अनेक कर्मन करि तुम्हें सब ध्यावहीं।
जैसे जाको भाव तैसो तुमहिं ते फल पावहीं ।।
अति अगाध अपार तुम गतिपार काहू नहिं लह्यो।
शम्भु शेष गणेश बिधना नेति निगमनहू कह्यो ।।
भक्तहित धरि विविध तन तुम चरित अद्भुत बिस्तरौ।
मच्छ कच्छ बराह वपु ह्वै वेद गिरि तुम उद्धरौ ।।
होय नरहरि भक्त प्रणकरि शरण हित बामन भये।
भृगुवंशमणि अभिराम तनु धरि मानमय क्षत्री हये ।।
राम रूप निपात रावण अरु विभीषण नृप कियौ।
कंस अरि यदुवंश भूषण कृष्ण वपु छबि निधि लियो ।।
बोधराय दयाल कलकि हिंसादि कर्म न भावहीं।
निःकलंक मलेच्छहा दश रूप श्रुति तत्र गावहीं ।।

दोहाः—तव गुण रूप अनन्त प्रभु, हो अजान जगदीश।
यों अस्तुति अक्रूर करि, नायो पदपर शीश ।।

सो०:—तबहिं श्याम सुखदाय, अन्तरहित जलते भये।
निकरचो अति अकुलाय, तब जलते अक्रूरपुनि ।।

॥ श्रीकृष्णाय नमः ॥

॥ श्री गोपीजनवल्लभाय नमः ॥

• श्रीमद्भागवत महापुराण •

दशम स्कन्ध (पूर्वार्ध)

श्रीमद्वल्लभाचार्य-विरचित **सुबोधिनी टीका** (हिन्दी अनुवाद सहित)

श्रीमद्भागवत-स्कन्धानुसार ४१वां अध्याय

श्री सुबोधिनी अनुसार ३८वां अध्याय

राजस-प्रमाण-अवान्तर प्रकरण

'षष्ठम् अध्याय'

श्रीकृष्ण जी का मथुरा में प्रवेश

कारिका—**अष्टत्रिंशे ज्ञाततत्त्वं श्वफल्कतनयं हरिः ।**
विसृज्य मथुरामैक्षदुक्तो माहात्म्यबोधकः ॥१॥

कारिकार्थ—इस अड़तीसवें अध्याय में तत्त्वज्ञानी- भगवान् के वास्तविक रूप को जाने हुए श्वफल्क के पुत्र अक्रूरजी के लिए मथुरा में चले जाने की आज्ञा देकर भगवान् ने मथुरा का अवलोकन किया । अक्रूर ने कंस से जाकर भगवान् का मथुरा

आना कहा और भगवान् ने धोबी आदि के वध से अपना माहात्म्य कंस को बतलाया, इत्यादि वर्णन है ॥१॥

कारिका—**गोपनार्थं परीक्षोक्ता हृदयारूढबोधनम् ।**
वाक्यैर्निरूपितं वर्ण्या प्रवेशे नगरी हरेः ॥२॥

कारिकार्थ—गुप्त रखने के लिए परीक्षा के लिए वाक्य कहे गए हैं । हृदय में दृढ़ हुए ज्ञान के वाक्यों द्वारा बतलाया है कि नगरी में भगवान् का प्रवेश होने पर ही नगरी वर्णन करने के योग्य होती है ॥२॥

कारिका—**उत्सवे तु यथा रोधः तथात्रापि चकार ह ।**
माहात्म्यज्ञापनार्थाय रजकं हतवान् स्वयम् ॥३॥

कारिकार्थ—उत्सव में जिस प्रकार निरोध किया जाता है, यहाँ भी भगवान् ने वैसा ही निरोध किया है । अपना माहात्म्य बताने के लिए स्वयं भगवान् ने रजक को मारा है॥३॥

कारिका—**अनिष्टेष्टप्रदो लोके महानिति निरूप्यते ।**
वायकस्य सुदाम्नश्च वरदानं यथेप्सितम् ॥४॥

कारिकार्थ—यहाँ -लोक में- कंस की नगरी में रहनेवाले अयोग्य पुरुषों को भी उनका वाञ्छित फल देनेवाला महान् कहा जाता है । इसीलिए लोगों को भी अपना माहात्म्य ज्ञान कराने के लिए, महत्त्व बतलाने के लिए ही वस्त्र पहनानेवाले तथा सुदामा मालाकार को उनका चाहा हुआ वरदान देना कहा गया है ॥४॥

लेख—गोपनार्थं-इत्यादि कारिका के पदों का तात्पर्य है कि अक्रूर ने जल में देखा हुआ रूप गुप्त वाक्यों से भगवान् को बतलाया । ऐसा बतलाने के लिये तूने जल में क्या विचित्र बात देखी ? भगवान् ने यह पूछ कर अक्रूर की परीक्षा की है, फिर अक्रूर ने अपने हृदय में आरूढ हुए ज्ञान-बोध-को गूढ़ वाक्यों के द्वारा निरूपण किया है ।

'उत्सवे'–इस कारिका में माहात्म्य इत्यादि पदों का भी अभिप्राय कंस को अपना महात्म्य का ज्ञान कराने के लिये ही भगवान् ने छूने के अयोग्य भी धोबी का वध किया । जिससे कंस को श्रीकृष्ण साक्षात् भगवान् हैं, ऐसा ज्ञान हो जाए ।

कारिका—प्रपञ्चविस्मृतिः सर्वा कृतानेन हि राजसे ।
स्वासक्तिरग्रे वक्तव्या सामान्यं तेन सेत्स्यति ॥५॥

कारिकार्थ—उनको वरदान देकर भगवान् ने अपना माहात्म्य ज्ञान करा कर इस राजस प्रकरण में प्रपञ्च का विस्मरण कराया । अपने में -भगवान् में- आसक्ति का निरूपण आगे करना है । इसलिए सामान्य -मध्यम- प्रकार का निरोध सिद्ध होगा ॥५॥

श्रीशुक उवाच—

श्लोक—स्तुवतस्तस्य भगवान् दर्शयित्वा जले वपुः ।
भूयः समहरत् कृष्णो नटो नाट्यमिवात्मनः ॥१॥

श्लोकार्थ—श्री शुकदेवजी कहते हैं-राजन्! श्रीकृष्ण भगवान् ने इस प्रकार स्तुति कर रहे अक्रूर को जल के भीतर अपने अपूर्व शरीर का रूप दिखला कर फिर छिपा लिया, जैसे नट अपनी कला -नाट्य- दिखा कर फिर उसे छिपा लेता है ॥१॥

सुबोधिनी—पूर्वाध्याये स्तुतिरुक्ता तामुपसंहरन् अग्रे भगवत्कृतमाह **स्तुवतस्तस्येति**, **तस्या**क्रूरस्य **स्तुवत** एव सतः न तु स्तोत्रसमाप्तौ तथा सति वरो देयः स्यात्, ननु कथमेव सामि कार्यं कृतवानित्याह **भगवा**निति, स्वच्छन्दात्मा, तावतैव कार्यसिद्धिं मत्वा, न हि ब्रह्मसाक्षात्कारः परमदुर्लभो बहुकालं भवति नाप्ययं वैकुण्ठे नीतः किन्तु **जले स्ववपु**र्ब्रह्माण्डात्मकं नारायणरूपं **प्रदर्शितवान्**, यथाविर्भावः तथा तिरोभावोपि वक्तव्य इति **भूयः समहरत्** उपसंहृतवान्, अनेन भगवति स्थित एवायं प्रपञ्चः ब्रह्माण्डात्मकः हस्तमिव प्रसार्य पुनरुपसंहृत इति निरूपितम् न तु तत्रत्यः मायाजवनिकादूरीकरणेन प्रदर्शित इति, यतोयं **कृष्णः** एतदर्थमेव सदानन्दोवतीर्ण इति, अन्तः स्थितमेव प्रदर्शितमित्यत्र दृष्टान्तमाह **नटो नाट्यमिवेति**, यथा नटविद्यामन्तः स्थितां बहिः प्रकटयत्यभिनयेन तथा **भगवान**प्येतादृश इति ज्ञापयितुं नारायणरूपं **प्रदर्शितवानित्यर्थः**, ननु नाट्ये वैलक्षण्यं प्रतीयते, न हि नाट्यमेतादृशमिति तत्राह **आत्मन** इति, अद्भुतमेतत् **नाट्यं** ॥१॥

व्याख्यार्थ—पहले -सेंतीसवें- अध्याय में अक्रूर के द्वारा भगवान् की स्तुति करना कह कर उस का उपसंहारपूर्वक इस 'स्तुवतस्तस्य' श्लोक से भगवान् के कर्त्तव्य का वर्णन करते हैं । जब अक्रूरजी स्तुति कर ही रहे थे और उनकी स्तुति समाप्त नहीं हुई थी, तब ही भगवान् ने अपने उस रूप को अन्तर्हित कर -छिपा- लिया । यदि स्तुति पूरी होने के बाद अपने श्रीअङ्ग को छिपाते तो भगवान् को अक्रूर के लिए वरदान देना होता ।

स्तुति पूरी न होने के पहले ही अपने दर्शन का अन्तर्ध्यान -छिपा- कर भगवान् ने यह अधूरा

काम क्यों किया ? इस शङ्का के उत्तर में कहते हैं कि श्रीकृष्ण भगवान् हैं, सर्वतन्त्र स्वतन्त्र हैं। अपनी इच्छा के अनुसार ही बर्ताव करने वाले हैं। इसलिए उतनी सो -अक्रूरी- स्तुति से ही कार्य की सिद्धि -पूर्ति- मान कर अपने स्वरूप को छिपा लिया; क्योंकि अत्यन्त दुर्लभ ब्रह्म का साक्षात्कार -दर्शन- बहुत देर -समय- तक नहीं होता रहता है। भगवान् इन्हें -अक्रूर को- वैकुण्ठ में तो ले ही नहीं गए थे, किन्तु जल के भीतर ही भगवान् ने इनको ब्रह्माण्डों से भरपूर अपने नारायण रूप से ही दर्शन दिए हैं।

जिस प्रकार आविर्भाव -प्रकट होना- कहा; उसी प्रकार तिरोभाव -अन्तर्ध्यान- होना कहना भी उचित है। इसलिए भगवान् ने उस रूप का तिरोभाव कर लिया। इस कथन से यह बतलाया कि भगवान् में रहने वाले अनेक ब्रह्माण्डों से भरपूर इस जगत् को, जैसे किसी वस्तु को हाथ फैला-लंबा-करके खींच लेते हैं, वैसे ही खींच -समेट- लिया; किन्तु माया के पर्दे को हटा कर वहीं जल में विराजमान अपने स्वरूप के दर्शन भगवान् ने नहीं कराए। कारण यह है कि आप श्रीकृष्ण हैं और इसी लिए ही सदानन्द रूप से आपने अवतार लिया है।

भगवान् अपने हृदय में ही रहे हुए प्रपञ्च के दर्शन उसी तरह से कराए जैसे नट अपने में ही रही हुई नट विद्या को अभिनय द्वारा प्रकट करता है। भगवान् भी नट जैसे ही हैं, यह बतलाने के लिए अक्रूर को अपने नारायण रूप के दर्शन कराए। यद्यपि नाट्य में तो नट जिसका स्वाङ्ग लेता है, वह और नट दोनों अलग अलग होते हैं; किन्तु यह भगवान् का नाट्य है, अद्भुत नाट्य है। इसमें भगवान् दूसरे का रूप ग्रहण करते नहीं ज्ञात होते हैं, किन्तु जो दूसरों का रूप दिखाते हैं, वे रूप भी भगवान् के ही रूप हैं ॥१॥

श्लोक—**सोपि चान्तर्हितं वीक्ष्य जलादुन्मज्ज्य सत्वरः।**
कृत्वा चावश्यकं सर्वं विस्मितो रथमागमत् ॥२॥

श्लोकार्थ—भगवान् को जल में न देख कर अक्रूरजी भी जल में से बाहर आ गए और शीघ्र सन्ध्या वंदन आदि आवश्यक नित्यकर्म करके आश्चर्य चकित होकर रथ पर आ गए ॥२॥

सुबोधिनी—सोपि भगवतैव कृतमिति ज्ञात्वा ज्ञाततत्त्वोन्तरङ्ग भगवत्समीपमागत इत्याह **सोपीति**, **अन्तर्हितं** स्वयमेव, अथवा **च**कारेण वा **अन्तर्हि** मध्ये हृदये **तं वीक्ष्य** बहिर्दृष्टमन्तः स्थापयित्वा,युक्तश्चायमर्थः अन्यथा दर्शनं व्यर्थं स्यात्, धर्मान्तरप्रवेशश्च स्यात्, ततो भयं च न निवर्तेत, अन्यथाबुद्धिश्च स्यात्, अत एव **जलादुन्मज्ज्य** स्नानविधिं त्यक्त्वा पूर्णो भूत्वा भगवदपराधं सञ्चिन्त्य **सत्वरः** अत्यावश्यकं कर्म शीघ्रं विधाय चकारादकृत्वापि, कथमेवं दुर्लभं प्रदर्शितवानिति **विस्मितः रथ**समीप**मागमत्** न तु मननादिकं कृत्वा निवृत्तो जातः ॥२॥

व्याख्यार्थ—तत्वज्ञानी तथा अन्तरंग सेवक अक्रूरजी भी भगवान् के स्वरूप का जल में दर्शन नहीं होना -तिरोधान होना- जान कर भगवान् के निकट आ गए, यह इस 'सोपि' श्लोक से कहते हैं।

भगवान् स्वयं-अपनी इच्छा से-ही तिरोहित हुए हैं, ऐसा जान कर अथवा हृदय में भगवान् के दर्शन करके जिनके बाहर दर्शन किये हैं, उनको हृदय में विराजमान करके अक्रूर जल से बाहर निकले। मूल श्लोक में (च) शब्द समुच्चय बोधक है अर्थात् ये दोनों अर्थ ही करना चाहिये। इन दोनों अर्थों में भी पिछला अर्थ ही अधिक उचित है, क्योंकि यदि उस बाहर दर्शन किये हुए भगवान् के स्वरूप को "हृदय में स्थापित नहीं करे तो भगवान् के दर्शन करना व्यर्थ हो जाय, अक्रूर का अन्य भगवान् से भिन्न धर्म में प्रवेश हो जाय उसका भय दूर न हो और उसकी बुद्धि विपरीत हो जाय।

इसीलिये अक्रूरजी जल से बाहर निकल कर स्नान की विधि का त्याग कर सज्ज-पूर्ण-हो कर, अपने किये-भगवान् के अपराध का विचार करके, अत्यन्त आवश्यक कर्म को शीघ्रता से करके,न भी करके रथ के समीप आ गये। वह मन में आश्चर्य कर रहे थे कि भगवान् ने मुझे ऐसे दुलर्भ दर्शन कैसे कराये,किन्तु फिर भी कंस की आज्ञा से भगवान् को मथुरा ले जाने को तत्पर रहे। भगवान् के ऐसे दुर्लभ दर्शन करके भी "दर्शन का" मनन न करके कंस की आज्ञा का ही ध्यान रक्खा ॥२॥

श्लोक—**तमपृच्छत् हृषीकेशः किं ते दृष्टमिहाद्भुतम् ।**
भूमौ वियति तोये वा तथा त्वां लक्षयामहे ॥३॥

श्लोकार्थ—भगवान् ने अक्रूर से पूछा—अक्रूर! तुम ने पृथ्वी पर, आकाश में तथा जल के भीतर कोई अद्भुत बात देखी है क्या? मुझे तुम्हारे मुख मण्डल पर कुछ विस्मय के चिन्ह दीख पड़ते हैं। इसी से ऐसा अनुमान होता है ॥३॥

सुबोधिनी—तदा भगवान् विस्मयांशोनुचित इति तन्निवृत्त्यर्थं किञ्चित् पृष्टवानित्याह **तमपृच्छ**दिति, यदि **भगवत्पृष्ट** वदेत् अन्यत्रापि वदेत् तदा न माहात्म्यं तस्य हृदयारूढं, भगवतेपि यदि न वदति तदान्यस्मै कथनसम्भावनैव न भवति, **हृषीकेश** इति, स्वयमेव तथा प्रेरितवान्, इच्छानिवर्तनार्थं परं पृष्टवानिति **किं ते** त्वया **दृष्टमिति**, **इहास्मिन्** जलाशये जलादिकं बह्वेव दृष्टमिति तद्व्यावृत्त्यर्थमाह **अद्भुतमिति**, आलौकिकमदृष्टपूर्वमद्भुतं, दृष्टं वस्तु अन्याधारं जानाति न वेति तन्मनोनिश्चयार्थं स्थानानि निर्दिशति, **भूमौ वियति तोये वेति**, दर्शनसमये भूमिरिव दृष्टा युक्त्या गन्धर्वनगरादिवत् आकाशेपि दर्शनं सम्भवति निमज्ज्य पश्यतीति जल एव भवति, वेत्यनादरे यत्र क्वचित्, अवश्यं दृष्टमिति अलौकिकं ज्ञानं गोपयितुमाह **तथा त्वां लक्षयामह** इति, अद्भुतदर्शनमिव, स ह्याश्चर्याभिनिविष्टः प्रपञ्चमग्रिमकार्यं च न स्मरतीति ॥३॥

व्याख्यार्थ—उस समय भगवान् ने अक्रूरजी को कुछ आश्चर्य में मग्न देखा, यह विस्मय का अंश रहना अनुचित जान कर उसे दूर करने के लिये भगवान् ने उनसे कुछ पूछा, यह इस 'तमपृच्छत्'-श्लोक से कहते हैं।

यदि भगवान् के पूछने पर उनसे कह देता तो दूसरे के पूछने पर दूसरा भी कह देगा, तब तो यही जाना जायगा कि भगवान् का माहात्म्य उसके हृदय में दृढ़ आरूढ़ नहीं हुआ और यदि

भगवान् के पूछने पर भी नहीं कहे तो औरों से कहने की सम्भावना ही नहीं रहती है। स्वयं भगवान् ने ही ऐसी प्रेरणा की और दूसरों से कहने की उनकी इच्छा को रोक रखने के लिये प्रश्न किया, क्योंकि आप हृषीकेश-"हृषीक-इन्द्रियों के ईश-प्रेरणा करने वाले" हैं।

भगवान् ने उनसे पूछा कि इस जलाशय में तुमने क्या अद्भुत दृश्य देखा ? अक्रूरजी इस प्रश्न का उत्तर साधारण जल का बड़ा प्रवाह देखना आदि ही देकर चुप न हो जाय। इसलिये प्रश्न में अद्भुत शब्द दिया है। पहले कभी न देखा हो ऐसे अलौकिक को ही अद्भुत कहते हैं। पृथ्वी पर, आकाश में अथवा जल के भीतर शब्दों को अक्रूर के मन का निर्णय-निश्चय-जानने के लिये कहा है कि क्या यह इस देखे हुए अद्भुत दृश्य का आधार किसी अन्य को माना है या नहीं ? अक्रूर ने जिस समय देखा तब पृथ्वी पर और आकाश में भी गन्धर्वनगर "मृगतृष्णा" के जल की भूमि में नगर का बस जाना, उलटा हो जाना" सा देखा क्या ? अथवा जल में डूब कर देखने से जल में ही देखा हो। अथवा शब्द अनादर सूचक है अर्थात् जल, थल, आकाश कहीं भी देखा हो।

अक्रूर तुमने अवश्य देखा है। इस प्रकार के अपने अलौकिक ज्ञान को गुप्त रखने-छिपाने-के लिये तुमने कहीं कुछ अद्भुत देखा होगा, ऐसा प्रश्न किया है, क्योंकि तुम आश्चर्य में डूबे से दिखाई देते हो और जगत् का तथा आगे अपने कर्तव्य का तुम्हें स्मरण नहीं रहा हो। ३॥

कारिका—**प्रसन्नो ह्यन्यथा दृष्टिरद्भुतार्थनिरीक्षकः।**
तादृशं भगवान् दृष्ट्वा दर्शनं कल्पयेत् पुनः ॥१॥

कारिकार्थ—शरणागत जीव यदि भगवान् के अतिरिक्त अन्य में दृष्टि रखने वाला (अन्यथा दृष्टि) होता है, तभी वह अद्भुत पदार्थों को देखने वाला होता है। भगवान् ने अक्रूर को अन्यथा दृष्टिवाला मान कर फिर उसके अद्भुत देखने की कल्पना की ॥१॥

अक्रूर उवाच—

श्लोक—**अद्भुतानीह यावन्ति भूमौ वियति वा जले।**
त्वयि विश्वात्मके तानि किं मेऽदृष्टं विपश्यतः ॥४॥

श्लोकार्थ—अक्रूर ने कहा–भगवान्! पृथ्वी,आकाश अथवा जल में जो कुछ अद्भुत है, वे सब आप में विराजमान हैं, क्योंकि आप विश्व रूप हैं। मैंने जब आपके विशेष रूप से प्रत्यक्ष दर्शन कर लिए, तब कौन सी अद्भुत वस्तु नहीं देखी ? ॥४॥

सुबोधिनी—अक्रूरस्तु ज्ञातमाहात्म्यः तन्न वक्तव्यमिति ईश्वरपृष्टं वक्तव्यमिति ज्ञात्वा सामान्यत उत्तरमाह **अद्भुतानीति**, स्वरूपमाधारः भगवानेवेति प्रदेशान्तरप्रश्नोनुपपन्नः, सोपि वा प्रदेशः

त्वय्येवास्तीति न त्वत्तोन्यत्राद्भुतमस्ति, त्वद्दर्शनं तु अद्भुतमेवेति चिन्हमप्यव्यभिचारि, **इहास्मिन्** समये देशे वा, **भूमौ वियति जले वा यान्यद्भुतानि तानि त्वय्येव** यतस्त्वं **विश्वात्मकः**, विश्वस्मिन्नेव ह्यद्भुतानि भवन्ति, अतस्तानि **किं मे** मया न दृष्टानि यतस्त्वां **विपश्यतः**, अदृष्टस्तु त्वं केनापि, अन्यस्याद्भुतत्वमेव नास्ति केनचिद् दृष्टत्वात् भगवांस्तु सर्वादृष्टः, तादृशमदृष्टं भगवन्तं **विपश्यतो मे किं तानि** न दृष्टानीत्यर्थात्, **तानीति** पूर्वत्रैव वा अनुवादः, सर्वाद्भुताधारे दृष्टे नादृष्टं किञ्चिदवशिष्यत इति आक्षेपोयुक्तः ।।४।।

व्याख्यार्थ—भगवान् के माहात्म्य को जानने वाले अक्रूर ने स्वयं देखा, उसे नहीं कहना चाहिये और भगवान् के पूछने पर तो कहना चाहिये। ऐसा समझ कर इस 'अद्भुतानीह' श्लोक से साधारण रूप से अक्रूरजी उत्तर देते हैं। हे भगवान् ! सब का रूपवाले तथा सबके आधार आप ही हैं। इसलिये किसी अन्य स्थान में अद्भुत वस्तु के देखने का प्रश्न अनुचित है अथवा अन्य किसी स्थान पर देखा हो तो वह स्थान भी तो आप ही में है। आपके अतिरिक्त अद्भुत पदार्थो के रहने का कोई ठिकाना नहीं हैं। आप का दर्शन भी तो अद्भुत ही है। इसलिये इन सारे अद्भुत पदार्थों का आप में होना अपवाद रहित है। सभी अद्भुत पदार्थो का आप में रहना चिन्ह–होना-किसी भाँति भी दूषित नहीं है।

इस समय में अथवा भूमि, अकाश और जल में जितने भी कहीं भी अद्भुत दृश्य हैं, वे सारे के सारे आप में ही हैं, क्योंकि आप विश्वरूप ही ठहरे और विश्व में ही सब विचित्र-अद्भुत-होते हैं, "हो सकते हैं"। तब आप के दर्शन कर लेने वाले मैंने कोन से अद्भुत दृश्य न देख लिये अर्थात् सारे ही देख लिये। आपके दर्शन तो कोई कर ही नहीं सकता और आपके अतिरिक्त किसी अन्य दूसरे में अद्भुतता है ही नहीं, जो किसी ने देखो है आप भगवान् तो सबसे ही अदृश्य हैं "किसी से भो नहीं देखे जा सकते हैं।" तात्पर्य यह है कि उन किसी से भी नहीं देखे हुए भगवान् के दर्शन करने वाले मैंने तो वे पहले (उपर) कहे हुए सारे ही अद्भुतों को देख लिया हैं, क्योंकि सारे अद्भुतों का आधार "भगवान्" के देख लेने पर कोई अद्भुत शेष (बाकी) नहीं रहता है। इसलिये मैंने अद्भुत जैसा देखा है, वैसा अनुमान करना उचित नहीं है ।।४।।

श्लोक—**यत्राद्भुतानि सर्वाणि भूमौ वियति वा जले ।**
तं त्वानुपश्यतो ब्रह्मन् किं मेदृष्टमिहाद्भुतम् ।।५।।

श्लोकार्थ—हे परमेश्वर! पृथ्वी, आकाश अथवा जल में होने वाली सारी अद्भुत बातों के एक मात्र आप ही आधार हैं। सर्वाधार उन -आप- के दर्शन करने वाले, मैंने अब कौनसा अद्भुत दृश्य नहीं देखा ? अर्थात् सारे ही अद्भुत दृश्य देख चुका हूँ ।।५।।

सुबोधिनी—कदाचिदयमुपचाराद् वदतीति पुनः प्रश्नशङ्कायामाह **यत्राद्भुतानीति**, **यत्र** क्वचि- **दद्भुतानि** लोके दृश्यन्ते तानि त्वय्येव वस्तुतः, अतो येनकेनचिदपि त्वय्येव चेदद्भुतानि दृष्ट-

व्यानि तदा **त्वां पश्यतो मे किं** वा **अद्भुतमदृष्टं** अनेन तत्रापि त्वमेवाद्भुतो दृष्टः त्वय्येव च दृष्टं त्वमेव सः त्वय्येव तदिति सर्वाधारस्त्वमेवेत्याधारप्रश्नोपि न कर्तव्य इति, भगवन्तमाधारत्वेन निर्दिशति **तं त्वेति**, **ब्रह्मन्निति** तत्समर्थनायोपपत्तिः ॥५॥

व्याख्यार्थ—अक्रूर ये सब बातें उपचार-सभ्यता-से कह रहा है, ऐसा मान कर भगवान् कदाचित् फिर पूछेंगे, ऐसी शंका करके यह "यत्राद्भुतानि" श्लोक कहते है। लोग जहां भी अद्भुत दृश्य देखते हैं, उन सभी स्थानों में वस्तुतः अद्भुतता आप में ही है। इसलिये जो कोई भी अद्भुत देखने वाले लोग आप में ही अद्भुत "दृश्यों" को देखते हैं, तब फिर आपके दर्शन कर लेने वाले मेरा कौन सा अद्भुत बिना देखा है ? इसलिये वहां जल में भी मैंने अद्भुत आप का ही दर्शन किया तथा आप में ही सारा अद्भुत को देखा । आप ही अद्भुत हैं, क्योंकि आप ही सब के आधार हैं। इसलिये आधार सम्बन्धी प्रश्न करना ही अनुचित है। उन आप भगवान् का श्लोक में 'तंत्वा' (उन आपको) पदों से आधार रूप से निर्देश करते हैं और इस सर्वाधारता का समर्थन 'ब्रह्मन्' इस सम्बोधन से प्रदर्शित किया है ॥५॥

श्लोक—इत्युक्त्वा चोदयामास स्यन्दनं गान्दिनीसुतः ।
मथुरामनयद् रामं कृष्णं चैव दिनात्यये ॥६॥

श्लोकार्थ—श्री शुकदेवजी कहते हैं-यों कह कर गान्दिनी के पुत्र अक्रूर ने रथ को हांक दिया और सांयकाल होते होते श्रीकृष्ण तथा बलरामजी को मथुरा में लिवा लाए ॥६॥

सुबोधिनी—एवं परौक्षेणोत्तरमुक्त्वा भगवदिच्छां ज्ञात्वा रथं प्रेरितवानित्याह **इत्युक्त्वेति**, भगवद्वाक्ये नावहेलेति उत्तरमुक्त्वा पश्चाद् रथं **नोदयामास**,ननु कास्योत्तालता तथा ज्ञात्वा भगवान् सम्यक् प्रसादनीयः किं वा भगवतः कार्यं तुच्छं हि तत् तत्राह **गान्दिनीसुत** इति, गोदानेन चोत्पन्ना गोरूपैव भवति तस्याश्च पुत्रः सौरभेय एव परं भगवन्तं **मथुरां** प्रापयन्, **रामो** हि रतिकर्ता **कृष्णश्च** तत्फलं सदानन्दः, स चेत् नगर्यां प्रतिष्ठितो भवति तदा तत्रत्यानां निरन्तरमेव सुखं भवतीति, **दिनात्यये** सन्ध्याकाले, सा हि गोधूलिकाप्रवेशे सुमुहूर्ता भवति, **च**कारात् मध्ये स्थितान् सर्वानेव, भगवदिच्छयैव सन्ध्याकालोपि अपराह्णो भविष्यति, यावता च कालेन कार्यं भविष्यति तावान् कालो ग्राह्यः,अन्यथा **दिनात्ययपदं** बाधितं स्यात्, अत्ययारम्भे वा मध्याह्नोपरि, मध्याह्ने अतिक्रान्ते दिनमतिक्रान्तमेवेति, मथुरास्थ**दिनानां** वा दुःखदानाम**त्यये** स्वस्य वा ॥६॥

व्याख्यार्थ—इस प्रकार परोक्ष गूढ रीति से उत्तर देकर अक्रूर ने भगवान् की इच्छा जान कर रथ आगे हाका, यह इस "इत्युक्त्वा" श्लोक से कहते हैं। भगवान् के प्रश्न की अवहेलना नहीं की जा सकती, इसलिये "भगवान् के" प्रश्न का उत्तर देने के बाद रथ आगे हांका। अक्रूर में ऐसी क्या उत्तमता थी कि वह इस तरह भगवान् की इच्छा जान कर उन्हें अच्छे, प्रकार से प्रसन्न कर सके ? और भगवान् को ही आगे पधारने का ऐसा कौन काम था ? क्योंकि वह काम तो तुच्छ था,

ऐसी शंका के उत्तर में कहते हैं कि वह "अक्रूर" गान्दिनी का पुत्र है। गायों के दान करने से उत्पन्न हुई गान्दिनी गाय जैसी ही होती है और उसका पुत्र,भगवान् को मथुरा पहुँचाने वाला बैल, क्योंकि राम रति "रमण" करने वाले और "श्रीकृष्ण" उस रति का 'फल' सदानन्द हैं, यदि वे नगरी में निवास कर लेते है तो नगरी के सारे निवासियों को सदा ही सुख की प्राप्ति होगी।

दिन के अन्त में अर्थात् सायंकाल में मथुरा (भगवान् को) लाया क्योंकि सायंकाल गोधूलि "जिस समय गायें वन में से ग्राम में आती हैं" वेला नगरी में प्रवेश करने का उत्तम मुहूर्त होता है। मार्ग में रहने वाले "लोगों" को भी भगवान् के दर्शन के लिये मथुरा लेते आये। भगवान् की इच्छा से ही सन्ध्या काल भी पिछला पहर हो जाएगा, और मथुरा पहुँचने के बाद उस दिन का कर्तव्य कार्य पूरा हो सके, इतना समय भी लेना उचित है। इतने समय पहले न पहुंचते तो दिन के अन्त में कहना व्यर्थ-बाधित-हो जाएगा, इसलिये गोधूलि बेला में ही मथुरा पहुँच गये।

अथवा दिन के अन्त का आरम्भ होते २ अर्थात् मध्यान्ह पीछे मथुरा पहुँच गये,क्योंकि मध्यान्ह के बीत जाने पर दिन का अन्त होना ही गिना जाता है। अथवा मथुरा निवासियों को दुःख देने वाले दिन का अन्त अथवा स्वयं "अक्रूर को" दुःख देने वाले दिन का अन्त होते समय अक्रूरजी भगवान् को मथुरा ले आये ॥६॥

श्लोक—**मार्गे ग्रामजना राजन् तत्र तत्रोपसङ्गताः।**
वसुदेवसुतौ वीक्ष्य प्रीता दृष्टिं न चाददुः ॥७॥

श्लोकार्थ—मार्ग में जाते समय श्रीकृष्ण और बलदेव जिस गाँव के निकट पहुँचते थे, उस गाँव के निवासी लोग उनके पास आकर उनके अनूप रूप को देखकर प्रीतिपूर्वक एकटक उन्हें निहारते ही रह जाते थे। दोनों भाईयों के मनोहर वेष को देख कर वे अत्यन्त प्रसन्न हुए ॥७॥

सुबोधिनी—ततो भगवान् शनैर्गच्छन् सर्वानन्दकरो जात इत्याह **मार्ग** इति,मध्ये ये **ग्रामाः** तदीया वा सर्वत्र **मार्गे**, **राजन्निति** सम्बोधनं तथानुभवाय, **तत्र तत्रेति**, न देशविषशेस्तेषां दर्शने, अभिप्रेते अनभिप्रेते च देशे **उपसङ्गताः** निकटे समागताः, **वसुदेवसुता**वेताविति **वीक्ष्य** सम्बन्धात् स्वरूपाच्च **प्रीताः** भगवते दत्तदृष्टयः **चकारात्** सर्वमपि दत्त्वा **नाददुः** न पुनर्गृहीतवन्तः, सामान्येन मार्गस्थानां निरोध उक्तः, दृष्टेरग्रहणे हेतु **प्रीताः** इति, प्रीतिरेव दानफलं जातमिति पुनः कथं ग्रहणं भवेत्, सुखार्थमिन्द्रियाणां परिग्रहः, तस्मिन् जाते न प्रवर्तन्त एव, तेषामधिका बुद्धिर्न जातेति **वसुदेवसुत**त्वोक्तिः ॥ ७ ॥

व्याख्यार्थ—मार्ग में मन्दगति से पधारने वाले भगवान् ने सब को आनन्द दिया, यह "मार्गे" इस श्लोक से कहते हैं। बीच में जो गांव थे और उन के रहने वाले सभी लोग जो मार्ग में थे, वे सभी एक टकटकी से भगवान् (वसुदेव के पुत्र) कृष्ण, बलराम को देखते ही रहे। भक्त परीक्षित को ऐसा अनुभव है, इस बात को सूचित करने के लिये श्लोक में "राजन्" यह सम्बोधन दिया है।

स्थान स्थान पर अर्थात् वसुदेव पुत्र उन दोनों के दर्शन करने में किसी स्थान का गौरव-महत्व-नहीं था। वांच्छित और अवांच्छित देश-स्थान-में वे सब भगवान् के समीप आ गये। ये दोनों वसुदेव के पुत्र हैं, यह देख कर उनके सम्बन्ध और स्वरूप से वे प्रीतिपूर्वक उन दोनों भाईयों को निहारते रहे और उन्होंने अपना सर्वस्व भगवान् के समर्पित करके वापस नहीं लिया। इस कथन से मार्ग में रहने वाले लोगों का सामान्य रीति से निरोध सिद्धि का निरूपण किया है। प्रीताः "प्रीति वाले" शब्द से दृष्टि को भगवान् के श्री अंग के अवलोकन में लगा कर पीछी "वापस" न खींचने में कारण कहा है। दृष्टि के दान (लगाने) का फल प्रेम ही हुआ। इसलिये वे उस प्रीतिरूप फलवाली दृष्टि को वापस कैसे खींच हटा लेते ? लोग सुख के लिये इन्द्रियों को रखते हैं और सुख मिल जाने के बाद इन्द्रियों की प्रवृति ही नहीं होती है। श्रीकृष्ण और बलरामजी को देख कर उन लोगों की अधिकतर ये 'परब्रह्म पुरुषोत्तम हैं', ऐसी बुद्धि नहीं हुई, इसीलिये 'वसुदेव पुत्र' ऐसा कहा है ॥७॥

श्लोक—**तावद् व्रजौकसस्तत्र नन्दगोपादयोऽग्रतः ।**
पुरोपवनमासाद्य प्रतीक्षन्तोऽवतस्थिरे ॥८॥

श्लोकार्थ—इस बीच में नन्दादि व्रजवासी गोप जन पहले ही पहुँच चुके थे। वे नगरी के बगीचा-उपवन-में ठहर कर कृष्ण बलदेव की आने की राह देख रहे थे ॥ ८ ॥

सुबोधिनी—भगवद्गमनात् पूर्वमेव नन्दादयः मथुरोपवनपर्यन्तं गताः अग्रे भगवति समागते गन्तव्यमिति प्रतीक्षयैव स्थिता इत्याह **तावदिति**, यतस्ते **व्रजौकसः** अनावृत एव देशे स्थातुं योग्याः अत एवाग्रेऽपि गताः, बहवो बालकाः भगवन्मित्राणि सहैव स्थिताः **नन्दगोपादय** एव परं वृद्धाः **पूर्वं** गता **उपवनं** नानाविधफलप्रधानं मथुरा निकटस्थं **अवतस्थिरे** केवलं स्थिताः न तु तस्थिति योग्यं साधनमपि सम्पादितवन्त इत्यर्थः, अनेन व्यवहार एव भगवतोऽपि प्राधान्यं सूचितम् ॥८॥

व्याख्यार्थ—भगवान् के मथुरा पहुँचने के पहले ही नन्द आदि वहां पहुँच गये और भगवान् पधारें तब आगे चलेंगे, इस विचार से उनकी राह ही देखते रहे। यह इस "तावद्" श्लोक से कहते हैं। वे व्रजवासी थे, इसलिये खुले स्थान में ही रहने योग्य थे और इसीलिये वे भगवान् के पहले ही मथुरा पहुंच गये। अनेक गोपबालक जो भगवान् के (मित्र) सखा थे। भगवान् के साथ ही थे। केवल वयोवृद्ध नन्द आदि ही आगे गये थे और वे भी मथुरा के निकट अनेक प्रकार के फलों के कारण प्रसिद्ध बगीचे के पास जा कर खड़े ही रहे। उन्होंने भी वहां अपने रहने योग्य साधन एकत्रित नहीं किये थे। इस कथन से यह सूचित किया है कि व्यवहार में भी भगवान् ही मुख्य थे ॥८॥

श्लोक—**तान् समेत्याह भगवानक्रूरं जगदीश्वरः ।**
गृहीत्वा पाणिना पाणिं प्रश्रितं प्रहसन्निव ॥९॥

श्लोकार्थ—भगवान् जगदीश्वर श्रीकृष्ण भी उन लोगों से आ कर मिल गये।

इसके अनन्तर श्रीकृष्ण ने नम्र भाव से खड़े हुए अक्रूर का हाथ अपने हाथ में लेकर पकड़ कर हंसते हुए कहा ॥६॥

सुबोधिनी—ततोक्रूरविसर्जनमाह **तानसत्येति**, अक्रूरे स्थिते लोकव्यवहारे पितृव्य इति स्वच्छन्दलीला नोचितेति व्यवहारेपि निबंन्धेन नागत इति ख्यापयितुं **तान्** नन्दादीन् **समेत्य अक्रूरं** प्रत्याह **भगवानिति**, निःशङ्कः, बहिः स्थिते कंसः कदाचिदुपद्रवं कुर्यादिति शङ्काभावायाह **जगदीश्वर** इति, स एव हि जगतो नियन्ता स्वामी ऐश्वर्यं गुप्तं कृत्वा सख्यबन्धुत्वादिप्रकटनार्थं **पाणिना पाणिं गृहीत्वा** तेन नम्रं **प्रहसन्** व्यामोहयन् पूर्वावस्थां तस्य सम्पादयन् वक्ष्यमाणमब्रवीत् भगवद्वाक्ये चित्तदार्ढ्यार्थं पृथङ् निरूपणम् ॥६॥

व्याख्यार्थ—तब भगवान् ने अक्रूर को मथुरा में जाने की आज्ञा दी जो "तावत्" इस श्लोक से कहते हैं।

लोक व्यवहार में अक्रूरजी भगवान् के काका होते हैं। इसलिये उनके साथ रहने पर स्वच्छन्द रीति से लीला करना उचित नहीं, इसलिये तथा बहुत आग्रह करने पर भी भगवान् अक्रूर के साथ-साथ नहीं पधारे ऐसी बात को प्रसिद्ध करने के लिये भी भगवान् उन नन्द आदि गोपों के पास आकर अक्रूरजी से बोले—भगवान् निःशंक हैं, उन्हें यह शंका जरा भी नहीं थी कि बाहर रहने पर कंस कुछ अनिष्ट कर देगा, क्योंकि सारे ही जगत् के स्वामी नियन्ता तो आप स्वयं ही हैं। फिर भी अपने ऐश्वर्य को गुप्त "छिपा" रख कर मित्रता के तथा जातीय सम्बन्ध को प्रकट करने के लिये भगवान् अपने श्रीहस्त से विनीत अक्रूर का हाथ पकड़ कर हंसते हंसते अक्रूर को मोहित करते हुए और उसको पहले की यमुनाजी के जल में अद्भुत दर्शन की स्थिति में लाकर यों अगले दसवें श्लोक में कहे प्रकार से कहने लगे। भगवान् के वचनामृत में चित दृढ़तापूर्वक लगने के लिये भगवान् के वाक्यों को अलग दशवें श्लोक में कहा गया है ॥६॥

श्लोक—**भवान् प्रविशतामग्रे सहयानः पुरीं गृहम्।**
वयं त्विहावमुच्याथ तावत् द्रक्ष्यामहे पुरीम् ॥१०॥

श्लोकार्थ—आप रथ लेकर पहले नगर में चलिये और अपने घर में विश्राम करिये। हम लोग थोड़ी देर तक यहीं ठहरेंगे और फिर पुरी को शोभा देखेंगे ॥१०॥

सुबोधिनी—वचनमेवाह **भवानीति**, असम्बन्धख्यापनार्थं **भवानीति**, अस्मत्प्रवेशात् पूर्वमेव, अन्यथा तव कार्यं कृतमपि उपद्रवादकृतं मन्येत कंसः, ततो गृहेपि त्वया गन्तव्यं, अन्यथा कंसः अस्मन्निषेधार्थं त्वां प्रेरयेत्, तच्चानुचितं, यथा तवापराधो न भवति तदर्थं **वयमिहैव** प्रति**मुच्य** शिबिरं कृत्वा **अथ** भिन्नप्रक्रमेण, **तावत्** यावत् कंसः आकारयिष्यति तावत् **पुरीं द्रक्ष्यामः** अनेन पुरी सम्यक् स्थापिता न वेति ॥ १० ॥

व्याख्यार्थ—"भवान्" इस श्लोक से भगवान् के वचन का वर्णन करते हैं। अक्रूर और

श्रीकृष्ण के सम्बन्ध को जान कंस अक्रूर को बाध्य करे, इसलिये परस्पर दोनों में कोई सम्बन्ध नहीं है, ऐसा बतलाने के लिये "आप पहले जाइये" यों कहा है। हमारे मथुरा में प्रवेश करने के पहले आप जाइये। यदि आप "अक्रूर" के पहले नहीं जाओगे तो कंस तुम्हारे किये हुए काम को भी-धोबी आदि भावी उपद्रव के कारण नहीं किया हुआ मान लेगा। फिर आप अपने घर भी जाओ। यदि घर नहीं जाओगे तो कंस हमें रोकने के लिये आप को ही भेज देगा और यह अनुचित होगा। जैसा आप (अक्रूर) का अपराध न माना जावे, वैसे हम यहां ही विश्राम करके और फिर-पृथ-भिन्न रीति से आरम्भ करके कंस बुलावेगा, तब कंस ने पुरी की सजावट-व्यवस्था-ठीक ठीक की है या नहीं पुरी को देखेंगे ॥१०॥

अक्रूर उवाच

श्लोक—**नाहं भवद्भ्यां रहितः प्रवेक्ष्ये मथुरां प्रभो।**
त्यक्तुं नार्हसि मां नाथ भक्तं ते भक्तवत्सल ॥११॥

श्लोकार्थ—अक्रूर ने कहा—हे प्रभो, आप दोनों को यहाँ छोड़ कर मैं अकेला पुरी में नहीं जाऊंगा। हे भक्तों पर प्रेम रखने वाले नाथ मैं आपका भक्त हूँ, मुझे मत छोड़िये ॥ ११ ॥

सुबोधिनी—भगवान् मध्ये उदासीनमिवोक्तवानिति तदसहमानः किञ्चित् प्रार्थयति **नाहमिति षड्भिः**, सर्वे हि भगवद्गुणास्तेन वर्णनीया इति, सह्येवं ज्ञातवान् यथा कंसादयस्तथायमिति ज्ञात्वा भगवान् मां दूरीकरोतीति, एवं सति भगवान् स्वच्छन्दलीलां करोतु नाम मयाप्यत्रैव स्थातव्यं क्वचित् न तु भगवद्रहितं पुरं गृहं वा प्रवेष्टव्यं, अत एव **वैराग्यविधिः भगवदभावे गृहादिकं त्यक्तव्यमिति** अतो, **भगवद्भ्यां रहितः** शब्दब्रह्मपरब्रह्मभ्यां मधुदैत्ययुक्तां तत्सम्बन्धिनीं **मथुरां प्रवेक्ष्ये** 'नैतमृषिं विदित्वा नगरं प्रविशेद् यदि प्रविशेत् मिथो चरित्वा प्रविशे'दिति श्रुतेः, शङ्का तु तव नास्तीत्याह **प्रभो** इति, अतः परमनागमने मत्यागो हेतुः, तत् न कर्तव्यमिति प्रार्थयति, **त्यक्तुं नार्हसीति, नाथे** त्यक्ते न कापि पाल्यानां गतिर्भवतीति, तत्रापि **भक्तं**, तत्रापि **ते**, अवतारलीलाविशेषभक्तं, कार्यार्थं त्याग इति चेत् तत्राह **भक्तवत्सलेति**, भक्तेषु वात्सल्यं तिष्ठतीति **न कदाचिदपि भक्तास्त्यक्तव्याः** ॥११॥

व्याख्यार्थ—भगवान् के बीच में असम्बन्धी का व्यवहार दिखलाने के कारण उदासीन भाव को सहन नहीं कर सकने वाले अक्रूरजी "नाहं" इस श्लोक से आरम्भ करके छः श्लोकों से भगवान् की प्रार्थना -किसी प्रकार- करते हैं। भगवान् के ऐश्वर्य, वीर्य आदि छः गुणों का वर्णन करना चाहिये, इसलिये छः श्लोक हैं। अक्रूर और भगवान् के सगे सम्बन्ध को जान कर कंस अक्रूर के साथ दुर्व्यवहार करे। इस अभिप्राय से सम्बन्ध का अभाव कहा गया है। अक्रूर ने यह विचारा कि भगवान् मुझे (अक्रूर) को भी कंस की तरह पराया मान कर दूर करते हैं। यदि ऐसा हो तो भगवान् भले ही स्वेच्छानुसार स्वच्छन्द लीला करें, परन्तु मुझे भी यहीं कहीं रहना चाहिये। भगवान् के बिना (छोड़ कर) नगरी में अथवा घर में प्रवेश नहीं करना चाहिये। इसीलिये वैराग्य

का नियम है कि जहां भगवान् की प्राप्ति न हो, ऐसे घर आदि त्याग देने चाहिये। इसको "ऋषि जान कर नगर में प्रवेश न करें जो प्रवेश करें तो दो मिल कर प्रवेश करें", इस श्रुति के अनुसार मैं मधु शब्दब्रह्म आप दोनों के बिना मधुदैत्यवाली(मधुदैत्य की सम्बन्धिनी)मथुरा में प्रवेश नहीं करूँगा।

आपको कोई भय तो है ही नहीं, क्योंकि आप तो प्रभु हैं, सर्वशक्ति मान हैं। इसलिये यहाँ बगीचे से आगे नहीं पधारने का कारण केवल मेरा त्याग करना ही है। हे प्रभो भक्तवत्सल! मेरा त्याग करना (आपको) उचित नहीं है, क्योंकि मैं तो भक्त हूँ और भक्त भी आपका ही हूं। स्वामी के त्याग करने पर सेवकों का कोई रक्षक नहीं है। कार्य विशेष के लिये त्याग भी कर देना पड़ता है, ऐसो शंका के उत्तर में कहते हैं कि आप तो भक्त वत्सल हैं। भक्तों पर आपका प्रेम रहता है। इसलिये भक्त का किसी समय में भी त्याग करना उचित नहीं हैं ॥११॥

श्लोक—**आगच्छ याम गेहान् नः सनाथान् कुर्वधोक्षज।**
सहाग्रजः सगोपालैः सुहृद्भिश्च सुहृत्तम ॥ १२ ॥

श्लोकार्थ—हे अधोक्षज, हे परम मित्र, आप अपने बड़े भाई बलदेवजी, गोप ग्वाल और मित्रों के साथ हमारे घर पधारो और हम लोगों को सनाथ बनावें (करो) ॥ १२ ॥

नगरेऽस्थानं नास्तीति चेत् तत्राह **आगच्छेति**, सर्वैः सहागच्छ, गृहं तुल्यमिति ख्यापयितुं **याम** इति सर्वेषां गमनं तुल्यं निरूपितं, **नो गेहानिति** बहवो वयं भ्रातरः, एकैकस्य गृहा अपि बहवः, अतो न स्थलसङ्कोचः, ननु विशेषाभावादत्रैव स्थातव्यमिति चेत् तत्राह **सनाथान् कुर्विति**, यो हि प्रभुर्भवति स स्वगृहे तिष्ठति न त्वन्यगृहे, यद्यस्मद्गृहे **त्वया** न स्थितं स्यात् तदा अस्मन्नाथो न भवेः, तदा वयमनाथाः, अतः **सनाथान् कुरु**, अस्मत्सम्बन्धेन तवापराधो भविष्यतीति चेत् तत्राह **अधोक्षजेति**, ज्ञानविषय एव त्वं न भवसि कुतस्तरां क्रियाविषयो भविष्यसीति, अनेन भगवतो ज्ञानशक्तिर्निरूपिता, 'यस्यामतं तस्य मत'मिति, तर्ह्येकाकी समागमिष्यामीत्याशङ्कायामाह **सहाग्रज** इति, तवाप्यग्रजस्य सुतरामेव न भयं मान्यश्च, गोरक्षणधर्मात् अचातुर्याच्च **गोपालानां** भयशङ्कैव नास्ति, त्वयि सति केषामपि न भयमिति वक्तुं **सुहृद्भिः** सहेति, **गोपाला** एव **सुहृदः** नन्दादयो वा बान्धवाः, **चकारात्** सर्वे सेवकाः अनांसि वृषभादयश्च, ननु कथमेतावद्भिः सह गन्तव्यमिति चेत् तत्राह **सुहृदिभिश्च सुहृत्तमेति**, स्वामी भवानत्यन्तं सुहृत्, भवत्सम्बन्धिनः सुहृत्तराः, अन्ये सेवकादयः सुहृदः, अतः सर्वैरेवागन्तव्यम् ॥१२॥

व्याख्यार्थ—नगर में आपके विराजने का स्थान न हो ? ऐसी शंका के समाधान में 'आगच्छ' यह श्लोक कहते है। आप सबको साथ लेकर पधारो। घर सब के लिये समान ही है। इसलिये याम "हम सब चलें" सब का समान रीति से घर चलना कहा है। हमारे घरों को चलिये। इस कथन का अभिप्राय यह है कि हम बहुत भाई हैं और अनेक हैं। इसलिये स्थान की कमी (संकोच) नहीं है।

घर जाने का कोई कारण नहीं होने से यहां बगीचे में ठहरना ही उचित है ? इसलिये कहते हैं कि नाथवाले-सनाथवाले-कीजिये, क्योंकि धनी-स्वामी-अपने ही घर रहता है, दूसरों के घर नहीं रहता। यदि आप हमारे घर नहीं रहोगे तो हमारे नाथ हो, यह कैसे जाना जायगा ? तब तो हम अनाथ ही हैं। इसलिये हमारे घर पर पधार कर हमें सनाथ करें।

ऐसा करने (घर चलने) पर तेरे (अक्रूर के) साथ भगवान् का सम्बन्ध जान कर कंस तेरा (अक्रूर) का कुछ अपराध समझेगा। इस बगीचे में ही ठहरना ठीक है, ऐसी शंका के समाधानार्थ कहते है कि आप (भगवान्) तो अधोक्षज हैं। आप तो इन्द्रिय जन्य ज्ञान से बहुत ऊंचे (दूर) हैं। इन्द्रियां तो आप तक पहुँच नहीं सकती हैं; इसलिये आप किसी जीव के ज्ञान विषय नहीं, इसी तरह से क्रिया के विषय भी आप नहीं हैं, क्योंकि स्वरूप को जान कर ही प्रेम अथवा विरोध किया जाता है। क्रिया तो ज्ञान होने के बाद की वस्तु है। भगवान् को तो जाननेवाला नहीं जानता और नहीं जाननेवाला जानता है,इस श्रुति से भगवान् की ज्ञान शक्ति का निरूपण किया है।

आप अकेले ही न पधारें, किन्तु बड़े भाई, बलदेवजी के साथ पधारें। बलदेवजी बलातिशय से निडर हैं और माननीय हैं। गोपालों का तो गायों, पशुओं की रक्षा करने का धर्म होने से वे चतुर नहीं हैं। इसलिये उन्हें (गोपजनों को) तो भय की शंका ही नहीं है। आप भगवान् के रहने पर किसी को भी कोई भय नहीं है। इसलिये मित्रों, गोपालों, नन्द आदि बान्धवों, सारे सेवकों और गाड़े, बैलों के सहित ही पधारें, क्योंकि आप सुहृत्तम अत्यन्त प्रिय हैं, आपके सम्बन्धी सुहृत्तर और अन्य सब सेवक आदि सुहृद हैं, इसलिये सब को ही साथ लेकर घर पधारिये ॥१२॥

श्लोक—**पुनीहि पादरजसा गृहान् नो गृहमेधिनाम्।**
यच्छौचेनानुतृप्यन्ति पितरः साग्नयः सुराः ॥१३॥

श्लोकार्थ—हे प्रभो! अपने चरणों की रज से हम गृहस्थों के घरों को पवित्र कीजिए। आपके चरणोदक से (गङ्गा जल से) अग्निगण सहित पितृगण और देवगण तृप्त हो जाते हैं ॥१३॥

सुबोधिनी—यशोरूपं भगवन्तं निरूपयति **पुनीही**ति. अनेन सनाथत्वमात्रं चेत् वचनेनापि सनाथत्वं सम्पद्यत इति किमागमनेनेत्याशङ्का परिहृता, यतो गृहपावित्र्यमधिकं कर्तव्यमिति. पावित्र्योपायमाह **पादरजसे**ति **चरणरजो** हि **भगवदीयत्वं सम्पादयती**ति परमशुद्ध्यै च तथात्वं भवतीति **पादरजसा** गृहाणां पावनं कर्तव्यं, तत्रैतो नयने अल्पमेव रजो भवेत्, तत्र गमने तु सर्वैव भूः चरणरजो भवतीति सर्वेषामेव गृहाणां पावनं भवति, ननु भगवदीया भवन्तः गृहाश्च तथा सति का पावनापेक्षेति चेत् तत्राह **गृहमेधिनामि**ति, गृहे मेधा हिंसा नित्यमुत्पद्यते, तथा सति य एव गृहस्थो भवति ज्ञाननिष्ठो भक्तो वास एव लिप्यते कालगुणैरिव, ते चेद् गृहाः अपहतपाप्मानो भवन्ति तदैव निस्तार इति, किञ्च, **न केवलं जीवतामेव भगवदागमने उपकारः किन्तु सर्वेषामेव पित्रादीनां परमा तृप्ति**रित्याह **यच्छौचे**नेति, **यस्य भगवतः शौचेन** चरणोदकेन **पितरः अग्नयो** देवाश्च **अनुतृप्ता** भवन्ति, यतो ब्रह्मदण्डहता अपि मुच्यन्ते, अतस्तव चरणोदकं पितृणां परमान-

न्दहेतुर्भवति, तेषां कव्यं गृहीत्वा प्रयच्छति अग्निरिति तेषां च तृप्तिरपेक्ष्यते, तत्र प्रविष्टा एव पितरो जाता इति च, तथा तदधिष्ठात्र्यो देवताः, यज्ञो देवाः पितरश्च तृप्ता भवन्तीत्युक्तं भवति ॥१३॥

व्याख्यार्थ—पुनीहि इस श्लोक से यशोरूप भगवान् का निरूपण करते हैं। यदि नाथवाला ही होना है तो वचन-वाणी से भी सनाथ हो सकता है, घर पर जाने की क्या आवश्यकता है ? इस शंका की निवृत्ति इस श्लोक से होती है, क्योंकि घर ले जाकर सबों के घरों को पवित्र कराना है। चरण की रज के द्वारा भगवदीयपन-दासभाव-प्राप्त होता है और परम शुद्धता से ही भगवदीय होता है, इसलिये चरण की रज से घरों को पवित्र करना चाहिये। चरणों की रज को यहां से घर ले जावे तो थोड़ी सी ही रज वहां ले जाई जा सकती और यदि आप ही पधार चले तो सारी ही पृथ्वी आपके चरण की धूलि हो जायगी और जिससे हम सब के घर पवित्र हो जायेंगे।

तुम और तुम्हारे घर तो भगवदीय ही हैं, फिर उनको पवित्र करने की क्या आवश्यकता है ? इस शंका के समाधानार्थ कहते हैं कि हम लोग गृहस्थी (गृहमेधी) हैं। हमारे घरों में मेधा (हिंसा) नित्य होती है। इसलिये ज्ञान में अथवा भक्त कोई भी गृहस्थ काल गुणों से लिप्त रहता है। ऐसी दशा में घरों के पाप रहित होने से ही निस्तार (मोक्ष) है।

हमारे घर पर आप(भगवान्)के पधारने पर केवल हम-घर में रहनेवाले-लोगों को ही लाभ नहीं होगा, किन्तु हमारे पितरों को भी परम आनन्द प्राप्त होगा, हमारे पितर भी तृप्त हो जाएँगे। भगवान् के के चरणों के धोवन-प्रक्षालन-के जल-गंगा-से पितर, तीनों अग्नि और सारे देवगण पवित्र (तृप्त) हो जाते हैं, यहां तक कि ब्रह्मदण्ड दण्डित हुए भी मुक्त हो जाते हैं। इसलिये आपका चरणोदक पितरों के लिये अत्यन्त आनन्द देने वाला होता है। अग्नि कव्य-पितरों के लिये दी हुई बलि-को ले जाकर पितरों को देती हैं, जिसके द्वारा पितर तृप्त (प्रसन्न) होते हैं और इसलिये पितरों का अग्नि के भीतर समावेश माना जाता है। अग्नि में कव्य का होम-आहुति-किया जाय तब पितर प्रसन्न होते हैं। अग्नि में ही आहुति दी जाती है, इसलिये अग्नि को ही यज्ञ कहते हैं। अग्नि में रहनेवाले देवों की प्रसन्नता हो, तभी अग्नि प्रसन्न होती है। इसी कारण से अग्नि, देवगण और पितरों की तीनों की तृप्ति प्रसन्नता कही गई है ॥१३॥

श्लोक—**अवनिज्याङ्घ्रियुगलमासीत् श्लोक्यो बलिर्महान् ।**
ऐश्वर्यमतुलं लेभे गतिं चैकान्तिनां तु या ॥१४॥

श्लोकार्थ—हे भगवन्! आपके परम दुर्लभ दोनों चरणों का प्रक्षालन करके (धोकर) राजा बलि को पवित्र यश, अतुल ऐश्वर्य और अनन्य भक्तों की सी गति मिली है ॥१४॥

सुबोधिनी—श्रियं निरूपयन् चरणोदकस्य माहात्म्यमाह **अवनिज्याङ्घ्रियुगलमिति**, चरणोदकनिर्माणेन प्रक्षालनक्रियया बलेस्त्रयं जातं, कीर्तिः ऐश्वर्यं भक्तिर्मोक्षो वा, **श्लोक्योपि** जातः

महानपि जातः, महत्त्वं सर्वलोकप्रसिद्धिः, 'सत्यं शौच'मित्यादिगुणवत्त्वं, 'प्राथ्यां महत्त्वमिच्छद्भि'रिति वाक्यात्, **ऐश्वर्यं** इन्द्रत्वं, **अतुलं** ततोऽप्यधिकं भगवान् वश इति, **एकान्तिनां** भक्तानां **या** गतिः स्वतन्त्रा भक्तिः सायुज्यं वा, **येति** सर्वलोकप्रसिद्धा 'अनिच्छतो गतिमण्वीं प्रयुङ्क्त' इत्यादि वाक्यसिद्धा ॥१४॥

व्याख्यार्थ—इस श्लोक से भगवान् के श्री धर्म का वर्णन पूर्वक चरण रज का माहात्म्य निरूपण करते हैं। चरणों को धोने के कर्म से चरणोदक का निर्माण करके बलि ने कीर्ति, ऐश्वर्य और भक्ति अथवा मोक्ष इन तीनों को प्राप्त कर लिया। वह प्रशंसा का पात्र भी हो गया और सारे लोको में प्रसिद्ध महापुरुष भी हो गया। उसको महापुरुषों में सदा रहनेवाले सत्य, शौच आदि सभी गुण प्राप्त हो गये, इन्द्र का ऐश्वर्य मिल गया और उससे भी अधिक मिल गया कि भगवान् भी उसके वशीभूत हो गये। अनन्य भक्तों को प्राप्त होने वाली गति स्वतन्त्र प्रेमलक्षण भक्ति अथवा सायुज्य अर्थात् सब लोकों में प्रसिद्ध अण्वी गति भी उसको मिल गई ॥१४॥

श्लोक—**आपस्तेऽङ्घ्र्यवनेनिज्य त्रीन् लोकान् शुचयोऽपुनन् ।**
शिरसाधत्त याः शर्वः स्वर्याताः सगरात्मजाः ॥१५॥

श्लोकार्थ—आपके चरणोदक की महिमा अपार है। तीनों लोकों को पवित्र करने वाले उस जल (गङ्गा) को शिवजी अपने मस्तक पर धारण किए हुए हैं। ब्रह्मशाप से भस्म हुए महाराज सगर के साठ हजार पुत्र उसी गङ्गा जल के प्रताप से स्वर्ग लोक में चले गए ॥१५॥

सुबोधिनी—धर्मं निरूपयन् वीर्यं वा चरणोदकमेव स्तौति **आप** इति, **ते** त्रिविक्रमस्य **अङ्घ्र्यवनेनिज्य** आपः चरणक्षालनोदकानि **त्रीन् लोकान्** मन्दाकिन्यादिभेदेन **अपुनन्**, यतः स्वयं **शुचयः** शुद्धाः, नखोदकस्याशुद्धत्वमाशङ्क्य तथोक्तवान्, न केवलं पवित्रत्वजनकत्वं किन्तु आधिदैविकत्वसम्पादकत्वमपीत्याह **शिरसाधत्त याः** **शर्व** इति, **शर्वो** महादेवः, 'शिवः शिवोभू'दित्यत्र फलं विस्तरेण निरूपितम्, ततो भूमिं गतापि ब्रह्मदण्डहतानपि पावयामासेत्याह **स्वर्याता** इति, **सगरस्य** पुत्राः दुरात्मत्वेन प्रसिद्धाः स्वर्गं गताः, इन्द्रेण नाशार्थं कृतप्रयत्नाः अपि **चरणोदकेनेन्द्र**समानाः कृता इत्यर्थः ॥१५॥

व्याख्यार्थ—भगवान् के गुण अथवा वीर्य का निरूपण करते हुए (उनके) चरणोदक की प्रशंसा इस "आपस्ते" श्लोक से करते हैं। त्रिविक्रम वामनावतार में तीन पेंड़ धारण करने वाले आपके चरणों के प्रक्षालन का जल स्वर्ग को मन्दाकिनी, भूमि को गंगा और पाताल को भोगवती नाम से पवित्र करने वाला हो रहा है। नखों के धोवन का जल तो अशुद्ध होता है, किन्तु यह तो परम पवित्र जल है। भगवान् का चरणोदक केवल पवित्र करने वाला ही नहीं है, किन्तु आधिदैविक भाव को भी सिद्ध कर देने वाला है। इसीलिये शर्व (महादेवजी) अपने मस्तक पर धारण करके 'शिवः शिवोऽभूत्' २।२८।२२ शिवजी साक्षात् शिवरूप हो गए, इस प्रकार शिवजी ने गंगा को मस्तक

पर धारण करके आधिदैविकता प्राप्त की है। "शिवाऽभूत्" इस श्लोक की सुबोधिनी में फल का विस्तारपूर्वक निरूपण किया है।

आपके चरणोदक-गंगा-ने यहां पृथ्वी पर आकर भी कपिलदेवजी के शाप से भस्म हुए सगर राजा के साठ हजार पुत्रों को स्वर्ग में भेज दिया। सगर के वे पुत्र प्रसिद्ध दुष्ट थे और इन्द्र इन्हें नष्ट करने के लिये प्रयत्न भी कर रहा था, तो भी भगवान् के चरणोदक ने उन दुष्टों तथा भस्म भूतों को भी इन्द्र के समान कर दिया ॥१५॥

श्लोक—**देवदेव जगन्नाथ पुण्यश्रवणकीर्तन।**
यदूत्तमोत्तमश्लोक नारायण नमोस्तु ते ॥१६॥

श्लोकार्थ—हे देवों के देव, हे जगत् के स्वामी! आपकी चर्चा करने और सुनने से पुण्य होता है। हे यदुश्रेष्ठ, हे उत्तमश्लोक नारायण! आपको प्रणाम है ॥१६॥

सुबोधिनी—भगवत ऐश्वर्यं कीर्तयन् नमस्यति, ऐश्वर्यं षड्विधं उपास्यत्वेन, प्रभुत्वेन, दोषनिवारकत्वेन, गुणाधायकत्वेन, उत्तमस्तुत्यत्वेन, जगत्कारणत्वेन च, **देवदेव**, तत्र भगवान् देवानामपि देवः उपास्यानामप्युपास्यः, **जगत एव नाथः** न त्वेकदेशस्य, **पुण्ये** पापनिवारके **श्रवणकीर्तने** यस्य, यथा श्रवणं तथैव कीर्तनं पापनाशकम्, **यदूत्तमे**ति, यदोरपि गुणाधायकः, 'अकर्तोच्चरितं पितु'रिति न्यायेन पितुः प्रतिकूलत्वात् न कस्यापि साध्यः, तस्यापि गुणान् धत्त इति, **उत्तमै**रपि व्यासादिभिः **श्लोक्यत** इति, **नारायणो** जगत्कर्ता इति, एवं षड्गुणपूर्णं नमस्यति **नमोस्तु त** इति, नमस्कार-प्रार्थनया नित्यं नमस्कार उक्तः ॥१६॥

व्याख्यार्थ—"देव देव" इस श्लोक में भगवान् के ऐश्वर्य का कीर्तन करते हुए अक्रूरजी भगवान् को नमस्कार करते हैं। भगवान् का ऐश्वर्य १- उपासना करने योग्य, २- प्रभुरूप, ३- दोषों का निवारण करने वाला, ४- गुणों को प्राप्त कराने (देने) वाला, ५- श्रेष्ठ पुरुषों के द्वारा गाया गया और ६- जगत् का कारण, इन रूपों से छः प्रकार का है। उसका क्रम से छः विशेषणों द्वारा वर्णन करते हैं। (१) हे देवों के देव! उपासना करने के योग देवगण भी आपकी उपासना करते हैं। भगवान् उपास्यों के भी उपास्य हैं। (२) हे जगन्नाथ!आप जगत् के किसी एक भाग के नाथ नहीं हो, किन्तु सारे ही जगत के ईश्वर हो। (३) भगवान् का श्रवण कीर्तन लोकों के पापों का नाश करने वाले हैं, पुण्य वाला है। (४) यदूत्तम, पिता ययाति की आज्ञा न मानने वाला, पिता का विरोधी तथा पिता का (अकर्तोच्चरितं पितु–६।१८।४४) मलमूत्र समान भी यदु–जिसके दोष किसी प्रकार भी दूर नहीं हो सकते थे–को (यदुकुल में अवतार लेकर) गुणोंवाला बना दिया। इसलिये आप यदुओं में उत्तम हैं। (५) हे उत्तम श्लोक! व्यास आदि उत्तम पुरुष भी आपके गुणों का गान-स्तुति-करते हैं। (६) हे नारायण! आप सारे जगत की रचना -सृष्टि- करने वाले हैं। इस षड्विधि -प्रकार-के ऐश्वर्य, गुणों से पूर्ण भगवान् आपको नमस्कार है। 'नमोऽस्तु' नमस्कार हो, इस प्रकार नमस्कार की प्रार्थना से सदा (नित्य) का नमस्कार करना कहा गया है ॥१६॥

श्री भगवानुवाच—

श्लोक—**आयास्ये भवतो गेहमहमार्यसमन्वितः ।**
यदुचक्रद्रुहं हत्वा वितरिष्ये सुहृत्प्रियम् ॥१७॥

श्लोकार्थ—श्रीकृष्ण ने कहा—चाचाजी! मैं यदुवंश के बैरी कंस को मार कर आपके घर बलदेवजी के साथ अवश्य आऊँगा और अपने मित्रों को प्रिय करूँगा ॥१७॥

सुबोधिनी—तदा भगवान् नित्यकार्यकर्तेति भगवत्कृतस्य विघाताभावाच्च 'तावत् पुरीं द्रक्ष्यामह' इति वाक्यात् आगमनस्य प्रार्थितत्वात् कालान्तरे समागन्तव्यमित्याह **आयास्य** इति, उदासीनवचनाभावाय स्वाभिप्रेतं चाह **आगमिष्यामि** पर**मार्यसमन्वितः** इदानीं विद्यमानानां मध्ये बलभद्रसहितः, प्रार्थितानां पूरणार्थं **उद्धवः** समागमिष्यतीति भावः, तर्हि द्वाभ्यामेव गन्तव्यमिदानीमेवेति चेत् तत्राह **यदुचक्रद्रुहं हत्वेति**,सर्वेषामेव यादवानां **चक्रस्य** यो द्रोहकर्ता तं कंसं **हत्वा** सिद्धवत्कारेण कथनात् न सन्देहोपि, अप्रार्थितोप्या**यास्ये, स**मागने प्रयोजनं सूचयति **वितरिष्य** इति, **सुहृ**दामत्रत्यानां पाण्डवानां च **प्रियं वितरिष्य** इति, अनेन तेषां सुखार्थं त्वां प्रेषयिष्यामि तदर्थमागमिष्यामीति सूचितम् ॥१७॥

व्याख्यार्थ—भगवान् सर्वदा कार्य करने वाले हैं और उनके किये काम में किसी प्रकार का विघ्न नहीं होता है । इसलिये भगवान् ने दशवें श्लोक में अभी कहा था कि हम इतने समय में मथुरा पुरी को देख लेंगे और अक्रूरजी ने उसी समय अपने घर पधारने की भगवान् से प्रार्थना करने पर अन्य समय पर (उनके घर) आने के लिये अक्रूरजी से कहा, यह 'आयास्ये' श्लोक से कहते हैं ।

रूखेपन-उदासीनता-का उत्तर भगवान् ने नहीं दिया, ऐसा प्रदर्शित करने के लिये भगवान् बोले कि मैं तुम्हारे घर पर इन सब साथियों को छोड़ कर केवल बलरामजी के साथ आऊँगा । सभी को साथ लेकर आने की तुम्हारी प्रार्थना को पूरी करने के लिये उद्धवजी को भी साथ ले आऊँगा, यह अभिप्राय है । बलभद्रजी को साथ लेकर अभी पधारो;ऐसा अक्रूरजी ने कहा, तो भगवान् कहते हैं कि सारे ही यादवों के साथ बैर करनेवाले कंस को मार करके आऊँगा । कंस का वध कर दिया हो मानो, इस प्रकार के कहने का भाव यह है कि उसके मार देने में तो कोई भी सन्देह है ही नहीं । तदनन्तर जो(अक्रूरजी)तुम प्रार्थना नहीं भी करते,तब भी मैं तुम्हारे घर पर आऊँगा और अपने वहां के मित्रों का तथा पाण्डवों का हित करूँगा । इस कथन से भगवान् ने यह भी सूचित किया कि पाण्डवों को सुखी करने के लिये तुम्हें उनके पास भेजूँगा, इसलिये आऊँगा ॥१७॥

श्रीशुक उवाच—

श्लोक—**एवमुक्तो भगवता सोक्रूरो विमना इव ।**
पुरीं प्रविष्टः कंसाय कर्मावेद्य गृहं ययौ ॥१८॥

श्लोकार्थ—श्री शुकदेवजी कहते हैं—राजन्! भगवान् के इस प्रकार के वचन सुन कर अक्रूरजी ने उदास से होकर नगरी में प्रवेश किया और पहले कंस के पास जाकर कृष्ण बलदेव सहित नन्द आदि गोपों के मथुरा आने के समाचार कहे। तदनन्तर वे अपने घर को गए ।।१८।।

सुबोधिनी- एवमागमनं निर्धार्य भगवदाज्ञया गृहे गत इत्याह **एवमुक्त** इति, **भगवता** अप्रतिहत-सामर्थ्येन एवमाज्ञप्तः, इदानीमेव नेष्टं सिद्धमिति **विमनाः**, अग्रे कार्यमपि करिष्यतीति **इव**, स्वयं प्रथमत एव **पुरीं प्रविष्टः कंसाय** भगवानानीत इति स्वकृतं **कर्मविद्य गृहं ययौ**, शीघ्रमेव स्वगृहं गतः ।।१८।।

व्याख्यार्थ—इस प्रकार से भगवान् के पधारने का निश्चय करके अक्रूरजी भगवान् की आज्ञा से अपने घर पर गये, यह "एवमुक्तो" श्लोक से कहते हैं, जो नहीं रोकी जा सके; ऐसी सामर्थ्य वाले भगवान् की यों आज्ञा पाकर भगवान् को अभी अपने घर पर पधारने के मनोरथ में असफल हुए। अक्रूरजी निराश होकर नगरी में चले गये। आगे भविष्य में भगवान् का कार्य-आज्ञा पालन-वे करेंगे, ऐसा जान कर वे उदास जैसे हो मथुरा में चले गये। वहां जा कर उन्होंने पहले कंस से श्रीकृष्ण को मथुरा ले आना रूप अपने सिद्ध काम की सूचना दी और फिर वे शीघ्र ही अपने घर को चले गये ।।१८।।

श्लोक—**अथापराह्णे भगवान् कृष्णः सङ्कर्षणान्वितः ।**
मथुरां प्राविशद् गोपैर्दिदृक्षुः परिवारितः ।।१९।।

श्लोकार्थ—इधर दिन के पिछले भाग में श्रीकृष्णजी बलदेवजी और गोपजनों को साथ लेकर मथुरापुरी को सैर करने के लिए पुरी को देखने की इच्छा से पधारे।१९।

सुबोधिनी—एवं पूर्वसम्बन्धिनां निरोधमुक्त्वा वार्तयैव पूर्वमपि निरोधं सम्पाद्य स्वरूपेणापि सम्पादयितुं स्वयं मथुरां दृष्टवानित्याह **अथेति**, **अथ** भिन्नप्रक्रमेण मित्रभूतैरेव गोपालैः सहा**पराह्णे** तृतीये भागे **भगवान्** आविष्कृतसर्वधर्मा **कृष्ण** एतदर्थमेवावतीर्णः कंसमारणार्थं यत्नः कर्तव्य इति **सङ्कर्षणसमन्वितः**, अन्यथा उभयोरवतारो न स्यात्, **गोपैः परिवृत** इति, एतैः सह एताव-त्काल क्रीडा कृतेति ज्ञापनार्थं शोभार्थं मनसि शङ्काभावार्थं तेभ्यः माहात्म्यप्रदर्शनार्थं च **मथुरां** स्वनगरीं **प्रकर्षेणाविशत्**, सामीप्ये सप्तमी, पुर-द्वारनिकटे गत इत्यर्थः ।।१९।।

व्याख्यार्थ—इस प्रकार पहले सम्बन्धी वसुदेव आदि का निरोध करना प्रदर्शित करके प्रथम तो बातचीत के द्वारा ही मथुरावासियों का निरोध कराकर स्वरूप से भी उनको निरोध सिद्ध कराने के लिये भगवान् ने स्वयं मथुरा नगरी को देखा, यह इस "अथापराह्णे" श्लोक में कहते हैं। अथ-यह-भिन्न प्रक्रम-दूसरे आरम्भ का सूचित करता है। अर्थात् अब यहां इस के आगे दूसरे प्रकरण का आरम्भ (किया जाता है) होता है।

अपने सखा रूप गोपालों के साथ दिन के तीसरे भाग (अपराह्ण) में अपने ऐश्वर्य, वीर्य आदि सारे धर्मों को प्रकट करके भगवान् श्रीकृष्ण जिनका कंस वध के लिये ही अवतार है और कंसवध के लिये प्रयत्न करना चाहिये, इसलिये बलदेवजी को साथ लेकर मथुरा पधारे, क्योंकि यदि संकर्षणजी को साथ में न लेना होता तो दोनों का अवतार नहीं होता। गोपों के साथ इतने समय तक क्रीड़ा की है, अपनी निर्भयता, गोपों को अपना माहात्म्य आदि प्रदर्शित करने तथा अपनी शोभा के लिये भी गोपजनों के बीच में विराजमान भगवान् ने अपनी नगरी मथुरा में प्रवेश किया। समीप अर्थ में सप्तमी विभक्ति का प्रयोग होता है। श्लोक में "मथुरां" द्वितीया विभक्ति-दिदृक्षु—सन्नन्त दृश् धातु के योग से की है। तात्पर्य यह है कि भगवान् मथुरा नगरी के द्वार के निकट पधारे ॥१९॥

लेख—'अथापराह्णे' इस श्लोक की व्याख्या में "पूर्वसम्बन्धिनां" इत्यादि पदों का अभिप्राय यह है कि प्रथम सम्बन्धी वसुदेव आदि के सम्बन्धी अक्रूर और पाण्डव आदि का निरोध;जो अक्रूर को भेज कर पाण्डवों का मानसिक निरोध कहा है।

श्लोक—**ददर्श तां स्फाटिकतुङ्गगोपुरद्वारां बृहद्धेमकपाटतोरणाम् ।**
ताम्रारकोष्ठां परिखादुरासदामुद्यानरम्योपवनोपशोभिताम् ॥२०॥

श्लोकार्थ—भगवान् श्रीकृष्ण ने मथुरा नगरी को देखा, जिसमें स्फटिक मणि (बिल्लोर) के बने हुए ऊँचे दरवाजे, सोने के बड़े बड़े किंवाड़ और तोरण, ताम्बे पीतल के भण्डार आदि थे। जिसके चारों ओर एक विशाल गहरी खाई है; जिससे शत्रु उस पर एकाएक आक्रमण नहीं कर सकता था। स्थान स्थान पर सुन्दर बाग बगीचों से अत्यन्त सुशोभित हो रही थी ॥२०॥

सुबोधिनी—ततो भगवान् दृष्टवानित्याह **ददर्शे**ति, भगवद्दृष्टां पुरीं वर्णयति चतुर्भिः, पुरुषार्थचतुष्टयपूर्णां ॥२०॥

व्याख्यार्थ—तदनन्तर भगवान् ने नगरी को देखा, यह इस 'ददर्श' श्लोक से वर्णन करते हैं। भगवान् के द्वारा देखी हुई चारों पुरुषार्थों से भरपूर मथुरा नगरी का चार श्लोकों से वर्णन करते हैं।

कारिका—**स्वरूपतो द्रव्यतश्च वैचित्र्येणाप्यनुत्तमां ।**
अलङ्कृतां साम्प्रतं तु भगवद्दर्शनार्थिभिः ॥७॥

कारिकार्थ—(१) स्वरूप से,(२) द्रव्य से (३) विचित्रता के कारण से भी सबसे उत्तम और (४) इस समय तो भगवान् के दर्शन करना चाहनेवालों के द्वारा सजाई गई नगरी को भगवान् ने देखा ॥७॥

सुबोधिनी--**तां** मथुरां दृष्ट्वैव सन्तोषं प्रापितवान्,**स्फाटिकानि तुङ्गानि गोपुराणि पुरद्वाराणि** च यस्यां, द्वारादिषु **बृहन्ति** सुवर्ण**कपाटानि तोरणानि** च यस्यां, **ताम्रामया: आरा: कोष्ठानि** च प्राकारा: यस्या:, केचित् तु **आर**शब्देन आरकूटमाहु:, **ताम्रमयान्यारकूटमयानि च कोष्ठानि** यस्यां, **परिखा** परितो गर्त: तया कृत्वा **दुरासदां**, यमुना तु दूर इति परिखाया न बाध:, **उद्यानानि** पुष्पप्रधानवाटिका: तै **रम्यां, उपवनैश्च** फलप्रधानै: **उप** समीपे **शोभितां**।

व्याख्यार्थ– भगवान् ने उस नगरी को दृष्टि से ही सन्तुष्ट कर दिया। स्फटिक मणियों के बने हुए ऊंचे मन्दिरों के और शहर के फाटकों दरवाजों में सुवर्ण के मोटे मोटे किंवाड़ों तथा तोरणों, ताम्बे पीतल के कोठे, भण्डारों वाली नगरी का भगवान् ने अवलोकन किया। उस के चारों तरफ किसी से भी नहीं लांघी जा सके, ऐसी बड़ी गहरी तथा विशाल खाई थी। यमुनाजी तो दूर थी, इस कारण से खाई होने में कोई अड़चन नहीं थी। वह नगरी भाँति भाँति के पुष्पों वाले बगीचों से और अनेक प्रकार के फलों से लदे हुए उपवनों-वाटिकाओं–से सुशोभित हो रही थी ॥२०॥

कारिका—**द्वारप्राकारपरिखाफलपुष्पै: सुशोभिता।**
पञ्चधा नगरी रम्या सालङ्कारा च रूपिता ॥८॥

कारिकार्थ—(१) दरवाजों, (२) कोठों, (३) खाइयों, (४) फलों और (५) पुष्पों से अत्यन्त शोभायुक्त, सुन्दर और अलङ्कारों से अलंकृत नगरी का पाँच प्रकार से निरूपण किया है ॥८॥

श्लोक—**सौवर्णशृङ्गाटकहर्म्यनिष्कुटै: श्रेणीसभाभिर्भवनैरुपस्कृताम्।**
वैदूर्यवज्रामलनीलविद्रुमैर्मुक्ताहरिद्भिर्वलभीषु वेदिषु ॥२१॥

श्लोकार्थ—सुवर्ण मण्डित चौराहे, महलों, महलों की वाटिका में सुनार, लुहार आदि की दूकानों तथा भवनों की पंक्तियाँ उस नगरी की शोभा बढ़ा रही थी। छज्जों, छज्जों के नीचे की वेदियों, झरोखों और फर्शों में हीरा, बिल्लोर, नीलम, मूँगा, पन्ना, मोती आदि रत्न जड़े हुए जगमगा रहे थे ॥२१॥

सुबोधिनी—बाह्यत: शोभामुक्त्वा आन्तरशोभामाह **सौवर्णे**ति, सुवर्णमया: **शृङ्गाटका**दय: तै**रुपस्कृता**मिति, **शृङ्गाटकं** पुरमध्यचतुर्मार्गे विश्रामस्थानमीरितम्, **हर्म्याणि** धनिनां गृहा:, **निष्कुटं** कुट्टिमा भूमि:, एकशिल्पोपजीविनां क्रयविक्रयस्थानं **श्रेणि:,सभा** नराणामुपवेशस्थानानि, **भवनानि** सर्वेषामेव गृहा:, सर्व एव सुवर्णमया इति न काप्यशोभा, **वैदूर्यादयो** मणय: तै**रप्युपस्कृतां, वज्रो** हीरकं, अमला: स्फाटिका:, **नीलो** नीलमणि:, **विद्रुम:** प्रवाल:, **मुक्ताश्च हरिन्मणयश्च**, एभिर्निर्मिता: पूर्वोक्ता **वलभ्यादयश्च. वलभ्यो** द्वाराग्रे वक्रदारुनिर्मिता: उपवेशनार्थं, वेदय: उपवेशनोच्चस्थानानि तेषु **वैदूर्यादिभिरुपस्कृता**मिति सम्बन्ध: ॥२१॥

व्याख्यार्थ—इस प्रकार बाहरी शोभा का वर्णन करके इस 'सौवर्ण' श्लोक से भीतर की शोभा का वर्णन करते हैं। नगरी के चौराहों में विश्राम के स्थान, धनी पुरुषों के महल और फर्शों की भूमि आदि सब सोने की बनी हुई थी। एक सी कारीगरी से जीविका करने वालों की दुकानें, मनुष्यों के बैठने के स्थान, सब निवासियों के भवन (घर) सब ही सुवर्णमय थे। सभी एक से एक बढ कर शोभा वाले थे। वैदूर्य, हीरा, निर्मल स्फटिक, नीलमणि (नीलम) प्रवाल, पन्ना, मोती आदि रत्नों से जड़े हुए टेढी लकड़ी के बने हुए (दरवाजों के आगे) बैठने के स्थानों (बैंचें, कुर्सियों) से वह नगरी सुशोभित हो रही थी ॥२१॥

श्लोक—**जुष्टेषु जालामुखरन्ध्रकुट्टिमेष्वाविष्टपारापतबर्हिनादिताम् ।**
संसिक्तरथ्यापणमार्गचत्वरां प्रकीर्णमाल्याङ्कुरलाजतण्डुलाम् ॥२२॥

श्लोकार्थ—उन रत्न जटित झरोखों और चबूतरों पर बैठे हुए कबूतर और मोर अपने अपने शब्दों से नगरी के यश को गुञ्जित कर रहे थे। मुख्य और चौड़ी सड़क, (राजमार्ग) हाट,बाट, गली,कूंचे, चबूतरों और द्वारों के सामने छिड़काव किया हुआ था तथा सब जगह मालायें, कलियों, खीलें और अक्षत बिखर रहे थे, ऐसी पुरी को भगवान् ने देखा ॥२२॥

सुबोधिनी—अग्रेपि तैर्जुष्टेषु योजितेषु **जालामुखरन्ध्रकुट्टिमेषु** गवाक्षरन्ध्रमध्यभूमिषु **आविष्टा** ये **पारापताः बर्हिणश्च** तेषां **नादयुक्तां**, एवमुपरि सौभाग्यमुक्त्वा मार्गादिसौभाग्यमाह **सम्यक् सिक्ता रथ्यादयो** यस्यां, **रथ्या** राजमार्गः, **आपणयः** पण्यवीथीमार्गाः अन्ये **चत्वराण्यङ्गणानि, प्रकीर्णानि** सर्वत्र **माल्यानि** पुष्पाणि **अङ्कुराः** यवाङ्कुराः **लाजाः** भ्रष्टधान्यानि **तण्डुलाश्च**, मङ्गलार्थमेतेषां विकरणं भगवानायास्यतीति ॥२२॥

व्याख्यार्थ—आगे भी मणियों से जड़ी हुई जालियों के छिद्रों के बीच की भूमि में बैठे हुए कबूतरों और मोरों की आवाज से गूंजती हुई उस नगरी को भगवान् ने देखा। इस प्रकार नगरी के ऊपरी भाग की सुन्दरता का वर्णन करके आगे उसके मार्गों के सौन्दर्य का निरूपण करते हैं। उस पुरी के राजमार्गों (मुख्य सड़कें) बाजारों, व्यापार के (मार्गों) तथा अन्यान्य चौराहे, आंगणों में जल का छिड़काव अच्छी तरह किया गया था और (भगवान् पधारेंगे इस कारण से) सभी जगह मंगल सूचक पुष्प, जौ के अंकुर; भाड़ में सिके हुये धान्य, चावल 'खीलें' आदि बिखेरे जा रहे थे, पुष्पादि वर्षाये जा रहे थे ॥२२॥

श्लोक—**आपूर्णकुम्भैर्दधिचन्दनोक्षितैः प्रसूनदीपावलिभिः सपल्लवैः ।**
सवृन्दरम्भाक्रमुकैः सकेतुभिः स्वलङ्कृतद्वारगृहां सपट्टिकैः ॥२३॥

श्लोकार्थ—दही, चन्दन से चर्चित, जलपूर्ण कलशों, पुष्पों और पल्लवों, दीपकों

की मालाओं, पके हुए केले वाले केल के वृक्षों और सुपारी के गुच्छों, ध्वजाओं और सुन्दर छोटी छोटी झण्डियों से भलि भाँति सजाए हुए द्वारवाले भवनों से अत्यन्त सुशोभित हुई मथुरा नगरी का भगवान् ने अवलोकन किया ॥२३॥

सुबोधिनी—आ समन्तात् **पूर्णकुम्भैः** दध्ना **चन्दनेन** च **उक्षितैः**, दध्ना सहितैश्चन्दनैः **उक्षितैः** **पूर्णकुम्भैः** सहितामिति, **प्रसूनानि दीपावलयः** आरात्रिकाणि, **पल्लवसहिताश्च** ते, **सवृन्दाः** फलसहिताः **रम्भाः** कदल्यः **क्रमुकाश्च** पूगपोताः ध्वजसहिताः तैः **सुष्ठु अलङ्कृताः द्वाराणि गृहाश्च** यस्यां, **सपट्टिकाः रम्भादयः**. अत्रैवं प्रक्रिया, द्वारस्योभयपार्श्वे कुम्भद्वयं तदुपरि दधिपूर्णपात्रं तत्र निकटे दीपाः रम्भा क्रमुकश्च ध्वजः पताकाः **च** चन्द्रवर्णाश्चन्द्राकारा आदर्शाश्च महोत्सवे सर्वत्र क्रियन्त इति ॥२३॥

व्याख्यार्थ—दधि और चन्दन से चर्चित (सने हुए) जल भरे कलशों, पल्लवों सहित पुष्पों, दीपकों की पंक्तियों, आरतियों, पके हुए फलोंवाले केले के वृक्षों, सुपारी के गुच्छों और भाँति-भाँति की ध्वजा पताकाओं से सुशोभित द्वारोंवाले भवनों से सुसज्जित की गई-सजाई हुई-मथुरापुरी को भगवान् ने देखा। सजावट करने की रीति यह है कि दरवाजों के दोनों तरफ दो कलश, उन पर दही से भरा हुआ पूर्ण पात्र, उसके निकट दीपक, केले, सुपारी, ध्वजा, पताकाएँ, चन्द्रमा की तरह निर्मल तथा चन्द्रमा के आकारवाले कांच-आरसी-आदि को महोत्सव में सभी जगह रक्खा जाता है ॥२३॥

श्लोक—**तां सम्प्रविष्टौ वसुदेवनन्दनौ वृतौ वयस्यैर्नरदेववर्त्मना ।**
द्रष्टुं समीयुस्त्वरिताः पुरस्त्रियो हर्म्याणि चैवारुरुहुर्नृपोत्सुकाः ॥२४॥

श्लोकार्थ—हे राजन्! पुरी मथुरा की ऐसी सुन्दर शोभा का अवलोकन करते हुए और गोप लोगों के मध्य में पधारते हुए वसुदेवनन्दन भगवान् कृष्ण बलदेव ने राजमार्ग में से होकर नगरी में प्रवेश किया। यह समाचार पाते ही पुरनारियाँ उनके दर्शन करने के लिए उत्कण्ठित होकर अपने अपने भवनों पर जल्दी से चढ़ गईं ॥२४॥

सुबोधिनी—एवं पुरीं वर्णयित्वा तस्यां प्रविष्टावित्याह **तां सम्प्रविष्टाविति**, सर्वेषां भगवद्दर्शनार्थमेव तथा निर्माणमिति येषां बहिरागत्य दर्शनं सम्भवतिताननुक्त्वा यासां न सम्भवति तासामुद्योगाधिक्यमाह **द्रष्टुं समीयुरिति**, नगरीं **प्रविष्टौ वसुदेवस्य** पुत्रौ गोपालै**र्वृतौ नरदेववर्त्मना** राजमार्गेण संयुक्तौ गच्छन्तौ **द्रष्टुं पुरस्त्रियः** **समीयुः** सम्यगाभिमुख्येन समागताः, याः साधारण्यः **पुरस्त्रियः** दूरस्थाश्च बहिर्निर्गमनासमर्थाश्च **हर्म्याणि** उच्चगृहान् **आरुरुहुः**, **चकारात्** यत्रैव स्थिताः द्रष्टुं शक्नुवन्ति तमेवारुरुहुरिति, **नृपेति** सम्बोधनं राज्ञो गमनेप्येव कुर्वन्तीति ज्ञापनार्थं, भगवति तु विशेषः **उत्सुका** इति ॥२४॥

व्याख्यार्थ—इस प्रकार मथुरा पुरी का वर्णन करके उसमें भगवान् का प्रवेश 'तां सम्प्रविष्टौ' इस श्लोक से वर्णन करते है। भगवान् के दर्शन सब ही करलें,इसी उद्देश्य से पूरी की सजावट की गई थी। इसलिये बाहर आकर भी दर्शन कर सकने वाले पुरुषों का वर्णन न करके बाहर आकर दर्शन में असमर्थ नारियों का दर्शनार्थ अधिक उद्योग का वर्णन उतरार्थ से करते हैं। गोपालों के साथ राजमार्ग नगरी में प्रवेश करने वाले दोनों वसुदेव कुमारों के दर्शन करने के लिये पुरी की स्त्रियां अच्छी तरह से सामने आई।

जो शहर की स्त्रियां साधारण स्थिति की थीं, जो दूर रहने वाली थीं और जो घर के बाहर निकलने में असमर्थ थीं, ऊंची ऊंची हवेलियां तथा ऊंचे मकानों पर जहां से भगवान् के दर्शन कर सकती थीं चढ़ गई। राजा की सवारी निकलने पर भी स्त्रियां इसी प्रकार से करती हैं,इस बात को सूचित करने के लिये हे नृप! यह सम्बोधन पद का प्रयोग है, किन्तु राजा की अपेक्षा भगवान् के दर्शनों की विशेषता है कि वे बड़ी उत्कण्ठा से महलों की छतों पर चढ़ीं ॥२४॥

श्लोक—**काश्चिद् विपर्यग्धृतवस्त्रभूषणा विस्मृत्य चैकं युगलेष्वथापराः ।**
कृतैकपत्रश्रवणैकनूपुरा नाङ्क्त्वा द्वितीयं त्वपराः स्वलोचनम् ॥२५॥

श्लोकार्थ—जल्दी के कारण कोई उल्टे कपड़े और गहने पहन कर चल दी। कोई कोई कुण्डल आदि आभूषण जो दो दो पहने जाते हैं, एक एक ही पहन कर चली गई। कई तो अपने एक ही नेत्र में काजल लगा कर दौड़ गई ॥२५॥

सुबोधिनी—तासामौत्सुक्यं वर्णयन् वस्त्राभरणानां विपर्यासमाह **काश्चिदिति**, भगवति भावो विशेषः, अन्यथा लौकिक्येव भाषा भवति,**काश्चित्** स्त्रियः **विपर्यक्** विपरीततया **धृतानि वस्त्राणि भूषणानि च** याभिः, पादयोराभरणं हस्ते अधोवस्त्राण्युपरि, एवं सर्वत्र, किञ्च, न केवलं विपर्यासः अपि तु **युगलेषु एकं विस्मृत्य च** .एकमेवाभरणं धृत्वा गताः, **अथ विपर्यग्धृतेभ्यः अपराः** अन्याः, तत्र पूर्वापेक्षयाप्येता उत्तमा इति **युगला**भरणेषु हस्तकटकादिषु **एकस्यापि** धारणं भवति, यत्र पुनः द्वयोरेव धारणं नैकस्य एकधारणं सर्वथा विगीत तादृशमपि कृतवत्य इत्याह **कृतैकपत्रश्रवणैकनूपुरा** इति, **कृतं** स्थापितमेकमेव **पत्रं** ताटङ्कं **श्रवणे** याभिः **एकमेव च नूपुरं** श्रवणे पादे वा कृतं याभिः ताश्च ताश्च, अन्याः पुनः **द्वितीयं लोचनं न अङ्क्त्वा द्रष्टुं समीयुरिति** सम्बन्धः, तुशब्दोन्यार्थः,**स्वलोचनमिति** अर्थादन्यलोचनमपि, अन्यस्य कज्जल प्रयच्छन्ती मध्ये तथैव गतेति ।२५।

व्याख्यार्थ—इस 'काश्चित्' में उनकी उत्कण्ठा का वर्णन करते हुए उनके वस्त्र आभूषणों के उलटे सीधे धारण करने का निरूपण करते हैं। स्त्रियों का भगवान् में अत्यधिक भाव है। यदि ऐसा न हो तो यह लौकिक भाषा ही गिनी जाती। कितनी ही स्त्रियाँ अपने वस्त्रों को और आभूषणों को उलटे -विपरीत- पहन कर के चली गई। तात्पर्य यह है कि पावों के आभूषणों को हाथों में और हाथों के पावों में पहन कर तथा इसी प्रकार नीचे पहनने का घाघरा आदि वस्त्रों को ऊपर के अङ्गों में और ऊपर (पहनने) के अङ्गों के वस्त्रों को नीचे के अङ्गों में पहन कर ही दौड़ आई।

इतना ही नहीं, किन्तु दो दो पहिने जाने वाले कड़े, कुण्डल, आभूषणों को भी दो में से एक को ही और उन्हें भी उल्टे (हाथों के पावों में तथा पावों के हाथों में) ही पहिन कर चली आई। ये स्त्रियाँ उन पहले वर्णन की हुई स्त्रियों से श्रेष्ट हैं। कड़े, कंकण आदि तो दो दो में से एक भी पहन लिये जाते है, किन्तु जिन अलंकारों का दो दो का ही धारण करना आवश्यक होता है, उन्हें एक एक ही धारण करना निन्दित तथा अमंगल गिना जाता है। उन स्त्रियों ने जल्दी से ऐसा भी किया। जैसे कोई तो कान में एक ही बाली और पांव में भी एक ही नूपुर अथवा एक ही नूपुर को कान में, पांव में पहन कर ही दौड़ गई। कितनी तो अपने एक ही नेत्र में और कितनी दूसरी स्त्रियों के एक ही लोचन में कज्जल आँज कर बीच में उसी स्थिति में उठ कर जल्दी दौड़ आई ॥२५॥

श्लोक—**अश्नन्त्य एकास्तदपास्य सोत्सवा अभ्यज्यमाना अकृतोपमज्जनाः ।**
स्वपन्त्य उत्थाय निशम्य निःस्वनं प्रपाययन्त्योऽर्भमपोह्य मातरः ॥२६॥

श्लोकार्थ—कोई भोजन कर रही थी, वह हाथ का ग्रास थाली में पटक कर भगवान् के दर्शन की उत्कण्ठा से दौड़ गई। उबटन लगाती हुई कई बिना नहाये ही चली गईं। कितनी सोई हुईं कोलाहल से जग कर वैसे ही चल दीं और कितनी ही बच्चों को दूध पिलाती हुई मातायें बच्चों को छोड़ कर उतावली से भगवान् के दर्शन करने के लिए दौड़ पड़ीं ॥२६॥

सुबोधिनी—क्रियासक्त्यभावमाह **अश्नन्त्य एका** इति, **तद**शनकर्म, अन्नं वा, अन्यथापि त्यागो भवतीति तद्व्यावृत्त्यर्थमाह **सोत्सवा** इति, उल्लासहिताः, अन्याः पुनर**भ्यज्यमानाः** सर्वाङ्गे दत्ततैलाः शिरसि धृता वा **अकृतोपमज्जनाः** स्नानमकृत्वैव ययुः, अन्याः पुनः **स्वपन्त्यः उत्थाय** भगवानागत इति कोलाहलं **निशम्य** तथैवाविचारितदेहाः समीयुः, अन्याः पुनः **मातरः** धात्रीव्यतिरिक्ताः साक्षात् स्वप्रसूतानपि बालकान् **प्रपाययन्त्यः अर्भं** अतीवबालकमपि विसृज्या**पोह्य** त्वरिता ययुः इति सम्बन्धः ॥२६॥

व्याख्यार्थ—"अश्नन्त्यः" इस श्लोक से उनकी किसी काम में भी आशक्ति न रहने का वर्णन करते हैं। कई एक जो भोजन कर रही थीं, वे भोजन करना अथवा अन्न को छोड़ कर चली आईं। भोजन करने का त्याग यद्यपि किसी दूसरे प्रयोजन से भी हो सकता है, किन्तु "सोत्सवाः" श्लोक में यह पद सूचित करता है कि उन्होंने तो भगवान् के दर्शन के उल्लास से ही भोजन करना छोड़ा था। कितनी ही जो अपने सारे शरीर में अथवा सिर पर तेल मल (लगा) रही थीं, वे बिना स्नान किये ही दौड़ आईं। बहुत सी जो सोई हुईं थीं वे उठ कर भगवान् पधारे हैं, ऐसा कोलाहल को सुन कर वैसी ही-अपने शरीर का विचार न करके-चली आई। कितनी ही खास माताएँ, जो धायें नहीं थीं, वे भी अपने छोटे छोटे बच्चों को भी छोड़कर जल्दी से दौड़ गईं ।२६।।

श्लोक—**मनांसि तासामरविन्दलोचनः प्रगल्भलीलाहसितावलोकनैः ।**
जहार मत्तद्विरदेन्द्रविक्रमो दृशां ददत् श्रीरमणात्मनोत्सवम् ॥२७॥

श्लोकार्थ—मस्त गजराज के समान पराक्रमी, कमलनयन भगवान् श्रीकृष्ण ने स्वच्छन्द लीला विलास से पूर्ण हँसी और कटाक्षों से तथा लक्ष्मी को आनन्द देने वाले अपने सुन्दर श्याम स्वरूप से पुर नारियों को आनन्द देकर उनके हृदयों को हर लिया ।।२७।।

सुबोधिनी--एवं सर्वासां भगवद्दर्शनार्थं प्रपञ्च-विस्मृतिर्निरूपिता, ततो निष्प्रपञ्चासु स्वासक्त्यर्थं भगवच्चरित्रमाह **मनांसि तासामिति**, **तासां** पूर्वोक्तानां मनश्चेद् भगवदीयं जातं तदा स्वासक्तिः सिद्धैव मनोमूलकत्वात् संसारस्य, मनसो हि वशीकरणं द्वेधा भवति, वस्तुसामर्थ्यात् मन एव **वशे** भवति यथोत्कृष्टविषये स्वधर्मैश्च मोहकैर्भवति यथा मन्त्रादिभिः, **तत्रारविन्दलोचनः** कमलनयन इति स्वरूपसौन्दर्यं सर्वतापनाशकत्वेनोपकारित्व च निरूपितम्, धर्मान् मोहकानाह **प्रगल्भा** या **लीला** तत्सूचकं यद् **हसितं** तत्पूर्वका**वलोकनै**रिति, अतिकामुकस्य तादृशचेष्टासूचक हास्यं भवति अवलोकनं च, पुरस्त्रीत्वात् तासां तत्परिज्ञानं तेनैव ता व्यामुग्धा भवन्तीति, **हसितं** मन्त्रात्मकं दृष्टिः पाशात्मिकेति, यस्याः मनः येनैव प्रकारेणायाति तादृशमेव **हसितं प्रेक्षितं** चेति ज्ञापयितुं बहुवचनम् तत्र बाधिकां बुद्धिं दूरीकर्तुमाह **मत्तद्विरदेन्द्रविक्रम** इति, भयं बाधकं लौकिकं तासां वैदिके अधिकाराभावात् विचारे दोषाभावाच्च, तत्रायं यथा **मत्तो द्विरदः** स्वार्थं सर्वानविचार्य लौकिकालौकिकसाधनयुक्तो यथा मत्त गजः, सजातीयानामप्यतिक्रमार्थं **इन्द्र**पदं, तस्यापि सर्वथा कर्तव्यत्वेन धर्मः अत्यधिको भवतीति **विक्रम**पदं, तस्मादस्य एतत्प्रपत्तौ तासां च सर्वथा भयाभावश्च सूचितः, ननु दृष्टिद्वारा हि मनोग्राह्यमन्तः स्थित इन्द्रियान्तरव्यापारस्य तदानीमभावात्, दृष्टिः पुनः चञ्चला अन्यत्र गच्छेद् यदि तदा तद्द्वारा ग्रहणं सर्वथा न सम्भवतीति कथमेकान्ततो ग्रहणमिति चेत् तत्राह **तासां दृशां श्रीरमणात्मना** लक्ष्मीरमणरूपेण **उत्सवं ददत्** इति, उत्सवासक्तो हि नान्यत् किञ्चन वेद सर्वस्वापहारेपि, चञ्चलानां मध्ये लक्ष्मीः परमकाष्ठामापन्ना, तां चेद् रमयति अनन्यासक्तां करोति कथमन्यां न कुर्यात्, अतो निष्प्रत्यूहं तासां मनोहरणमुपपद्यते, आत्मपदेन चावश्यकत्वं तत्परत्वे सूचयति ।।२७।।

व्याख्यार्थ—इस प्रकार से भगवान् के दर्शन के लिये उन सब का प्रपंच का विस्मरण–भूल जाने-का निरूपण करने के बाद प्रपंचरहित हुई उनकी भगवान् में आसक्ति होने के लिये "मनांसि" इस श्लोक से भगवान् के चरित का वर्णन करते हैं । उन ऊपर बतलाई पुरवासिनियों स्त्रियों के मन भगवदीय हो जाने पर तो उनकी भगवान् में आशक्ति हो जाना सिद्ध (सहज) ही है, क्योंकि संसार का मूल मन ही है, मन को वश में करने के दो प्रकार हैं । (१) जैसे किसी उत्तम विषय में मन लग जाता है, वैसे ही किसी वस्तु की सामर्थ्य से ही (अपने आप) स्वयं वश में हो जाता है और दूसरा यह है जैसे मंत्र आदि के द्वारा मन वश में होता है, वैसे ही मोह लेने अपने गुणों से ही वश मे हो जाता है । इन दोनों ही प्रकारों से उन के मन भगवान् के वश में हो जाने से भगवदीय हो गये थे और उन पुरस्त्रियों की भगवान् में आसक्ति सिद्ध हो गई थी ।

अरविन्दलोचन 'कमलनयन' पद से भगवान् के स्वरूप की सुन्दरता का और सारे सन्तापों को दूर करनेवाले होने से उपकार करनेवाले रूप से निरूपण किया है, मोहित करने वाले भगवान् के धर्मों का वर्णन करते हैं कि उनकी स्वच्छन्द लीला को सूचित

करनेवाले अट्टहास से पूर्ण चितवन से भगवान् उनकी ओर वैसे ही देख रहे थे जैसे कोई अत्यन्त प्रेमी जार अपनी चेष्टा सूचक हास्यपूर्वक देखता है। वे नागरिक स्त्रियां थीं, यह सब कुछ समझतीं थीं। इसीलिये वे अत्यधिक मोहित हो गईं। भगवान् की मन्द मुस्कान–मन्दहास्य–मन्त्र जैसा और दृष्टि–चितवन–बन्ध कर लेने वाली सांकल जैसी है। इसलिये उन स्त्रियों में प्रत्येक का मन जिस जिस प्रकार से मोहित होता था उसे उसी का हास्य और अवलोकन भगवान् करते थे। इसी अभिप्राय से श्लोक में "प्रगल्भलीलाहसितावलोकनैः" यह बहुवचन है।

मन के भगवान् पर मोहित होने में रुकावट डालने–बाधक होने–वाली बुद्धि को दूर करने के लिये भगवान् का मस्त गजराज के समान पराक्रमी,यह विशेषण है। वैदिक में स्त्रियों का अधिकार नहीं होने से और विचार करने पर भगवान् पर मन के मोहित होने में कोई दोष न होने से ऐसा करने में केवल लौकिक भय ही रुकावट-बाधक-बन रहा था, इस भय की निवृत्ति के लिये ही भगवान् को उन्मत गजराज की उपमा दी गई है। जैसे मस्त हाथी अपने कार्य में किसी का विचार न करके लौकिक अलौकिक उपायों से (जैसे बने वैसे ही) अपने कार्य को सिद्ध करता है और अपने जाति के दूसरे विघ्नकर्ता हाथियों को हरा-पराजित-करके अपनी सारी-हथनियों के साथ विलास करना रूप-प्रथा को पूरी करता है, वैसे ही भगवान् मस्त गजराज के समान पराक्रम वाले हैं। इसलिये इस कथन से उन स्त्रियों को भगवान् के शरण में-आश्रय में-चले जाने पर किसी प्रकार का भी भय नहीं है, यह सूचित किया है।

भगवान् उन स्त्रियों के मन को अपनी दृष्टि द्वारा ग्रहण कर लेते, क्योंकि दर्शन के समय उनकी दूसरी इन्द्रियां तो काम कर ही नहीं रही थीं और दृष्टि चंचल है। इसलिये दृष्टि के दूसरी जगह पर चले जाने पर दृष्टि के द्वारा मन का ग्रहण कर लेना निश्चय रूप से कैसे हो सकता है? ऐसी शंका के उतर में कहते हैं कि उनकी दृष्टियों -नेत्रों- को भगवान् श्री लक्ष्मी के रमण रूप से उत्सव दे रहे थे। उत्सव में आसक्त हुए व्यक्ति को उत्सव के अतिरिक्त अपने सर्वस्व के हरण कर लेने तक का किसी भी पदार्थ का भान नहीं रहता है। लक्ष्मी तो सभी चंचलों में सबसे अधिक चंचल है। ऐसी लक्ष्मी को भी भगवान् एकमात्र अपने में ही आसक्त कर लेते हैं, तो फिर अन्य स्त्री को अपने में आसक्ति(प्रीति)क्यों न करें। अर्थात् अवश्य ही कर देते हैं,इसलिये उनके मन का हर लेना तो सहज ही सिद्ध हो जाता है। "श्रीरमणात्मन" इस आत्मन् (रूप) शब्द से यह सूचित किया है कि उन स्त्रियों की दृष्टियों की भगवान् में आसक्ति होना आवश्यक ही था। वे अपनी दृष्टियों को किसी दूसरे पर डाल ही नहीं सकतीं थीं ॥२७॥

श्लोक—दृष्ट्वा मुहुः श्रुतमनुद्रुतचेतसस्तं तत्प्रेक्षणोत्स्मितसुधोक्षणलब्धमानाः।
आनन्दमूर्तिमुपगुह्य दृशात्मलब्धं हृष्यत्त्वचो जहुरनन्तमरिन्दमाधिम् ॥२८॥

श्लोकार्थ—हे अरिन्दम(शत्रुओं का दमन करने वाले)राजन्! बार बार श्रीकृष्ण की लीलाओं और चरितों को सुनने से पुर नारियों के सौभाग्य का उदय हुआ। उन्होंने श्रीकृष्ण के दर्शन करके अपने नेत्रों को कृतार्थ किया। भगवान् ने भी दया

दृष्टि से उन्हें देख कर और मंद मुस्कान रूप अमृत पिला कर उनका यथोचित आदर किया। नेत्र द्वारा हृदय में पहुँची हुई श्रीकृष्ण की आनंदमयी मूर्ति को हृदय से लगा कर वे पुर नारियाँ भी विरह की व्यथा से मुक्त हो गई और परम आनद प्राप्त होने से उनके शरीरों में रोमाञ्च हो आया ॥२८॥

सुबोधिनी—ननु भगवानक्लिष्टकर्मा तासां मनः कथं गृहीतवानित्याशङ्क्याह **दृष्ट्वे**ति, आत्मानं सकार्यं ताभ्यो दत्त्वा तासां मनो गृहीतवान्, भगवत्स्वरूपग्रहणे तासां प्रकारमाह **दृष्ट्वे**ति, **मुहुः** पूर्वं वारंवारं **श्रुतो** यो भगवान् स इदानीं दृष्टः, ततः प्रथमं चक्षुःप्रीतिरुक्ता श्रवणव्यतिरेकेण प्रीतिर्न भवतीति, अन्यथाद्भुतरस एवोत्पद्यते न प्रीतिः, सर्वेभ्योधिकप्रीतिसिद्धयर्थं **मुहुः** श्रवणमपेक्ष्यते, ततस्तासां चित्तासङ्गमाह **अनुद्रुतचेतस** इति, दर्शनमनुद्रुतं चित्तं यासाम्, अत एव ध्रियमाणमपि स्वभावादिभिर्न स्थितम्, **तमिति**, हृतमनसं तेन चित्तप्रतिबन्धकं मनोपि नास्ति प्रत्युतानुगुणमेवेति, तथाप्यपुरस्कृताः महान्तं ग्रहीतुमसमर्था इति पुरस्कारमाह **तस्य प्रेक्षणपूर्वकं** यदु**त्स्मित**मूर्ध्वस्मितं सर्वप्रपञ्चात् अधिकरसं तद्विस्मारकं च, सैव **सुधा**मिष्टत्वाय, **स्मितं** अलौकिकभावाय **प्रेक्षण**मिति द्वयं मिलितममृततुल्यं भवति, आभासैरप्युपमीयते प्रकृतोपयोगाय, तया यदुक्षणं सेचनं तेन **लब्धो मानो** याभिः, लताप्रायास्ताः अमृतासिक्ताः भगवतोप्यानन्दरूपं फलं फलिष्यन्तीति, ततः सन्माननं प्राप्य आनन्दानुभवे योग्याः सत्यः भावलक्षणं वा मानं प्राप्य तदपनोदनार्थमिव समागतं भगवन्तं स्वतः पुरुषार्थरूपमानन्दरूपा **मूर्तिर्यस्ये**ति, **उपगुह्य** अन्तरात्मना चित्तेन च समालिङ्ग्यान्तः पूर्णानन्दा जाताः, भगवत्प्रविष्टमार्गमाह **दृशा आत्मलब्धमि**ति, दृष्टिद्वारा ज्ञानद्वारा च आत्मन्यात्मत्वेन वा लब्धं, ततोन्त पूर्णानन्दाः बहिरपि तं प्रकटितवत्य इत्याह **हृष्यत्त्वच** इति, सर्वाङ्गेषु रोमाञ्चयुक्ताः, ततः पूर्णमनोरथा जाता इत्याह **अनन्तमाधिं जहुरि**ति, भगवानस्माभिर्न प्राप्त इति पूर्वं मनःपीडा स्थिता, प्राप्तेपि भगवति यावत् नित्यप्राप्तो भगवान् न ज्ञायते यावद् वा नान्तः प्रविश्य स्थिरो भवति तावद् भूतभविष्यत्कालयोः भगवत्सम्बन्धाभावचिन्ता न गच्छतीति, अधुनान्तः प्रविष्टे भगवति तेनैव पूर्णाः मनःपीडायाः स्थानाभावात् तां **जहुः**, अन्यथा नित्यमनोरथः क्षणमात्रदृष्टे न सिद्धयेत्, **अरिन्दमे**ति सम्बोधनं लौकिकालौकिकतुल्यतया स्त्रीपुंप्रसङ्ग इति लौकिकभावेन कामादिर्भवेदिति तन्निवृत्त्यर्थं **अरीन्** कामादीन् **दमयति** ॥२८॥

व्याख्यार्थ—भगवान् -अक्लिष्टकर्मा- क्लेश के बिना कर्म करने वाले हैं। उन्होंने उन पुरनारियों के हृदयों को कैसे हर लिया ? इसका उत्तर इस 'दृष्ट्वा मुहुः' श्लोक से देते हैं। भगवान् ने अपने कर्मों सहित स्वयं को उनको देकर उनके मन को ले लिया। पुर वासिनियों ने भगवान् के स्वरूप को जिस प्रकार से ग्रहण किया, उस प्रकार को इस श्लोक से बताते हैं। पहले जिनको बार बार सुना था, उन भगवान् के दर्शन किए। इस प्रकार पहले नेत्रों की प्रीति कही। सुनने के बिना प्रीति नहीं होती है; क्योंकि पहले नहीं सुना हुआ नवीन पदार्थ यदि देखने में आता है; तो उसमें अद्भुत रस ही उत्पन्न होता है, (उसमें) प्रीति उत्पन्न नहीं होती है। सबसे अधिक प्रीति होने में तो बार बार श्रवण करने की आवश्यकता होती है।

भगवान् के दर्शन करते ही उनके चित्त संसार के बन्धनों से मुक्त होकर भगवान् के पीछे दौड़ (ने लग)गए। स्वभाव आदि के रोकने पर भी नहीं रूके। चित्त उन मन के हरने-चुराने-वाले के-साथ-

पीछे दौड़ गया। इसलिए मन भी चित्त को नहीं रोक सका। रोकना तो दूर रहा, मन तो चित्त के चले जाने में अनुकूल -सहायक- ही हो गया।

मन को भगवान् के द्वारा हर लिये जाने और चित्त का भगवान् के पीछे दौड़ जाने पर भी बिना स्वीकृति के महापुरुष भगवान् को ग्रहण किया -पकड़ा- नहीं जा सकता। इसलिए भगवान् की स्वीकृति(पुरवासियों का आदर)का वर्णन करते हैं कि सारे प्रपञ्च से अधिक रसवाला और प्रपञ्च को भुला देनेवाला भगवान् का चितवनपूर्वक उत्कृष्ट मन्द हास्य ही अमृत था। मीठा लगने के लिए हास्य और अलौकिक भाव को उत्पन्न करने के लिए दृष्टि दोनों (हास्य तथा दृष्टि) के मिलने पर अमृत की समानता होती है। यहाँ इस प्रकृत विषय में उपयोगी होने के कारण अमृत को समानता कही गई है। वास्तव में तो भगवान् की दृष्टि और हास्य अमृत की अपेक्षा अत्यधिक उत्तम है। केवल अमृत भगवान् के चितवन और हास्य जैसा है, किन्तु समझने में सहज होने के कारण अमृत के साथ समता बतला दी गई है।

भगवान् ने अपनी उस अमृतमयी दृष्टि से उनको (सिंचन) सींच कर अवलोकन कर के उनका मान किया है, उनको अङ्गीकार किया। वे लता रूप थीं, उन पर अमृत की वर्षा करने से वे आनन्द रूपी फल को देवें, ऐसी भगवान् की भी इच्छा थी। तब वे भगवान् से आदर (स्वीकृति) प्राप्त करके आनन्द का अनुभव करने योग्य बन गईं। अथवा भगवान् से प्रेम रूपी सम्मान पाकर (उनसे उस प्रेम को प्राप्त करने के लिए मानो पधारे हुए आनन्द स्वरूप, स्वतः पुरुषार्थ रूप) भगवान् का अपने भीतर आत्मा और चित्त से भगवान् का आलिङ्गन कर भीतर ही भीतर आनन्द मग्न हो गईं। तात्पर्य यह है कि दृष्टि के द्वारा और ज्ञान मार्ग के द्वारा भगवान् का अपने हृदय के भीतर प्रवेश करके हृदय में भगवान् का आलिङ्गन कर के वे आनन्द से भरपूर हो गईं।

फिर हृदय में नहीं समाये हुए उस भगवदानन्द को बाहर भी प्रकट कर दिया। उनका सारा शरीर -सब अङ्ग- रोमाञ्चित हो गया और उनके सभी मनोरथ पूरे हो गए। उनके मन में पहले भगवान् के प्राप्त न होने से पीड़ा बनी हुई थी; भगवान् के मिल जाने पर भी जब तक भगवान् हमें सदा के लिए मिल गए और हमारे हृदय में प्रवेश करके वहाँ स्थिर विराज गए हैं,यह न जान लिया जाय, तब तक पहले -भूत काल में- जैसे भगवान् का सम्बन्ध नहीं था वैसे आगे -भविष्यत् में- कहीं (भगवान् का) सम्बन्ध न रहे, ऐसी चिन्ता बनी ही रहती है। अब हृदय में प्रवेश करके भगवान् के नित्य विराजमान हो जाने से परिपूर्ण हुईं उन पुरवासिनियों के हृदय में पीड़ा के लिए कोई स्थान नहीं रहा और उन्होंने उस -आधि- मानसिक पीड़ा का त्याग कर दिया। यदि भगवान् उनकी दृष्टि द्वारा उनके हृदय में सदा नहीं रहते तो उनके एक क्षण मात्र के दर्शन करने से उन पुरवासिनियों के सदा मनोरथ पूर्ण नहीं होते। स्त्री और पुरुष का लौकिक तथा अलौकिक प्रसङ्ग (प्रेम) समान ही होता है। इसलिए यहाँ (इस विषय में) लौकिक विचार से भी कामादि विकार उत्पन्न न हो सके, इस कारण से (अरिन्दम) कामादि शत्रुओं का दमन करनेवाले, ऐसा सम्बोधन (राजा के लिए) दिया है ॥२८॥

श्लोक—**प्रासादशिखरारूढाः प्रीत्योत्फुल्लदृशोऽबलाः ।**
अभ्यवर्षन् सौमनस्यैः प्रमदा बलकेशवौ ॥२९॥

श्लोकार्थ— महलों पर चढ़ी हुई मंदोन्मत्त उन अबलाओं के कमल से नेत्र प्रसन्नता से खिल उठे और वे श्रीकृष्ण और बलदेव पर पुष्पों की वर्षा करने लगीं ॥२९॥

सुबोधिनी--ततः पूर्णमनोरथानां कृत्यमाह **प्रासादशिखरारूढा** इति. देवानां कृत्यं पुष्पवृष्टिः, एतास्तु देवरूपा जाताः अन्तःपूर्णामृतत्वात्, बहिरपि देवतुल्यत्वं जातमित्याह **प्रासादशिखरेषु समारूढाः** विमानेष्विव स्थिताः, अनिमिषत्वसिद्धचर्थमाह **प्रीत्योत्फुल्लदृश** इति, स्नेहेन कृत्वा निर्निमेषाः विकसितनयना एव स्थिताः, **अबलाः** स्वभावतः सौन्दर्ययुक्ताः, अतः सर्वथा देवतुल्याः **सौमनस्यैः** पुष्पैरुत्तमैरभ्यवर्षन्,ननु निकटे स्थिताः बहुपुष्पैः वर्षणे अतिक्रमशङ्कया कथं न भीता जाता इति चेत् तत्राह **प्रमदा** इति, **प्रकृष्टो मदः** कामात्मको यासु तदा आविर्भूतकामाः विचाररहिता जाता इत्यर्थः किञ्च, पुष्पवृष्ट्या न भगवतः काचित् अनुपपत्तिरिति नामविशेषमाह **बलो** बलभद्रः बलाधिक्यादेव, **केशवस्तु** ब्रह्मेशयोः सुखदातेति सर्वदा पुष्पवृष्टिमनुभवति, मत्वर्थीये च वप्रत्यये पुष्पाणां केशेषु स्थापनं सर्वदेति नातिक्रमशङ्का ॥२९॥

व्याख्यार्थ—अपने मनोरथ पूर्ण हो जाने पर उन पुरवासिनियों ने जो कुछ कार्य आगे किया, उसका वर्णन इस 'प्रासादशिखरारूढाः' श्लोक से करते हैं। पुष्पों की वर्षा करना देवताओं का कार्य है। यहाँ भगवान् पर पुष्प बरसानेवाली ये स्त्रियाँ भी -हृदय अमृत से भरपूर होने के कारण- देव रूप हो गईं। वे बड़े ऊँचे महलों पर चढ़ी हुई होने से विमानों पर बैठी हुई सी दिखाई दीं। इसलिए वे बाहर भी देवता रूप हो गईं। देवता जैसे पलक नहीं मारते, वैसे ही ये स्त्रियाँ भी स्नेह से निमेष रहित-खुले नेत्र वाली-ही रह गईं। (अबलाः) स्वाभाविक सुन्दरता से युक्त वे सब प्रकार से देवता जैसी हो कर उत्तम उत्तम पुष्पों की वर्षा करने लगीं।

पास रहनेवाली उनके मन में बहुत सारे पुष्पों के बरसाने पर अपराध की शङ्का क्यों नहीं हुई ? इसके उत्तर में कहते हैं कि वे प्रमदा थीं,उनका कामात्मक मद प्रकट हो रहा था,इस कारण से वे विचार शून्य हो गईं थीं, इसलिए अपने अपराध को नहीं सोच सकीं और इस पुष्प वर्षा से भगवान् की कोई हानि -अड़चन- भी नहीं हुई थी। इसलिए (यह प्रदर्शित करने के लिए) उनके विशेष नामों को कहते हैं। बलभद्रजी जिनको बल की अधिकता के कारण बल ही कहते हैं तथा केशव तो (क) ब्रह्मा (ईश) शिव दोनों को (व) अमृत तथा सुख देनेवाले हैं, जो सदा ही पुष्पों की वर्षा का अनुभव करते हैं अथवा केश शब्द से मत्वर्थ व प्रत्यय होने के कारण केशवाले तथा केशों पर सदा पुष्पों को धारण करनेवाले होने से दोनों पर इस पुष्पवृष्टि से कोई असुविधा होने का भय नहीं था ॥२९॥

श्लोक—**दध्यक्षतैः सोदपात्रैः स्रग्गन्धैरभ्युपायनैः ।**
तावानर्चुः प्रमुदितास्तत्र तत्र द्विजातयः ॥३०॥

श्लोकार्थ—ब्राह्मण आदि द्विजातियों ने भी स्थान स्थान पर दही,अक्षत,जल पात्र, माला, चन्दन आदि सामग्रियों से प्रसन्नतापूर्वक दोनों भाईयों का पूजन किया ॥३०॥

सुबोधिनी—एवं स्त्रीणां सन्मानन निरूप्य ब्राह्मणानां सम्बन्धि सन्मानननमाह **दध्यक्षतै**रिति, लोके स्त्रियः अलौकिके द्विजा इति द्वयमेव जगद्रत्नं, तेन भूषितो भगवान् निरूप्यते, देशाचारात् तिलकार्थं **दधि अक्षता**श्च, तैः प्रथमतः अर्चनं,ततः पादप्रक्षालनाद्यर्थं **उदपात्राणि**, बहुवचनमनेकधा जलोपयोग इति नानाविधजलानि निरूपयति,तत उत्तमाः **स्रजः**, ततो **गन्धः** चन्दनकृतो धूपकृतश्च, ततः **अभ्युपायनानि** मिष्टान्नादीनि फलादीनि वा, एवं चतुर्विधैः साधनैः **तौ** रामकृष्णौ **आनर्चुः**, ततः **प्रमुदिता** अपि जाताः, **द्विजाती**नां पर्यवसानेपि क्वचिदेव सुखं भवतीति पश्चात् प्रमोद उक्तः, **तत्र तत्रे**ति, ब्राह्मणानां सम्मर्दो निवारितः क्रमपूजा चोक्ता, **द्विजातय** इति सर्वे साधारण्येन पूजार्थं प्रवृत्ता इति तेषामपि निरोध उक्तः ॥३०॥

व्याख्यार्थ—इस प्रकार पुरवासिनी स्त्रियों के द्वारा किए गए सम्मान का वर्णन कर के 'दध्यक्षतैः' श्लोक से ब्राह्मणों के द्वारा किए सत्कार को कहते हैं। लौकिक में स्त्रियाँ और अलौकिक में ब्राह्मण जगत् में दोनों ही रत्न हैं। इन दोनों के द्वारा आदर सत्कार तथा पूजा (विभूषित) किए गए भगवान् का निरूपण किया जाता है। (१) देश की प्रथा के अनुसार दही और अक्षतों-जो तिलक के लिए लाए गए थे-से भगवान् के पहले तिलक फिर पूजन किया और (२) पाँव धुलाने के लिए जल के पात्र लाए गए। जल का बहुत कामों में अनेक प्रकार से उपयोग होता है। इसलिए जल के पात्रों में बहुवचन दिया गया है। (३) बड़ी सुन्दर मालाएँ, चन्दन, धूप आदि सुगन्धी पदार्थ, (४) भाँति भाँति की भेंटें, मिष्ठान्न और फल आदि, इस प्रकार चार भाँति के साधनों (पदार्थों) से उन ब्राह्मणों ने श्रीकृष्ण बलदेव दोनों का पूजन किया और वे अत्यन्त प्रसन्न भी हुए। ब्राह्मणों को अन्त में प्रसन्नता कहीं कहीं होती है। इसलिए उनका सुखी होना पीछे-पूजा के बाद-कहा गया है। जगह जगह पर पूजा की गई। अर्थात् भीड़ न कर के सभी ने बारी बारी से पूजा कर ली। सारे ब्राह्मणों का सामान्य रूप से पूजा करने में लग जाने के वर्णन से उनका भी निरोध कहा गया है ॥३०॥

श्लोक—**ऊचुः पौरा अहो गोप्यस्तपः किमचरन् महत् ।**
या ह्येतावनुपश्यन्ति नरलोकमहोत्सवौ ॥३१॥

श्लोकार्थ—पुर नारियाँ परस्पर में कहने लगीं—अहो! गोपियों ने पूर्व जन्म में कौन सी ऐसी भारी तपस्या की थी, जो इस मनुष्य लोक में महोत्सव रूप इन दोनों को वे हर घड़ी देखती ही रहती हैं ॥३१॥

सुबोधिनी—एवं कायिकं मानसिकं सन्माननमुक्त्वा वाचनिकमाह **ऊचु**रिति, सर्व एव पुरवासिनः सकृत् भगवन्तं दृष्ट्वा अमितानन्दमनुभूय विचारितवन्तः, ये सर्वदैव भगवन्तं पश्यन्ति तेषां महद्भाग्यं तद्भाग्यं स्मृत्वा आश्चर्याविष्टा आहुः **अहो** इति, **गोप्यस्तपः किमचरन्नि**ति, भगवन्तं द्रष्टुं स्त्रिय एव जानन्तीति तासां प्रशंसा, तपसैव सर्वं सिध्यतीति ज्ञातेस्माभिरपि तत् कर्तव्यमिति, यत्र साधनेपि तत्रत्यानामिच्छा तत्र फले किं वक्तव्यमिति भावः, भगवद्दर्शनस्योत्कृष्टत्वायाह **नरलोकमहोत्सवा**विति, उत्सवः कदाचिदेव भवति महोत्सवस्तु ततोपि दुर्लभः तत्रापि सर्वेषामुत्सवोतिदुर्लभः, **एता**विति प्रदर्शनेनाद्भुतत्वे प्रमाणमुक्तम् ॥३१॥

व्याख्यार्थ—इस प्रकार काया और मन के द्वारा सम्मान का वर्णन करके इस 'ऊचुः पौरा' श्लोक से वाणी के द्वारा किए (भगवान् के) सम्मान का निरूपण करते हैं। मथुरावासी सारे ही नर नारी भगवान् का एक बार दर्शन करके अपार आनन्द का अनुभव कर विचार करने लगे कि जो सदा ही भगवान् के दर्शन करते हैं, उनका तो बड़ा भाग्य है। प्रतिदिन-सदेव-दर्शन करने वाले बड़भागियों के भाग्य का स्मरण करके वे सब आश्चर्य मग्न होकर कहने लगे कि अहो! गोपीजनों ने कौन सी तपस्या की है? भगवान् का दर्शन करना तो स्त्रियाँ ही जानती हैं। इस प्रकार से उनकी प्रशंसा की है। तपस्या से ही सब प्राप्त होता है, ऐसा जान कर हमें भी तपस्या करनी चाहिए। इस प्रकार जब उन पुरवासियों की साधना-तपस्या-करने में भी इच्छा हुई, तो फल की प्राप्ति में भी इच्छा होना निश्चित ही है, यह तात्पर्य है। भगवान् का दर्शन सर्वोत्तम है, क्योंकि यह तो मृत्युलोक में महोत्सव रूप है। उत्सव तो कभी कभी होता है और महोत्सव तो उत्सव से भी दुर्लभ होता है, किन्तु यह तो सब ही का उत्सव होने के कारण अत्यन्त ही दुर्लभ है। एतौ-इन दोनों राम कृष्ण को-यों सब को दिखलाकर पुरवासियों ने उनकी अद्भुतता में प्रमाण-प्रदर्शित किया-दिया है ॥३१॥

श्लोक—**रजकं कञ्चिदायान्तं रङ्गकारं गदाग्रजः।**
दृष्ट्वायाचत वासांसि धौतान्यत्युत्तमानि च ॥३२॥

श्लोकार्थ—जिधर से श्रीकृष्ण जा रहे थे, उसी रास्ते से कोई धोबी आ रहा था। वह कंस का धोबी था, जो उसके (कंस के) कपड़ों को धोता था और रङ्गता भी था। उसे देख कर गदाग्रज भगवान् ने उससे अति उत्तम और धुले हुए वस्त्र माँगे ॥३२॥

सुबोधिनी—एवं कायवाङ्मनोभिः सन्माननं निरूप्य ये सन्माननं न कुर्वन्ति ये वा कुर्वन्ति उभयोः फलं दर्शयितुं हीनजातीयानां अतिक्रमे नाशो निरूप्यते **रजक**मिति सप्तभिः,**हीनः भगवन्तं न मन्यत** इति ज्ञापयितुमेवं कथा, अन्यथा भगवान् हीनं न कुर्यात्, अन्त्यजेषु मुख्यो रजकः, 'रजकश्चर्मकारश्चे'त्यादिवाक्यात्, अत एव रामावतारे रजकस्याधिक्षेपवाक्यं, अत एव इयं जातिरेव **दुष्टा** स वा अयं, **कञ्चि**दिति महान्तं साभरणमुत्तमवस्त्रयुक्त**मायान्तं** स्वसम्मुखं, रजका द्विविधाः केवलमलशोधकाः रञ्जकाश्च, तत्रायं रञ्जक इत्याह **रङ्गकार**मिति,ननु भगवान् राजवस्त्राणि किमिति प्रार्थयति तत्राह **गदाग्रज** इति, गदो रोहिणीपुत्रो द्वितीयः, सोग्रे भविता, तस्मादग्रे जातो भगवान्, स चोत्पादनीयः, तत् कंसवधाभावे न भवतीति कंसे मारिते तानि वस्त्राणि स्वस्यैव, याचनं तु तं मेलयितुं, यथा पुरवासिनः तथा तद्भृत्या अपि चेत् न मारणीया इति, केचित्तु गदोयं भविष्यतीति मारणार्थं तथोक्तवानित्याहुः कृपादृष्टिस्तस्मिन् पतितेति तदुद्धरणार्थं याचितवान् तदाह **दृष्ट्वायाचते**ति, ननु विद्यमानेषु वस्त्रेषु किमिति याचितवांस्तत्राह **धौता**नीति, साम्प्रतमेव प्रक्षालितानि स्वरूपतोप्यु**त्तमानि**, **च**कारात् नानाविधानि ॥३२॥

व्याख्यार्थ--इस प्रकार काया, वाणी और मन से किये गए भगवान् के सन्मान का वर्णन करने वालों तथा सन्मान न करने वालों को प्राप्त होने वाले फल को दिखाने के लिये 'रजकं' इस श्लोक से आरम्भ करके सात श्लोकों से यह निरूपण करते हैं कि हीन जातिवाला यदि भगवान्

का अपमान करता है तो उसका नाश हो जाता है। हीन मनुष्य भगवान् को नहीं मानते हैं, यह बतलाने के लिये इस कथा का वर्णन किया है। हीन पुरुष यदि भगवान् का सन्मान करें तो भगवान् उनको हीन जाति में जन्म नहीं दें। धोबी और मोची 'रजकश्चर्मकारश्च' इस वाक्य के अनुसार अन्त्यजों में धोबी मुख्य है। इसी से रामावतार में धोबी ने ही अपमान कारक वचन कहे थे। इसलिये यह जाति ही दुष्ट है अथवा रामावतार में अपमान जनक वाक्य बोलनेवाला धोबी ही यह (धोबी) था। भगवान् ने वस्त्र तथा आभूषणों से सुसज्जित किसी धोबी को उसी मार्ग से सामने आता हुआ देखा। धोबी दो काम करते हैं (१) मैले कपड़े धोना और (२) कपड़े रंगना। उनमें यह रंगरेज-रंगकार-था।

भगवान् ने उससे राजा के वस्त्र क्यों मांगे ? इस के उत्तर में कहते हैं कि भगवान् गदाग्रज हैं। गद नाम का रोहणीजी का दूसरा पुत्र है, जिसका जन्म आगे होगा। इसलिये भगवान् गद से पहले प्रकट हुए हैं और अब गद को उत्पन्न करना है, जो कंस का वध हुए बिना नहीं हो सकता है इसलिये कंस को मार दिये जाने के बाद ही वे सारे वस्त्र भगवान् के ही हैं। उससे याचना तो इस बात की जांच के लिये की कि साधारण पुरवासियों की तरह कंस के सेवक भी मारने योग्य नहीं हैं अथवा मार देने योग्य हैं। कितने ही टीकाकार तो ऐसा कहते है कि यह रंगरेज ही आगे गद रूप से जन्म लेगा। इसलिये उसको मारने के अभिप्राय से ही उससे वस्त्र माँगे थे। उसके ऊपर भगवान् की कृपादृष्टि हुई और उसका उद्धार करने के लिये भगवान् ने उससे वस्त्र (उस को देख कर) मांगे।

भगवान् के पास वस्त्र तो थे ही, किन्तु फिर भी वस्त्र मांगने का कारण यह था कि उसके पास वे वस्त्र तत्काल धोये हुए उत्तम और रंग बिरंगे (भांति भांति के) थे ॥३२॥

श्लोक—**देह्यावयोः समुचितान्यङ्ग वासांसि चार्हतोः।**
भविष्यति परं श्रेयो दातुस्ते नात्र संशयः ॥३३॥

श्लोकार्थ—श्रीकृष्ण ने कहा-हे सज्जन धोबी! हमारे अङ्गों में ठीक हो, वे वस्त्र हमारे लिए दे दो। तेरे पास के ये कपड़े हमारे ही पहनने योग्य हैं। हम को वस्त्र देने से अवश्य तेरा कल्याण होगा, इसमें सन्देह नहीं है ॥३३॥

सुबोधिनी—याचनमाह **देह्यावयो**रिति,गोपालेभ्यः पश्चात् देयमिति सङ्कोचादावयोरेवेत्युक्तम्, **समुचितानि** मह्यं पीतप्रधानानि बलभद्राय नीलप्रधानानि, **अङ्गे**ति सम्बोधनं तस्मिन् स्नेहसूचकमतिक्रमाभावार्थं च, **वासांसि** परिधानयोग्यानि, **चकारात्** यदि तवाभरणानि भवन्ति, गोपालेभ्योपि वा, न ज्ञायत इति चेद् तत्राह **अर्हतो**रिति, आवां उत्तमवस्त्राण्यर्हन्तौ, दाने किं स्यादत आह **भविष्यति पर श्रेय** इति, अन्येभ्यो दानापेक्षयापि मह्यं दाने परमधिकमेव **श्रेयो भविष्यति परं दातुरेव ते** न त्वदाने, अन्यथा भगवद्वाक्यमन्यथा स्यात्, दानपक्षे पश्चात् राजत्वे वृत्तेपि दोषान्तरशङ्कया श्रेयो न भवेदिति शङ्का वारयति **नात्र संशय** इति ॥३३॥

व्याख्यार्थ—'देह्यावयोः' इस श्लोक से वस्त्र मांगने का प्रकार का वर्णन करते हैं। सभी गोपालों को भी बाद में वस्त्र देना है, किन्तु प्रारम्भ में संकोचवश दोनों के लिये ही वस्त्र मांगे हैं। हम दोनों को हमारे योग्य अर्थात् मेरे (श्रीकृष्ण के) लिये खास कर पीले और बलदेवजी के लिये मुख्यरूप से नीले वस्त्र देओ। हे अंग!(हे सत्पुरुष!) यह सम्बोधन उस धोबी पर स्नेह सूचित करने के लिये तथा किसी प्रकार का दबाब नहीं है, यह बतलाने के लिये हैं। हमारे योग्य कपड़े; आभूषण हो तो आभूषण दो। अथवा इन गोप बालकों के लिये भी कपड़े देओ।

यदि धोबी इन को नहीं पहचानता हो तो भगवान् कहते हैं कि हम दोनों उत्तम से उत्तम वस्त्रों को पहनने के योग्य हैं। वस्त्रों के प्रदान करने से तेरा कल्याण होगा और मेरे (श्रीकृष्ण) को देगा तो बहुत बड़ा कल्याण होगा, परन्तु वस्त्र देगा तब ही कल्याण होगा, नहीं देगा तो नहीं होगा। यदि ऐसा अर्थ न हो तो भगवान् का वाक्य व्यर्थ होता है। इसका कपड़े देने पर ही कल्याण होना सम्भव है और यदि वस्त्र दे देता है तो भी राजा के वस्त्र दूसरों को दे देने के दोष (अपराध) की शंका रहने पर भी कल्याण नहीं हो, इस सन्देह के (विषय में; सन्देह नहीं हैं, इन पदों से दूर किया है ॥३३॥

श्लोक—**स याचितो भगवता परिपूर्णेन सर्वतः ।**
साक्षेपं रुषितः प्राह भृत्यो राज्ञः सुदुर्मदः ॥३४॥

श्लोकार्थ—वह राजा कंस के कपड़े धोने वाला धोबी था। पूर्ण काम परब्रह्म भगवान् श्रीकृष्ण के यों वस्त्र माँगने पर अत्यन्त घमण्डी वह राज सेवक क्रुद्ध होकर तिरस्कार करता हुआ बोला ॥३४॥

सुबोधिनी—एवं व्यवहारसिद्धत्वात् तदुपकारार्थं याचनेपि कृते दुष्टो नाङ्गीकृतवानित्याह **स याचित** इति, अविद्यमानत्वात् याचनं व्यावर्तयति **भगवानिति**, समर्थस्यापि कदाचित् न भवेदिति तदर्थमाह **परिपूर्णेन सर्वत** इति, सर्वदेशेषु सर्वकालेषु च परितः सर्वद्रव्याणि सर्वफलानि सर्वतः पूर्णानि ततश्च तादृशाय वचनेनापि हित वक्तव्यमिति तत् नोक्तवानित्याह **साक्षेप**मिति, आक्षेपपूर्वकं **रुषितः प्राह**, अन्तर्बहिः तस्य दोषौ निरूपितौ,रोष आन्तरः साक्षेपं यथा भवतीति बाह्यः, तस्य तथात्वे हेतुमाह **भृत्यो राज्ञ** इति, कंसस्य भृत्यः, स्वभावतोपि दुष्ट इत्याह **सुदुर्मद** इति, सुतरां **दुष्टो मदो** यस्येति ॥३४॥

व्याख्यार्थ—इस प्रकार व्यवहार की रीति से उस धोबी पर उपकार करने के लिये वस्त्र मांगने पर भी उस दुष्ट ने वस्त्र देना स्वीकार नहीं किया,यह इस 'स याचितोः' श्लोक से कहते हैं। यह बात नहीं थी कि भगवान् के पास वस्त्र नहीं होंगे, इसलिये उससे वस्त्र मांगे हों, क्योंकि भगवान् सर्वशक्तिमान के पास कभी कोई वस्तु न हो, ऐसी शंका नहीं हो सकती है। इसी अभिप्राय से श्लोक में परिपूर्ण (सब प्रकार से पूर्ण) विशेषण है। सभी स्थानों में कालों में और सब ओर से भगवान् के पास सब फलों सहित सारे पदार्थ सदा भरपूर होते हैं। ऐसे सर्व समर्थ पुरुष का वचन मात्र से ही

हित करना चाहिये था, किन्तु उसने भगवान् को उचित उत्तर नहीं देकर क्रोध से तिरस्कार पूर्वक कहा। उसने अपने-क्रोध के कारण भीतर के और तिरस्कार पूर्वक बोलकर बाहर के-दोषों को प्रकट कर दिया। वह राजा कंस का तो सेवक था और स्वयं भी अत्यन्त दुष्ट, मदोन्मत था, इसलिये उसमें भीतर और बाहर दोषों से भरपूर होना स्वाभाविक ही था ।।३४।।

श्लोक—ईदृशान्येव वासांसि नित्यं गिरिवनेचराः ।
परिधत्त किमुद्वृत्ता राजद्रव्याण्यभीप्सथ ।।३५।।

श्लोकार्थ—वह दुष्ट बोला—रे पहाड़ों पर और वनों में भटकते फिरने वाले जङ्गलियों! हे उच्छृङ्खलों! क्या तुम सदा ऐसे ही वस्त्रों को पहनते रहते हो, जो आज राजा के वस्त्रों को पहनना चाहते हो? ।।३५।।

सुबोधिनी—आक्षेपमाह **ईदृशान्येवेति**, यो हि समीचीनवस्त्राणि परिधत्ते स कदाचिदभावे याचयित्वापि परिधत्ते द्रव्यं दत्त्वा वा, तथा किं भवन्तः **ईदृशान्येवा**त्युज्ज्वलानि **नित्यं परिधत्त**, तथैवेत्याशङ्कायामाह **गिरिवनेचरा** इति, गिरौ वने च ये चरन्ति ते विद्यमानवस्त्रा अपि कुचैला एव भवन्ति, **नित्यं** ये **गिरिवनेचराः** तेषामुत्तमवस्त्रपरिग्रहो व्यर्थ एव, नन्वपरिहितान्यपि औत्सुक्यात् याच्यन्त इति चेत् तत्राह **किमुद्वृत्ता** इति, औत्सुक्ययाचने न **राजकीयानि याच्यन्ते** किन्तु साधारणानि, न त्वसाधारणान्यपि **याच्यन्ते**, का मर्यादेति चेत् तत्राह तर्हि किं भवन्त **उद्वृत्ता** इति, उद्गत वृत्तं मर्यादारूपं येभ्यः, एतादृशोद्वृत्तता किमर्थं क्रियत इति वा, येन **राजद्रव्याण्यभीप्सथ**, यस्तु मूर्धाभिषिक्तः तन्मात्रोपभोग्यानि मत्प्रक्षालितानि वस्त्राणि; तान्यपि यतो**भीप्सथ ।** ।।३५।।

व्याख्यार्थ—इस 'ईदृशान्येव' श्लोक से उसके आक्षेप पूर्ण वाक्यों का वर्णन करते हैं; जो सदा उत्तम उत्तम वस्त्र पहनते हों, वे कभी वैसे वस्त्रों के न रहने पर औरों से मांग कर अथवा मूल्य से खरीद कर भी पहनते हैं। इसी तरह क्या आप भी नित्य अत्यन्त उज्ज्वल वस्त्र ही धारण किया करते हो ? इस प्रश्न के उतर में भगवान् ऐसे उत्तम वस्त्र सदा धारण करलें, ऐसी मन में शंका करके वह स्वयं बोला कि पर्वत और वन में फिरने वाले भी तो वस्त्र तो पहनते हैं, किन्तु वे मलिन वस्त्र पहनते हैं,क्योंकि उन जंगलियों का उज्ज्वल वस्त्र धारण करना निरर्थक ही है।

कभी नहीं पहने वस्त्रों को भी पहनने की तीव्र इच्छा किसी की होती है, तो भी वह राजा के वस्त्रों को अपने पहनने के लिये नहीं मांगा करता है। साधारण वस्त्र तो मांगे भी जा सकते हैं, किन्तु असाधारण वस्त्र (राजा के वस्त्र) नहीं मांगे जाते हैं। यह कहाँ लिखा है कि राजा के कपड़े नहीं मांगे जाते ? उसके उत्तर में वह रजक फिर पूछता है कि क्या आप लोग जंगली ही हो? मर्यादा हीन हो? जो राजा के उपभोग के पदार्थों की इच्छा करते हो । देखो, मेरे धोये हुए वस्त्रों को तो केवल मूर्धाभिषिक्त राजा ही–जिस के मस्तक पर राज्याभिषेक होता है–धारण करता है। उन मेरे धोये हुए और केवल राजा के ही पहनने लायक उत्तम वस्त्रों की तुम इच्छा क्यों करते हो ? ।।३५।।

श्लोक—**याताशु बालिशा मैवं प्रार्थ्यं यदि जिजीविषा ।
बध्नन्ति घ्नन्ति लुम्पन्ति दृप्तं राजकुलानि वै ॥३६॥**

